No. 3.]

THE VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. Oxon.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

PAŃCHAPÂDIKÂ

OF

PADMAPÂDA

EDITED BY

RÂMAŚÂSTRÎ BHÂGAVATÂCHÂRYA,
ASSISTANT PROFESSOR, SANSKRIT COLLEGE, BENARES.

VOL. II. PART I.

SANSKRIT TEXT.

PRINTED, PUBLISHED AND SOLD BY
E. J. LAZARUS & Co., BENARES.
MAY BE HAD FROM GANESH DAS AND CO., CHOWK, BENARES:
JAYESTHARAM MUKUNDJI AND CO., BOMBAY:
OTTO HARRASSOWITZ, LEIPZIG: LUZAC AND CO., LONDON.

1891.

पञ्चपादिका ।

श्रीपद्मपादाचार्यविरचिता ।

काशीस्थराजकीयसंस्कृतपाठशालायामध्यापकेन
श्रीरामशास्त्रिभागवताचार्येण संशोधिता ।

काश्याम् ।

ई. जे. लाजरसकम्पन्याख्येन स्वमुद्रालये मुद्रिता ।

संवत् १९४८ ।

PREFACE.

The so called Pa*n*chapâdikâ of Padmapâda, the oldest of the commentaries on *S*añkara's *S*ârîrakabhâshya, is a fragment of a fragment. Its title would imply that the work treated of the first five pâdas of the Bhâshya; but, as a matter of fact, all the MSS. hitherto examined of it and its related glosses* end abruptly with the *chatuḥsûtrî i. e.* Adhy I. pâda 1, sû. 1-4. The fragmentary condition of the MSS. has not been satisfactorily explained. Beyond all doubt Padmapâda intended a complete treatise. See below, p. 29, ll 3, 4: 'svâvasara eva &c.,' which refers to Adhy. II, 2, 32 : and p. 33. ll 12, 13 : 'tathaika &c.,' referring to III. 3, 53 : and p. 75. ll 16, 17, where further general indications are given. But neither in these contexts, nor in the usual lengthy discussion of *mañgalâcharaṇa* (where, perhaps, it would have been more appropriate) is any explanation offered by the gloss writers as to the incompleteness of their original. Vidyâraṇya also furnishes no clue in his Vivaraṇaprameyasañgraha.† We are thus thrown back on what seems to be the later and doubtful testimony of one Mâdhava,‡ who in his *S*añ-

---

* The Pa*n*chapâdikâvivaraṇa, Tattvadîpana and Bhâvaprakâ*s*ikâ. An edition of the former work, with extracts from the latter, now appears in this Series.

† Will appear shortly.

‡ As against the identification of this Mâdhava with the renowned Vidyâraṇya, see Burnell's Vaṃ*s*abrâhmaṇa pref. p. xx and note. K. T. Telang discusses the historical value of the two *S*añkaravijayas in Ind. Antiq. Vol. V. pp. 287 *et seq.* He writes (*ibid* p. 293):—'A work on *S*añkara's victories is ascribed to another of *S*añkara's pupils—Chidvilâsa—who, I take it, is identical with Chitsukha. Not having access to the work, I am unable to say whether it was really written by a pupil of *S*añkara's, or whether the author was one of the "ancient poets" to whom Mâdhava refers. Nevertheless, the fact that it is attributed to Chitsukha induces me to express the hope that somebody may undertake to edit and publish it.' I regret having failed to procure a MS. of Chidvilâsa's *S*añkaravijaya. However, I may remark that this Chidvilâsa or Chitsukha (even if the names be taken as identical), a pupil of *S*añkarâchârya, cannot, though Telang's last sentence seems to imply that he may, be identical with the Chitsukha who wrote the well known Chitsukhî. For the Chitsukhî frequently quotes from the Nyâyakandalî of *S*rîdhara (*vide* Pandit, New Series Vol. V. pp. 335, 399, *et passim*), and must therefore be later than 991 A. D., the date of the Kandalî, cf. Bühler, Bo. R. A. S. Journal, 1877, p. 76.

karavijaya industriously recites the story of the Pa*n*chapâdî. To enable the reader to judge for himself the outlines are here given.

Sure*s*varâchârya, one of *S*ankara's pupils, seeks and receives permission to write a vârttika on the master's Bhâshya. [xiii. *s*l. 1-3]. Other disciples secretly approach the master and express their disapproval of Sure*s*vara's attempt, on the ground of his being devoted to karmakâṇḍa and, therefore, unfitted for the task of commenting on j*n*ânakâṇḍa. They ask that another disciple Padmapâda, whose sannyâsin name is Sanandana, may be entrusted with the task. [*s*l. 5-21]. Permission is granted. But Padmapâda must not write a vârttika to which Sure*s*vara is pledged. [*s*l. 43]. Sure*s*vara is told in private of the objections brought against him. Urged by the master to write an original work on Vedânta, he produces the Naishkarmyasiddhi * : not, however, without giving vent to a curse on any future commentary, 'which shall never pass current in the world.' [*s*l. 44-53]. Padmapâda writes a ṭîkâ 'the former portion of which is known as the Pa*n*chapâdikâ, and the latter portion as the Vṛitti.' [*s*l. 70-71] † The master consoles Sure*s*vara. Of Padmapâda's work, five pâdas—in fact, only the portion on the first four sûtras shall be known in time to come. Reappearing in this world as Vâchaspati, ‡ Sure*s*vara shall write a complete and lasting ṭîkâ. [*s*l. 72-73]. Padmapâda's ṭîkâ is burnt in his uncle's house. [xiv. *s*l. 160]. *S*ankara recites it from memory, while the delighted Padmapâda writes it down. [*s*l. 167-170].

We need not entirely discredit the above story. The jealousy of fellow disciples, or the accident of fire, might well injure or destroy a book. But there is a decidedly suspicious ring about the curse of Sure*s*vara and the prophecy of *S*ankara. Further, against *s*l. 70-71 we must balance the (fact already noticed) that

---

* Sure*s*vara nowhere mentions these circumstances.

† "यत्पूर्वभागः किल पञ्चपादिका तच्छेषगा वृत्तिरिति प्रथीयसी" ॥

‡ "वाचस्पतित्वमधिगम्य वसुन्धरायाम्"। 'Vâchaspatitva' may of course imply nothing more than mastery of style or language; but the personal reference to Vâchaspati, the writer of the Bhâmatî, would be irresistible to Mâdhava, the self-styled *navakâlidâsa* (cf. K. T. Telang, Ind. Antiq. Vol. I. p. 299).

the gloss writers, and Vidyâraṇya, do not even hint at the work having ever existed in a complete form. Their silence may not be conclusive; but it becomes all the harder to explain on the assumption that the Mâdhavîya*s*aṅkaravijaya furnishes an authentic and well known history of the Pa*n*chapâdikâ.

Our text is based on 4 MSS.: (*a*) No. 208, Benares Sanskrit College Catalogue, not dated, accurate; (*b*) No. 195, Ben. Sans. Coll. Cat. not dated, but older than (*a*), accurate; (*c*) lent by Mahâmahopâdhyâya Gaṅgâdhara *S*âstrî, not dated, but a copy of the Vivaraṇa in the same hand bears date Samvat 1822: both copies have evidently been revised by a pandit; (*d*) lent by Pandit Vibhavarâma of Benares, not dated, this too has been carefully revised by a pandit, who has appended occasional notes in the margin.

The Pa*n*chapâdikâ is a marked instance of a book more known than read. Though constantly quoted as the Ṭîkâ κατ' ἐξοχήν in later polemical works, the book itself is now rarely studied, having been supplanted by the Bhâmatî and the other commentaries on the Bhâshya. But as a full and, in some respects, original exposition of that Vedânta crux, adhyâsa (see appended notice in Sanskrit), our work has merits of its own which, together with its historical interest, will, it is hoped, justify its publication for the first time. A closer discussion of its contents is reserved for the introduction to the English translation now being prepared.

॥ भूमिका ॥

अथेयं पञ्चपादिका श्रीमद्भगवच्छङ्कराचार्यपादप्रणीतब्रह्मसूत्रभाष्यस्य व्याख्या तत एव साक्षादधिगतसकलवेदान्ततत्त्वेन तच्छिष्यमुख्येन श्रीपद्मपादाचार्येण विरचिता गभीरार्थपरिपूरिता जिज्ञासुजनोपयोगाय प्रकाश्यते । अस्याः किल पञ्चैव पादाः प्रचरेयुस्तत्रापि आद्या चतुःसूत्र्येव प्रसिध्येदिति भगवता शङ्करभगवत्पादेन रचयिता ऽभिदधइति वर्णयन्ति स्म शङ्करदिग्विजये माधवाचार्याः। तदादेशानुसारेणैव चिरमन्विष्यमाणापि चतुःसूत्रीतो नाधिकासावुपलभ्यते व्याख्या चास्या विवरणनाम्नी तावत्येव। अस्यां च प्रथमसूत्रे चत्वारि वर्णकानि द्वितीये चैकं तृतीये द्वे चतुर्थे च द्वे इत्येवं नव वर्णकानि विषयभेदेन तत्तद्विषयोपयुक्तविविधयुक्तिसंसक्तानि विहितानि सुखप्रतिपत्तये ग्रन्थकृता।

अयं च पद्मपादाचार्यो विष्ण्ववतारो विमलनामकब्राह्मणपुत्रः शङ्करदिग्विजये स॰३–श्लो २ अस्यैवारुणावतारत्वमिति ३–६ मतान्तरत्वेन पूर्वोक्त्या तद्विरोधपरिहारश्च तत्रैव टीकायाम्। अस्यैव भगवता शङ्कराचार्येण चतुर्थाश्रमं प्रापितस्य सनन्दननामलाभ इति ६–१४ अस्याचार्यमुख्यशिष्यत्वमिति ६–६६ अयं चाचार्यात्त्रिवारं भाष्यमपठदिति ६–६८ तस्यैवाचार्येण गङ्गापारादाहूतस्य गङ्गयाविर्भावितेषु पद्मेषु पादविन्यासपूर्वकमागतस्योपदर्शितप्रभावेण पद्मपादनामलाभ इति ६–७१ अयमेव सुरेश्वराचार्येण ब्रह्मसूत्रभाष्ये विधित्सितं वार्त्तिकमनिच्छद्भिः शिष्यैरर्थितेन गुरुणोक्तो ब्रह्मसूत्रभाष्ये टीकां कृतवान् इति १३–५=७३ अयं च तीर्थयात्रासमये स्वमातुलगृहे निहितस्वकृतपुस्तको ऽसूयया स्वगृहेण सह दाहिते तस्मिन्नाचार्येण सदयं पञ्चपादिकां यथापूर्वानुपूर्वीकां ग्राहित इति १४–१=६६ काश्मीरमण्डले शारदापीठमारुरुक्षत आचार्यस्य हस्तावलम्बं चक्रइति १६–८२ एवमाचार्यप्रत्यासन्नतमो महाप्रभावश्चायम् ॥

अत्रोपलभ्यमानानां बहूनां विषयाणां भामतीरत्नप्रभादौ संवादे ऽपि भगवतः पद्मपादाचार्यस्य भाष्यकारसमानकालीनत्वात्तदुत्तरकालीनत्वाच्चान्येषां व्याख्याकृतां प्रथममनेनैवोहिता उपपत्तयो ऽन्यैः संगृहीता इत्यत्र न

कस्यापि विमतेरवकाशः । नानाशास्त्रीयविषयग्रथनं युक्तिगाढत्वमुपपादनप्रौढिश्चात्र न कस्य सूक्ष्मदृशः श्लाघागोचरः । अस्मादेव प्रबन्धात् स्वस्वमतिसंमानितेषु संगृहीतेष्वपि व्याख्याकृद्भिर्विषयेषु प्रसिद्धेष्वपि सन्ति भूयांसस्तादृशा विषया ये विहायामुं प्रबन्धं नान्यत्रोपलभ्यन्ते तथा विशदरूपेण यत्प्रकाशनफलकोयं चिराद्वेदान्तरसिकैरन्विष्यमाणस्य प्रबन्धरत्नस्य मुद्रणप्रयासो निराकुर्यात् पिष्टपेषणधियं परीक्षकाणाम् । तथा हि । प्रथमे वर्णके अविरोधात्पूर्वं समन्वयप्रदर्शने उपपत्तिस्तमःप्रकाशयोर्विरोधस्य स्वरूपप्रदर्शनं नैमित्तिकस्यापि व्यवहारस्य नैसर्गिकत्वोपपादनमध्यासस्य सद्भावात्पार्थक्येन संभवप्रदर्शने बीजमध्यासस्य स्मृतित्वनिराकरणावसरे स्मरणाभिमानप्रमोषस्यानुपपत्तिप्रदर्शनं निरधिष्ठानभ्रमनिराकरणमात्मनः स्वयंप्रकाशत्वेपि तत्राविद्यासंभवोहमिति प्रतीतेर्देहेन्द्रियाद्यविविक्तात्ममात्रविषयकत्वोपपादनमर्थक्रियाकारित्वरूपसत्तानिरास इत्यादयः । द्वितीयवर्णके धर्मजिज्ञासाप्रतिज्ञानात्पृथक् ब्रह्मजिज्ञासारम्भप्रतिज्ञायामभ्यधिकाशङ्का तन्निराकरणं तत्प्रसङ्गागताश्च विषयाः । तृतीयवर्णके च ब्रह्मज्ञानस्य शास्त्रप्रयोजनत्वे आक्षेपप्रकारस्तन्निराकरणं तत्प्रसङ्गेन वेदाध्ययनविधावर्थावबोधस्याधिकारहेतुत्वाभावे ऽध्ययने प्रवृत्त्यनुपपत्तिशङ्का तस्य सविस्तरं निराकरणमित्यादयः । चतुर्थवर्णके ऽपि आत्मस्वरूपविप्रतिपत्तिनिरूपणावसरे विप्रतिपत्तिबीजानि चेतनस्य भोक्तृत्वानुपपत्तौ युक्तिः शरीरे भोगासंभवोपपादनशैलीत्यादयः । अष्टमवर्णके तृतीयसूत्रोदाहृतश्रुतिव्यतिरिक्तश्रुत्युदाहरणे भाष्यकृतस्तात्पर्यनिरूपणम् । नवमे वर्णके च श्रवणादीनां स्वरूपनिरूपणं स्वरूपपराणामपि वेदान्तानां प्रामाण्ये शास्त्रकारान्तरानुमतिप्रदर्शनमित्यादयो ये व्याख्यान्तरेषु सूचिता अपि प्रतिपादनशैलीवैलक्षण्येन युक्तिभेदैश्चैतद्ग्रन्थैकपर्यालोचनावधारणीया इति निश्चेष्यन्ते सकलमिमं प्रबन्धं सावधानं विचारयद्भिः शास्त्ररसिकैः । संस्कृतप्रौढप्रबन्धसकलतात्पर्यावगमसामर्थ्यविकलानां च विचिन्वतां प्राचीनविद्वदूहितान् विषयान् प्रमोदयिता कृत्स्नार्थावेदनेन नातिचिरात् काशीसंस्कृतपाठशालाप्रधानाध्यक्षश्रीमदार्थरवेनिससाहिबैर्महता परिश्रमेण निर्मितमवतरणम् । तदेवं चिराद्विपश्चिद्भिरन्विष्यमाणः प्रौढतमो ऽयं प्रबन्धः प्रमोदयतु दर्शनदर्शनलालसास्पृहणीयचेतसः सचेतस इति शुभम् ॥

अथ शुद्धिपत्त्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
१०	शीर्षके	अन्तस्त्वेक्तिः	अन्तस्त्वोक्तिः
"	२	निदश	निदर्श
"	११	ज्ञाप्यते नेदं	ज्ञाप्यतो नेदं
११	२४	तस्येत्र	तस्यैव
१२	१४	वीजाङ्करा	वीजाङ्कुरा
"	२३	क्रुटस्य	कूटस्य
१३	१७	लोकिक	लौकिक
"	२०	सम्यक्ज्ञानं	सम्यग्ज्ञानम्
१६	१६	न व	नव
१७	२	किं वृत्तस्य	किंवृत्तस्य
"	२२	रूपत्वे नात्म	रूपत्वेनात्म
२१	४	पद्मपराग	पद्मराग
२२	१६	रस्त्यत्राह	रस्ति । अत्राह
२४	२०	विपयताफल	विषयता पल
२५	शीर्षके	नालादि	नीलादि
२६	१७	दमल्लक्षण	दसल्लक्षण
"	२०	ज्ञानाजन	ज्ञानजन
२७	२१	त्योग	त्येवा
३०	११	अर्थेवि	अथावि
३३	१३	करणरम्भे	करणारम्भे
३४	१६	सर्वर्था	सर्वथा
३५	११	क्षणत्वादा	क्षणत्वादी
३६	३	मिथ्यागो-	मिथ्या गो-
३७	२२	आत्मिकत्व	आत्मैकत्व-
३८	१३	विपर्यय	विपर्य
"	१४	बोध्यते। तत्र	बोध्यते तत्र
३९	११	द्वे	द्वे
४०	३	सारिता ऽविद्या	सारिताऽविद्या
"	१४	रूपप	रूप
४१	शीर्षके	निवृर्त्ति	निवृत्ति
४२	२७	हुकल्पे	ऽकल्पे
४३	११	र्था	र्था–
४४	६	शब्दे-	शब्दो
"	२४	मर्थनकं	मनर्थकं
४६	६	शेपताकृतं	शेषता । कृतं
४८	१	किमपरमम	किमपरम
"	१६	वेदार्थो ऽस्ति	वेदार्थोऽस्ति
"	"	जैमनिना ।	जैमिनिना न्यायान्तर
"	२४	प्रामा	प्रमा

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४९	५	ध्यनय	ध्ययन
५१	५	काय	कार्य
५७	४	त्वासिद्धेः ।	त्वासिद्धेः विधितो
"	२५	उपसर्येरिति	उपसर्पेदिति
५८	५	भवति । यदि	भवति यदि
"	८	ऽपेक्षितत्तव्यः	ऽपेक्षितव्यः
"	१९,२०	तादर्थ्यविगमा·	तादर्थ्याऽवगमा-
"	"	त्रिश्रे	त्रिश्रे
"	२४	जिज्ञायाः	जिज्ञासायाः
५९	३	शब्दापादान	शब्दोपादान
६०	१	ष्ठानान्तर्य	ष्ठानानन्तर्य
"	१३	सर्वषां	सर्वेषां
६२	१	निश्रेयस	निश्श्रेयस
"	२	स्वसंविद्यः	स्वसंवेद्यः
"	८	वैलक्षण्यं	वैलक्षण्यम्
६३	९	चित्वा	चिद्वा
"	१५	अतः शब्दो	अतःशब्दो
६४	१५	त्यस्ययतः	त्यस्य यतः
"	२०	तत्कर्तृकताज्ञान	तत्कर्तृकता ज्ञान
६६	१०	भवति	भवति ।
"	१२	जिज्ञासेति ।	जिज्ञासेति
"	१३	प्रदर्शनार्थं	प्रदर्शनार्थम् ।
६७	५	सितत्वम् ।	सितव्यम् ।
"	"	क्रिया नियतापि	क्रियानियतापि
"	२०	कर्तव्यतामीम	कर्तव्यता मीम
"	८	कस्मात्	कस्मात् ।
६८	६	तदर्था	तदर्थो
६९	१६	पक्षता	पक्षज्ञा
७०	३	निदिष्टेः	निर्दिष्टे
७१	२२	सिद्धस्य	सिद्धस्य ।
"	२५	स्तीति	स्मीति
७४	२२	हं विपय	हंविषय
७५	१७	विचार्य-	विचार्य
७७	८	मुपचक्रम	मुपक्रम
"	१४	अनेन कर्तृ	अनेककर्तृ
७८	११	जन्मे	जन्म
८१	१	विपया	विषया
"	१६	निर्णये	निर्णय-
८२	४	कल्पम् प्रत्यय	कल्पप्रत्यय

शुद्धिपत्त्रम् ।

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
"	८	त्वाच्च	त्वाच्च ।
८३	१६	घस्तुत्य	वस्तुन्य
"	१८	र्थाबोध	र्थबोध
"	२०	इत्येत	इत्यत
८४	२०	दानि	दीनि
८५	१	सिद्धर्थ	सिद्धार्थ
८७	२३	मानम् ।	मानम्
८८	३	पर्ययव	पर्यव
"	६	विधायत	विधीयत
"	१०	गतर्म	गतकर्म
८६	८	क्रियाते	क्रियातो
"	"	त्प्रीति	प्रीति
"	१६	नित्यत्व	नित्यत्वे
८६	१८	न वर्त्तन्त	नावर्तन्त
"	२४	दशन	दर्शन
६०	८	मोक्षंन	मोक्षं न
"	२५	संपादादिरूपेहा	संपदादिरूपे ही
६१	१	नरुप	निरुप
"	६	पत्यु	पत्यु
"	७	ततज्	तज्
"	"	तद धि	तदधि
"	१२	नरा	निरा
"	१६	भेदे	भेदो
"	२४	दिना ।	दिना
६२	१४	व्यांक्त	व्यक्ति
"	२४	तद् द्वारेण	तद्द्वारेण
६४	६	त्यर्हं	त्यर्हं
"	१२	तया प्र	तयाप्र
"	१८	त्तरम् ।	त्तरम्
६५	५	शून्ये	शून्ये
६६	१३	तद्भ	तद्भू
६७	२	ऽस्ति क्रिया	ऽस्तिक्रिया
"	३	र्भवन्तिपर	र्भवन्तीपर
"	"	मत	मतं
"	२१	दिवनञ	दिव नञ
६६	६	वात्तत्	वात्तत्
"	१५	दादिद्धि	दादिवृद्धि
१००	४	अतः स ।	अतः स

इति ।

वर्णक्रमानुसारिसूचीपत्रम् ।

पृष्ठे पङ्क्तौ

पञ्चपादिका

अनाद्यानन्दकूटस्थज्ञानानन्तसदात्मने ।
अभूतद्वैतजालाय साक्षिणे ब्रह्मणे नमः ॥ १ ॥

नमः श्रुतिशिरःपद्मषण्डमार्त्तण्डमूर्त्तये ।
बादरायणसञ्ज्ञाय मुनये शमवेश्मने ॥ २ ॥

नमाम्यभोगिपरिवारसम्पदं निरस्तभूतिमनुमार्द्धविग्रहम् ।
अनुग्रमुन्मृदितकाललाञ्छनं विना विनायकमपूर्वशङ्करम् ॥ ३ ॥

यद्वक्त्रमानससरःप्रतिलब्धजन्मभाष्यारविन्दमकरन्दरसं पिबन्ति ।
प्रत्याशमुन्मुखविनीतविनेयभृङ्गास्तान् भाष्यवित्तकगुरून् प्रणमामि मूर्द्ध्ना ॥४॥

पदादिवृन्तभारेण गरिमाणं बिभर्त्ति यत् ।
भाष्यं प्रसन्नगम्भीरं तद्व्याख्यां श्रद्धया ऽऽरभे ॥ ५ ॥

युष्मदस्मत्प्रत्ययगोचरयोरित्याद्यहमिदं ममेदमिति नैसर्गिकोऽयं लोकव्यवहार इत्यन्तं भाष्यम् अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इत्यनेन भाष्येण पर्यवस्यच्छास्त्रस्य विषयः प्रयोजनं चार्थात् प्रथमसूत्रेण * सूचिते इति प्रतिपादयति । एतच्च तस्माद् ब्रह्म जिज्ञासितव्यमित्यादिभाष्ये स्पष्टतरं प्रदर्शयिष्यामः ।

अत्राह । यद्येवमेतावदेवास्तु भाष्यम् अस्यानर्थहेतोः प्रहाणायात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति † तत्रानर्थहेतोः प्रहाणाय इति प्रयोजननिर्देशः आत्मैकत्वविद्याप्रतिपत्तय इति विषयप्रदर्शनम् किमनेन युष्मदस्मदित्यादिनाऽहं मनुष्य इति देहेन्द्रियादिष्वहंममेदमित्यभिमानात्मकस्य लोकव्यवहारस्य 'अविद्यानि ‡ मित्तत्वप्रदर्शनपरेण भाष्येण । उच्यते । ब्रह्मज्ञानं हि सूचितमनर्थहेतुनिबर्हणम् । अनर्थश्च प्रमातृताप्रमुखं कर्तृत्वभोक्तृत्वम् तद्यदि वस्तुकृतम् न ज्ञानेन निबर्हणीयम् यतो ज्ञान-

---

* सूत्रिते इति २ पु० ।
† अत्रेति ३ पु० ।
‡ निमित्तत्वेत्युपकल्पितमास्ते २ पु० ।

मज्ञानस्यैव निवर्त्तकम् तद्यदि कर्तृत्वभोक्तृत्वमज्ञानहेतुकं स्यात्ततो ब्रह्मज्ञानमनर्थहेतुनिबर्हणमुच्यमानमुपपद्येत *। तेन सूत्रकारेणैव ब्रह्मज्ञानमनर्थहेतुनिबर्हणं सूचयता अविद्याहेतुकं † कर्तृत्वभोक्तृत्वं प्रदर्शितं भवति। अतस्तत्प्रदर्शनद्वारेण सूत्रार्थोपपत्त्युपयोगितया सकलतन्त्रोपोद्घातः प्रयोजनमस्य भाष्यस्य। तथा चास्य शास्त्रस्य ऐदम्पर्य्यं सुखैकतानसदात्मककूटस्थचैतन्यैकरसता संसारित्वाभिमतस्यात्मनः पारमार्थिकं स्वरूपमिति वेदान्ताः पर्यवस्यन्तीति प्रतिपादितम्। तच्चाहं कर्त्ता सुखी दुःखीति प्रत्यक्षाभिमतेन अबाधितकल्पेनावभासेन विरुद्ध्यते। अतस्तद्विरोधपरिहारार्थं ब्रह्मस्वरूपविपरीतरूपमविद्यानिर्मितमात्मन इति यावन्न प्रतिपाद्यते ‡ तावज्जरद्गवादिवाक्यवदनर्थकं प्रतिभाति § अतस्तन्निवृत्त्यर्थमविद्याविलसितमब्रह्मस्व ‖ रूपत्व¶मात्मन इति प्रतिपादयितव्यम्। वक्ष्यति चैतदविरोधलक्षणे जीवप्रक्रियायां सूत्रकारस्तद्गुणसारत्वादित्यादिना।

यद्येवमेतदेव प्रथममस्तु। मैवम् अर्थविशेषोपपत्तेः। अर्थविशेषे हि समन्वये प्रदर्शिते तद्विरोधाशङ्कायां तन्निराकरणमुपपद्यते। अप्र ** दर्शिते पुनः समन्वयविशेषे तद्विरोधाशङ्का तन्निराकरणञ्च निर्विषयं स्यात्। भाष्यकारस्तु तत्सिद्धमेवादिसूत्रेण सामर्थ्यबलेन †† सूचितं सुखप्रतिपत्त्यर्थं वर्णयति इति न दोषः॥

ननु च ग्रन्थकरणादिकार्यारम्भे कार्यानुरूपमिष्टदेवतापूजानमस्कारेण बुद्धिसन्निधापिताथवृद्ध्यादिशब्दैर्दध्यादिदर्शनेन वा कृतमङ्गलाः शिष्टाः ‡‡ प्रवर्तन्ते शिष्टाचारश्च नः प्रमाणम्। प्रसिद्धं च मङ्गलाचरणस्य विघ्नोपशमनं प्रयोजनम्। महति च निःश्रेयसप्रयोजने §§ ग्रन्थमारभमाणस्य विघ्नबाहुल्यं सम्भाव्यते प्रसिद्धञ्च श्रेयांसि बहुविघ्नानीति। विज्ञायते ‖‖ च तस्माद्देषां तन्न प्रियं यदेतन्मनुष्या विद्युरिति येषां च यन्न प्रियं ते तद्विघ्नन्तीति प्रसिद्धं लोके। तत्कथमुल्लङ्घ्य शिष्टाचारमकृतमङ्गल एव ¶¶ विस्रब्धं भाष्यकारः प्रववृते।

---

* उपपद्यते–इति २ पु॰। † कप्रत्ययो नास्ति १ पु॰। ‡ प्रदर्श्यते–इति २ पु॰।
§ अतः शब्दो नास्ति २ पु॰। ‖ स्वशब्दो नास्ति २ पु॰। स्वरूपमिति ३ पु॰।
¶ त्वप्रत्ययोनास्ति १ पु॰। ** प्रशब्दो नास्ति २ पु॰। †† सूत्रितमिति ३ पु॰।
‡‡ प्रवर्त्तन्ते शिष्टा इति १ पु॰। §§ मोक्षरूपप्रयोजननिमित्तमित्यर्थः।
‖‖ तस्मादित्यादिश्रुतितोऽपि विशेषेण ज्ञायते न केवलं लोकत एव संभाव्यत इति भावः।
¶¶ विश्रब्धमिति २ पु॰।

अत्र उच्यते । युष्मदस्मदित्यादि तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिरित्यन्तमेव * भाष्यम् । अस्य चायमर्थः सर्वोपप्लवरहितो विज्ञानघनः प्रत्यगर्थ इति तत्कथञ्चन परमार्थत एवम्भूते वस्तुनि रूपान्तरवदवभासो मिथ्येति कथयितुं तदन्यपरादेव भाष्यवाक्यान्निरस्तसमस्तोपप्लवं चैतन्यैकतानमात्मानं प्रतिपद्यमानस्य कुतो विज्ञोपप्लवसम्भवः । तस्मादग्रणीः शिष्टाचारप्रतिपालने † भाष्यकारः ‡ ॥ विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायामिति ।

कोऽयं विरोधः कीदृशो वा इतरेतरभावोऽभिप्रेतो यस्यानुपपत्तेस्तमःप्रकाशवदिति निदर्शनम् । यदि तावत् सहानवस्थानलक्षणो विरोधः ततः § प्रकाशाभावे तमसो भावानुपपत्तिः । तदसत् । दृश्यते हि मन्दप्रदीपे वेश्मन्यऽस्पष्टं रूपदर्शनमितरत्र च स्पष्टम् । तेन ज्ञायते मन्दप्रदीपे वेश्मनि ‖ तमसोऽपीषदनुवृत्तिरिति । तथा छायायामपि औष्ण्यं तारतम्येनोपलभ्यमानम् आतपस्यापि तत्रावस्थानं सूचयति । एतेन शीतोष्णयोरपि युगपदुपलब्धेः सहावस्थानमुक्तं वेदितव्यम् । उच्यते । परस्परानात्मतालक्षणो विरोधः । न जातिव्यक्त्योरिव परमार्थतः परस्परसम्भेदः सम्भवतीत्यर्थः । तेन इतरेतरभावस्य इतरेतरसम्भेदात्मकत्वस्यानुपपत्तिः । कथम् । स्वतस्तावद्विषयिणश्चिदेकरसत्वान्न युष्मदंशसम्भवः । अपरिणामित्वान्निरञ्जनत्वाच्च न परतः । विषयस्यापि न स्वतश्चित्सम्भवः समत्वाद् विषयत्वहानेः । न परतश्चितेरप्रतिसङ्क्रमत्वात् । तद्धर्माणामपि सुतरामिति । एवं स्थिते स्वाश्रयमतिरिच्य धर्माणामन्यत्र भावानुपपत्तिः सुप्रसिद्धा इति दर्शयति । इतिशब्दो हेत्वर्थः । यस्मादेवमुक्तेन न्यायेनेतरेतरभावासम्भवो ऽतो ऽस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके इत्यस्मत्प्रत्यये योऽनिदमंशश्चिदेकरसः तस्मिंस्तद्बलनिर्भासिततया लक्षणतो युष्मदर्थस्य मनुष्याभिमानस्य सम्भेद इवावभासः स एव अध्यासः । तद्धर्माणाञ्चेति । यद्यपि विषयाध्यासे तद्धर्माणामप्यर्थसिद्धो ऽध्यासस्तथापि विनापि विषयाध्यासेन तद्धर्माध्यासो बधिरादिषु श्रोत्रादिधर्मेषु

---

* मङ्गलवाक्यमितिशेषः मङ्गलत्वमेवोपपादयति अस्येत्यादिना ।

† परिपालनइति २ पु· ।

‡ भगवान्भाष्यकार इति ३ पु· कृतमस्ति ।

§ प्रकाशस्येति २ पु· ।

‖ वेश्मनीति ३ पु· नास्ति ।

विद्यते इति पृथग्धर्मग्रहणम् । तद्विपर्य्ययेण विषयिणस्तद्धर्माणाञ्चेति । चैतन्यस्य तद्धर्माणां चेत्यर्थः । ननु विषयिणश्चिदेकरसस्य कुतो धर्मा ये विषयेऽध्यस्येरन् । उच्यते । आनन्दो विषयानुभवो नित्यत्वमिति सन्ति धर्माः अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते इति न दोषः ।

अध्यासो नाम अतद्रूपे तद्रूपावभासः स मिथ्येति भवितुं युक्तमिति । मिथ्याशब्दो द्व्यर्थो ऽपह्नववचनो ऽनिर्वचनीयतावचनश्च । अत्र* अयमपह्नववचनः मिथ्येति भवितुं युक्तम् अभाव एवाध्यासस्य युक्त इत्यर्थः । यद्यप्येवं तथापि नैसर्गिकः प्रत्यक्चैतन्यसत्तामात्रानुबन्धी अयम् युष्मदस्मदोरितरेतराध्यासात्मको ऽहमिदं ममेदमिति लोकव्यवहारः । तेन यथास्मदर्थस्य सद्भावो नोपालम्भमर्हति एवमध्यासस्यापि इत्यभिप्रायः† । लोक इति मनुष्यो ऽहमित्यभिमन्यमानः प्राणिनिकाय उच्यते । व्यवहरणं व्यवहारः लोक इति व्यवहारो लोकव्यवहारः मनुष्योऽहमित्यभिमान इत्यर्थः । सत्यानृते मिथुनीकृत्येति । सत्यमनिदं चैतन्यम् अनृतं युष्मदर्थः स्वरूपतोप्यध्यस्तस्वरूपत्वात् । अध्यस्य मिथुनीकृत्येति च क्त्वाप्रत्ययो न पूर्वकालत्वमन्यत्वं च लोकव्यवहारादङ्गीकृत्य प्रयुक्तः भुक्त्वा व्रजतीतिवत्क्रियान्तरानुपादानात् । अध्यस्य नैसर्गिकोऽयं लोकव्यवहार इति स्वरूपमात्रपर्यवसानात् । उपसंहारे चै‡वमनादिरनन्तो नैसर्गिको ऽध्यास इति तावन्मात्रोपसंहारात् । अतश्चैतन्यं पुरुषस्य स्वरूपमितिवद्व्यपदेशमात्रं द्रष्टव्यम् । मिथ्याज्ञाननिमित्त इति । मिथ्या च तदज्ञानं च मिथ्याज्ञानम् । मिथ्येति अनिर्वचनीयता उच्यते अज्ञानमिति च जडात्मिका ऽविद्याशक्तिः ज्ञानपर्युदासेनोच्यते । तन्निमित्तः तदुपादान इत्यर्थः ।

कथं पुन§र्नैमित्तिकव्यवहारस्य नैसर्गिकत्वम् । अत्रोच्यते । अवश्यमेषा अविद्याशक्तिर्बाह्याध्यात्मिकेषु वस्तुषु तत्स्वरूपसत्तामात्रानुबन्धिनी अभ्युपगन्तव्या अन्यथा मिथ्यार्थावभासानुपपत्तेः । सा च न जडेषु वस्तुषु तत्स्वरूपावभासं प्रतिबध्नाति प्रमाणवैकल्यादेव तदग्रहणसिद्धेः । रजतप्रति-

---

* अत्रेति पुस्तकान्तरे नास्ति । † इत्यभिप्राये लोक इतीति ३ पु॰ ।

‡ चैवमयमनादिरिति २ पु॰ ।

§ नैमित्तिकस्य लोकव्यवहारस्येति २, ३ पु॰ पाठः ।

भासात् प्रागूर्द्धं च सत्यामपि तस्यां स्वरूपग्रहणदर्शनात् । अतस्तत्र * रूपान्तरावभासहेतुरेव केवलम् । प्रत्यगात्मनि तु चितिस्वभावत्वात्स्वयम्प्रकाशमाने ब्रह्मस्वरूपानवभासस्य अनन्यनिमित्तत्वात् तद्गतनिसर्गसिद्धाऽविद्याशक्तिप्रतिबन्धादेव तस्य अनवभासः । अतः सा प्रत्यक्चिति ब्रह्मस्वरूपावभासं प्रतिबध्नाति अहङ्कारादयतद्रूपप्रतिभासनिमित्तं च भवति सुषुप्त्यादौ चाहङ्कारादिविक्षेपसंस्कारमात्रशेषं स्थित्वा पुनरुद्भवतीति । अतो नैसर्गिकोऽप्यहङ्कारममकारात्मको मनुष्याद्यभिमानो लोकव्यवहारो मिथ्याज्ञाननिमित्त उच्यते न पुनरागन्तुकत्वेन । तेन † नैसर्गिकत्वं नैमित्तिकत्वेन न विरुध्यते ।

‡ अन्योन्यधर्मांश्चेति । पृथग्धर्मग्रहणं धर्ममात्रस्यापि कस्यचिदध्यास इति दर्शयितुम् । इतरेतराविवेकेनेति । एकतापत्त्यैवेत्यर्थः । कस्य धर्मिणः कथं कुत्र § चाध्यासो धर्ममात्रस्य वा क्वाध्यास इति भाष्यकारः स्वयमेव वक्ष्यति । अहमिदं ममेदमित्यध्यासस्य स्वरूपं दर्शयति । अहमिति तावत्प्रथमोऽध्यासः । ननु अहमिति निरंशं चैतन्यमात्रं प्रतिभासते नांशान्तरमध्यस्तमनध्यस्तं वा । यथा अध्यस्तांशान्तर्भावस्तथा दर्शयिष्यामः । ननु इदमित्यहङ्कर्तुर्भोगसाधनं ‖ कार्यकरणसङ्घातो ऽवभासते ममेदमिति चाहङ्कर्त्रा स्वत्वेन तस्य सम्बन्धः तत्र न किञ्चिदध्यस्तमिव दृश्यते । उच्यते । यदैवाहङ्कर्ता अध्यासात्मकस्तदैव तदुपकरणस्यापि तदात्मकत्वसिद्धिः । न हि स्वप्नावाप्तराज्याभिषेकस्य माहेन्द्रजालनिर्मितस्य वा राज्ञो राज्योपकरणं परमार्थसद्भवति । एवमहङ्कर्तृत्वप्रमुखः क्रियाकारकफलात्मको लोकव्यवहारो ऽध्यस्तो नित्यशुद्धबुद्धमुक्तस्वभावे आत्मनि अतस्तादृग्ब्रह्मात्मानुभवपर्यन्ताज्ज्ञानादनर्थहेतोरध्यासस्य निवृत्तिरुपपद्यते इति तदर्थविषयवेदान्तमीमांसारम्भ उपपद्यते ।

आह कोऽयमध्यासो नामे ¶ त्याद्यारभ्य अध्याससिद्धिपरं भाष्यम् । तत्रापि कथम्पुनरविद्यावद्विषयाणीत्यतः प्रागध्यासस्वरूपतत्सम्भावनाय

---

* स्वरूपेति पुस्तकान्तरे ।

† नैसर्गिकनैमित्तिकत्वे न विरुध्येते इति पुस्तकान्तरपाठः ।

‡ अन्योन्यं धर्मांश्चेतीति ३ पु० ।

§ वाध्यास इति पु० ।

‖ कार्यकारणसंघातइति २ पु० ।

¶ इत्याद्यध्यासेति पु० ।

६ अध्याससंभावनास्वतन्त्रोक्तियुक्तिः । अध्यासस्य स्मृतित्वाभावनिरूपणम् ।

तदादि * तत्सद्भावनिर्णयार्थमिति विभागः । यद्येवं † तत्स्वरूपतत्सम्भावनोपन्यासः पृथग्न कर्त्तव्यः । न हि अनिर्ज्ञातरूपमसम्भाव्यमानं च निर्णीयते चेति दुःसम्पादं विशेषतोऽध्यक्षानुभवनिर्णये । उच्यते । न देहे ‡ न्द्रियादिष्वहंममाभिमानवत एव प्रमातृत्वप्रदर्शनमात्रेण तस्य अध्यासात्मकता सिद्ध्यति । तत्कस्य हेतोः । लोके शुक्तिरजतद्विचन्द्रादिवदध्यासानुभवाभावात् । बाधे हि सति स भवति नेह स विद्यते । तस्मादध्यासस्य लक्षणमभिधाय तल्लक्षणव्याप्तस्य सद्भावः कथनीयः ।

नन्वेवमपि तल्लक्षणस्य वस्तुनः सद्भावमात्रमिह कथनीयम् । न हि यत्र यस्य सद्भावः प्रमाणतः प्रतिपन्नस्तत्रैव तस्य असम्भावनाशङ्का येन तद्विनिवृत्तये तत्सम्भावनाऽपरा कथ्येत । सत्यमेवम् । विषयविशेषस्तु प्रयत्नेन अन्विच्छद्भिरपि अनुपलभ्यमानकारणदोषे विज्ञाने ऽवभासमानो ऽपि पूर्वप्रवृत्तेन सकललोकव्यापिना निश्चितेन प्रमाणेनासम्भाव्यमानतया अपोद्यमानो दृश्यते तद्यथौत्पातिकः सवितरि § शुषिर्यथा वा माहेन्द्रजालकुशलेन प्रासादादिर्निगरणमेवमविषये ऽसङ्गे केनचिदपि गुणादिना अध्यासहेतुना रहिते निष्कलङ्कचैतन्यतया अन्यगतस्याप्यध्यासस्यापनोदनसमर्थेऽध्यासावगमोऽविभाव्यमानकारण ‖ दोषो विभ्रम इत्याशङ्क्येत तन्मा शङ्कीति सद्भावातिरेकेण सम्भवोऽपि पृथक् कथनीयः । तदुच्यते । आह कोऽयमध्यासो नामेति किंवृत्तस्य प्रश्ने ¶ आक्षेपे च प्रयोगदर्शनादुभयस्य चेह सम्भवात् तन्त्रेण वाक्यमुच्चरितम्** । तत्रापि †† प्रथमं प्रश्नस्य प्रतिवचनं स्वरूपमाख्याय पुन ‡‡ स्तस्यैव सम्भवमाक्षिप्य प्रतिविधत्ते । तत्रैवम्भूते विषये श्रोतॄणां सुखप्रबोधार्थं व्याचक्षाणाः प्रतिवादिनं तत्रस्थमिव समुत्थाप्य तेनाक्षिप्तमनेन पृष्टमिति मत्वा प्रत्युक्तम् पुनरसौ स्वाभिप्रायं विवृणोतीति आक्षेपमवतार्य प्रतिविधानं प्रतिपद्यन्ते । सर्वत्रैवंविधे ग्रन्थसन्निवेशे एष एव व्याख्याप्रकारः ।

स्मृतिरूपः परत्र पूर्वदृष्टावभास इति प्रश्नवाक्यस्थितमध्यासमुद्दिश्य लक्षणमभिधीयते । तत्र परत्रेत्युक्तेऽर्थात्परस्य अवभासमानता सिद्धा । तस्य विशेषणं स्मृतिरूपत्वम् । स्मर्यते इति स्मृतिः असञ्ज्ञायामप्यकर्त्तरि कारके

---

* तदादि सर्वं तदिति पुस्तकान्तरे । † तद्रूपेति पु॰ । ‡ न देहादिष्विति ३ पु॰ ।
§ सुषिरिति २ पु॰ । ‖ दोषोऽपीति पु॰ । ¶ प्रश्ने क्षेपे चेति पु॰ ।
** उच्चारितमिति १ पु॰ । †† प्रथममिति पुस्तकान्तरे नास्ति । ‡‡ तस्येहेति २ पु॰ ।

घञादीनां प्रयोगदर्शनात् । स्मर्यमाणरूपमिव रूपमस्य न पुनः स्मर्यत एव स्पष्टं पुरोऽवस्थितत्वावभासनात् * । पूर्वदृष्टावभास इत्युपपत्तिः स्मृतिरूपत्वे । न हि पूर्वम † दृष्टरजतस्य ‡ शुक्तिसम्प्रयोगे रजतमवभासते । यतो ऽर्थात्तद्विषयस्य अवभासस्यापि इदमेव § लक्षणमुक्तं भवति । कथम् । तदुच्यते । स्मृते रूपमिव रूपमस्य न पुनः स्मृतिरेव पूर्वप्रमाणविषयविशेषस्य तथानवभासकत्वात् । कथं पुनः स्मृतिरूपत्वम् । पूर्वप्रमाणद्वारसमुत्पत्त्वात् । न हि असम्प्रयुक्तावभासिनः पूर्वप्रवृत्ततद्विषयप्रमाणद्वारसमुत्पत्त्वमन्तरेण समुद्भवः सम्भवति ।

अपर आह ननु अन्यसम्प्रयुक्ते चक्षुषि अन्यविषयज्ञानं ‖ स्मृतिरेव । प्रमोषस्तु स्मरणाभिमानस्येन्द्रियादीनां ज्ञानकारणानां केनचिदेव ¶ दोषविशेषेण कस्यचिदेवार्थविशेषस्य स्मृतिसमुद्बोधः क्रियते सम्प्रयुक्तस्य च दोषेण विशेषप्रतिभासहेतुत्वं करणस्य विहन्यते । तेन दर्शनस्मरणयोर्निरन्तरोत्पन्नयोः ** करणदोषादेव विवेकानवधारणाद् दूरस्थयोरिव वनस्पत्योरनुत्पन्ने एवैक †† त्वावभास उत्पन्नभ्रमः । ननु अनास्वादिततिक्तरसस्यापि बालकस्य ‡‡ पित्तदोषान्मधुरे तिक्तावभासः कथं स्मरणं स्यात् । उच्यते । जन्मान्तरानुभूतत्वात् । अन्यथाऽननुभूतत्वाविशेषे ऽत्यन्तमसन्नेव कश्चित्सप्तमो रसः किमिति नावभासेत । तस्मात्पित्तमेव मधुराग्रहणे तिक्तस्मृतौ तत्प्रमोषे च हेतुः । कार्यगम्यत्वाद्धेतुभावस्य । एतेन अन्यसम्प्रयोगेऽन्य §§ विषयस्य ज्ञानस्य स्मृतित्वतत्प्रमोषौ सर्वच व्याख्यातौ द्रष्टव्यौ ।

उच्यते । कोऽयं स्मरणाभिमानो नाम । न तावत् ज्ञानानुविद्धतया ग्रहणम् । न ह्यतिवृत्तस्य ज्ञानस्य ग्राह्यविशेषणतया विषयभावः । तस्माच्छुद्धमेवार्थं स्मृतिरवभासयति न ज्ञानानुविद्धम् । तथा च पदात्पदार्थस्मृतौ न दृष्टो ज्ञानसम्भेदः ज्ञानस्यापि शब्दार्थत्वप्रसङ्गात् । तथेष्टभूभागविषया स्मृतिः स सेव्य इति ‖‖ ग्राह्यमाचस्था न ज्ञानपरामर्शिनी । अपि च । भूयस्यो

---

* अवभासादिति २ पु० । † पुंस इति शेषः । ‡ शुक्तिकेति पु० ।
§ लक्षणमित्युक्तमिति २ पु० । ‖ अन्यविषयं विज्ञानमिति २ पु० ।
¶ एवमिति २ पु० । ** कारणेति २ पु० । †† अनुत्पन्ने एकैकत्वावभास इति ३ पु० ।
‡‡ कप्रत्ययो नास्ति २ पु० । §§ अन्यविषयज्ञानस्य स्मृतितत्प्रमोषाविति १, ३ पु० ।
‖‖ ग्राह्यमात्रावस्था न ज्ञानपरामर्शिनी इति क्वचित् ।

ज्ञानपरामर्शशून्या एव स्मृतय: । नापि स्वगतो ज्ञानस्य स्मरणाभिमानो * नाम रूपभेदो ऽवभासते नहि नित्यानुमेयं ज्ञानमन्यद्वा वस्तु स्वत एव † रूपसम्भिन्नं गृह्यते । अत एवोक्तमनाकारामेव बुद्धिम ‡ नुमिमीमह इति । अनाकारामनिरूपिताकारविशेषामनिर्दिष्टस्वलक्षणामित्यर्थ: । अतो न स्वत: स्मरणाभिमानात्मकता । नापि ग्राह्यविशेषनिमित्त: स्मरणाभिमान: प्रमाणग्राह्यस्यैव अविकलावधिकस्य गृह्यमाणत्वान्नापि फलविशेषनिमित्त: प्रमाणफलविषयमात्रावच्छिन्नफलत्वात् । य: पुन: क्व चित्कदा चिदनुभूतचरे स्मरामि इत्यनुवेध: स वाचकशब्द § संयोजनानिमित्तो यथा सास्नादिमदाकृतौ गौरित्यभिमान: । तस्मात्पूर्वप्रमाणसंस्कारसमुत्थतया तद्विषयावभासित्वमात्रं स्मृते: । न पुन: प्रतीतितो ऽर्थतो वा अधिकोंऽशोऽस्ति यस्य दोषनिमित्त: प्रमोष: परिकल्प्येत । न चेह पूर्वप्रमाणविषयावभासित्वमस्ति पुरोऽवस्थितार्थप्रतिभासनादित्युक्तम् । अतो नान्यसम्प्रयोगे ऽन्यविषयज्ञानं ‖ स्मृति: किन्त्वध्यास: ।

नन्वेवं सति वैपरीत्यमापद्यते रजतमवभासते ¶ शुक्तिरालम्बनमिति । नैतत् संविदनुसारिणामनुरूपम् । ननु शुक्ते: स्वरूपेणाप्य ** वभासने †† संवित्प्रयुक्तव्यवहारयोग्यत्वमेवालम्बनार्थ: सैवेदानीं रजतव्यवहारयोग्या प्रतिभासते तत्र किमित्यालम्बनं न स्यात् । अथ तथारूपावभासनं शुक्ते: पारमार्थिकमुताहो न । यदि पारमार्थिकं नेदं रजतमिति बाधो न स्यात् नेयं शुक्तिरिति यथा । भवति च बाध: ‡‡ । तस्मान्नैष पक्ष: प्रमाणवान् । अथ शुक्तेरेव दोषनिमित्तो रजतरूप: परिणाम §§ उच्यते । एतदप्यसारम् । न हि क्षीरपरिणामे दधनि नेदं दधि इति बाधो दृष्ट: । नापि क्षीरमिदमिति प्रतीति: । इह तु तदुभयं दृश्यते । किञ्च रजतरूपेण चेत्परिणता शुक्ति: क्षीरमिव दधिरूपेण तदा दोषापगमेऽपि तथैव अवतिष्ठेत । ननु कमलमुकुल ‖‖ विकास ¶¶ परिणामहेतो: सावित्रस्य तेजस: स्थितिहेतुत्वमपि दृष्टं तदपगमे पुन-

---

* स्मरणाभिमानात्मको नामेति २ पु· । † स्वशब्दो ऽत्राधिक: २ पु· ।
‡ अनुमिमीमामह इति उपकल्पितमास्ते २ पु· । § शब्देति नास्ति २ पु· ।
‖ अन्यविषयमिति २ पु· । ¶ शुक्तिकालम्बनमिति पाठान्तरम् ।
** अवभासमान इति १ पु· । †† वित्प्रयुक्तेति नास्ति २ ३ पु· ।
‡‡ बाध इति नास्ति २, ३ पु· । §§ इत्युच्यतेति २ पु· । ‖‖ कमलमुकुलस्य विकासेति ३ पु· । ¶¶ परिणतीति २, ३ पु· ।

मुकुलीभावदर्शनात्तथेहापि स्यात् । न । तथा सति तद्वदेव पूर्वावस्थापरिणामबुद्धिः स्यात् न बाधप्रतीतिः स्यात् * । अथ पुनर्दुष्टकारणजन्यायाः प्रतीतेरेव रजतोत्पाद इति मन्येत । एतदपि † न सम्यगिव । कथम् । यस्याः प्रतीतेस्तदुत्पादस्तस्यास्तावन्न तदालम्बनं पूर्वोत्तरभावेन भिन्नकालत्वात् । न प्रतीत्यन्तरस्य पुरुषान्तरप्रतीतेरपि तत्प्रसङ्गात् । ननु किमिति पुरुषान्तरप्रतीतेरपि तत्प्रसङ्गो ‡ दुष्टसामग्रीजन्मनो हि प्रतीतिस्तदालम्बनम् । मैवम् । प्रतीत्यन्तरस्यापि तद्विधस्य रजतान्तरोत्पादनेनैव उपयुक्तत्वात् प्रथमप्रत्ययवत् । अतोऽनुत्पन्नसममेव स्यात् । तदेवं पारिशेष्यात्स्मृतिप्रमोष एवावतिष्ठेत § ।

ननु स्मृतेः प्रमोषो न सम्भवति इत्युक्तम् । तथा च तन्त्रान्तरीया आहुः ‖ अनुभूतविषयाऽसम्प्रमोषा स्मृतिरिति । का तर्हि ¶ गतिः शुक्तिसम्प्रयोगे रजतावभासस्य । उच्यते । नेन्द्रियजज्ञानात्संस्कारजं स्मरणं पृथगेव स्मरणाभिमानशून्यं समुत्पन्नं किन्तु एकमेव संस्कारसहितादिन्द्रियात् । कथमेतत् । उच्यते । कारणदोषः कार्यविशेषे तस्य शक्तिं निरुन्धन्नेव संस्कारविशेषमप्युद्बोधयति । कार्यगम्यत्वात्कारणदोषशक्तेः । अतः संस्कारदुष्टकारणसंवलितैका सामग्री । सा चैकमेव ज्ञानमेकफलं जनयति । तस्य च दोषोत्थापितसंस्कारविशेषसहितसामग्रीसमुत्पन्नज्ञानस्योचितमेव शुक्तिगतमिथ्यारजतमालम्बनमवभासते । तेन मिथ्यालम्बनं ज्ञानं मिथ्याज्ञानं न स्वतो ज्ञानस्य मिथ्यात्वमस्ति बाधाभावात् । भिन्नजातीयज्ञानहेतुसामग्र्योः ** कथमेकज्ञानोत्पादनमिति चेन्नैष दोषः । दृश्यते हि लिङ्गज्ञा †† नसंस्कारयोः सम्भूय लिङ्गिज्ञानोत्पादनं प्रत्यभिज्ञानोत्पादनञ्च अक्षसंस्कारयोरुभयचापि स्मृतिगर्भमेकमेव प्रमाणज्ञानम् । संस्कारानुद्बोधे तदभावात् । तस्माल्लिङ्गदर्शनमेव सम्बन्धज्ञानसंस्कारमुद्बोध्य तत्सहितं लिङ्गिज्ञानं जनयतीति

---

* स्यादिति नास्ति २, ३ पु० ।   † तदपीति २ पु० ।

‡ नदिति नास्ति २ पु० ।   § अवतिष्ठते-इति २, ३ पु० ।

‖ अनुभूतविषयासम्प्रमोषः स्मृतिरिति पातञ्जलसूत्रपाठः, एवमनुभूतौ यौ विषयौ वृत्तितदारूढार्थौ तयोरसम्प्रमोषो ऽस्तेयमनपहरणं धर्मधर्म्यभेदात्तद्वती तदुभयविषयिणीति यावदिति तद्वार्त्तिकञ्च । परन्तु त्रिष्वपि एतत्पुस्तकेषु अनुभूतविषयासम्प्रमोषा-इति पाठस्तत्रानुभूतविषययोरसम्प्रमोषो यस्यामिति बहुव्रीहिविशेषणं द्रष्टव्यम् ।

¶ तर्हिस्थाने पुनरिति २ पु० ।   ** सामग्र्याः कथमेकज्ञानोत्पादकत्वमिति २ पु० ।

†† ज्ञानेति २ पु० नास्ति ।

वक्तव्यम् । अयमेव च न्यायः प्रत्यभिज्ञाने * ऽपि । न पुनर्ज्ञानद्वये प्रमाणमस्ति । तथा भिन्नजातीयज्ञानहेतुभ्यो नीलादिभ्य एकं चित्रज्ञानं निदर्शनीयम् । तत्र लैङ्गिकज्ञानप्रत्यभिज्ञाचित्रज्ञानानामदुष्टकारणारब्धत्वाद् यथार्थमेवावभासः इह तु कारणदोषादतथाभूतार्थावभास इति विशेषः । एवञ्च सति नानुभवविरोधः प्रतिभासमानस्य रजतस्यैवावलम्बनत्वात् । अतो मायामयं रजतम् । अथ पुनः पारमार्थिकं स्यात् सर्वैरेव † गृह्येत । यतो न हि पारमार्थिकं रजतं कारणदोषं स्वज्ञानोत्पत्तावपेक्षते । यद्यपेक्षेत तदा ‡ तदभावे न तत्र ज्ञानोत्पत्तिरालोकाभाव इव रूपे । मायामात्रत्वे तु मन्त्राद्युपहतचक्षुष इव दोषोपह § तज्ञानकारणा एव पश्यन्तीति युक्तम् । किञ्च । नेदं रजतमिति बाधो ऽपि मायामयत्वमेव सूचयति । कथम् । तेन हि तस्य निरुपाख्यतापादनपूर्वकं मिथ्यात्वं ज्ञाप्यते । नेदं रजतं मिथ्यैवाभासिष्टेति । नच तत् केनचिद्रूपेण रूपवत्त्वे ऽवकल्पते सम्प्रयुक्तशुक्तिवन्नि ‖ रस्यमानविषयज्ञानवच्च । ननु न व्यापकमिदं लक्षणम् स्वप्नशोकादावसम्भवात् । न हि स्वप्नशोकादौ केनचित्सम्प्रयोगो ऽस्ति येन परत्र पराऽवभासः स्यात् । अत एव वासनातिरिक्तकारणाभावात् स्मृतिरेव न स्मृतिरूपता । अत्रोच्यते । न तावत् स्मृतित्वमस्त्यऽपरोक्षा ¶ र्थावभासनात् । ननु स्मृतिरूपत्वमपि नास्ति पूर्वप्रमाणसंस्कारमात्रजन्यत्वात् । अत्रोच्यते । उक्तमेतत्पूर्वप्रमाणविषयावभासित्वमात्रं स्मृतेः स्वरूपमिति । तदिह निद्रादिदोषोपप्लुतं मनो ऽदृष्टादिसमुद्बोधितसंस्कारविशेष ** सहकार्यनुरूपं मिथ्यार्थविषयं ज्ञानमुत्पादयति तस्य च तदवच्छिन्नापरोक्षचैतन्यस्थाविद्याशक्तिरालम्बनतया विवर्तते । नन्वेवं सत्यऽन्तरेव स्वप्नार्थप्रतिभासः स्यात् । को वा ब्रूते नान्तरिति । ननु विच्छिन्नदेशो ऽनुभूयते स्वप्नेपि जागरणइव न तदन्तर †† नुभवाश्रयत्वे स्वप्नार्थस्योपपद्यते । ननु देशो ऽपि तादृश एव कुतस्तत्सम्बन्धाद्विच्छेदो ऽवभासते अयमपि तद्व्यपरो दोषः । नैष ‡‡ दोषो जागरणे ऽपि प्रमाणज्ञानादन्तरपरोक्षानु-

---

* प्रत्यभिज्ञाज्ञानेऽपीति २ पु० ।
† तच्छब्दोऽत्राधिकः २ पु० ।
‡ तदा शब्दो नास्ति २ पु० ।
§ दोषोपहृतेति २ पु० ।
‖ निरस्यमानविषयकेति १ पु० ।
¶ ०र्थप्रतिभासनादिति २ पु० ।
** सहकार्यानुरूपमिति २ पु० ।
†† अनुभावाश्रयत्वे-इति १ पु० ।
‡‡ न दोष इति २ पु० ।

भवान्न विषयस्या ऽपरोक्षता भिद्यते। एकरूपप्रकाशनात्। अतो ऽन्तरपरोक्षानुभवावगुण्ठित एव जागरणे ऽप्यर्थो ऽनुभूयते ऽन्यथा जडस्य प्रकाशानुपपत्तेः। यथा तमसा ऽवगुण्ठितो घटः प्रदीपप्रभावगुण्ठनमन्तरेण न प्रकाशीभवत्येवम्। यः पुनर्विच्छेदावभासः स जागरे ऽपि मायाविजृम्भितः सर्वस्य प्रपञ्चजातस्य चैतन्यैकाश्रयत्वात्तस्य च निरंशस्य प्रदेशभेदाभावात्। प्रपञ्चभेदेनैव हि तत्कल्पितावच्छेदं सदवच्छिन्नमिव बहिरिवान्तरिव * प्रकाशते। अथवा दिगाकाशौ मनोमात्रगोचरौ सर्वत्राध्यासाधारौ विद्येते इति न परत्रेति विरुध्यते। कथं तर्हि नामादिषु ब्रह्माध्यासः। किमत्र कथम्। न तत्र कारणदोषो नापि मिथ्यार्थावभासः। सत्यम्। अत एव चोदनावशादिच्छातो ऽनुष्ठेयत्वान्मानसी क्रियैषा न ज्ञानम्। ज्ञानस्य हि † दुष्टकारणजन्यस्य विषयो मिथ्यार्थः। न हि ज्ञानमिच्छातो जनयितुं निवर्तयितुं वा ‡ शक्यं § कारणैकायत्तत्वादिच्छानुप्रवेशानुपपत्तेः। ननु स्मृतिज्ञानमाभोगेन जन्यमानं मनोनिरोधेन च निरुध्यमानं दृश्यते। सत्यम्। न स्मृत्युत्पत्तिनिरोधयोस्तयोर्व्यापारः किन्तु कारणव्यापारे तत्प्रतिबन्धे च चक्षुष इवो ‖ न्मीलननिमीलने न पुनर्ज्ञानोत्पत्तौ व्यापार इच्छायाः। तस्माद् ब्रह्मदृष्टिः केवला ऽध्यस्यते चोदनावशात्फलायैव मातृबुद्धिरिव रागनिवृत्तये ¶ परयोषिति। तदेवमनवद्यमध्यासस्य लक्षणं स्मृतिरूपः परत्र पूर्वदृष्टावभास इति॥

तं केचिदित्यादिनाऽध्यासस्वरूपे मतान्तरमुपन्यस्यति स्वमतपरिशुद्धये। कथमन्यत्र शुक्तिका ** दावन्यधर्मस्यार्थान्तरस्य रजतादेर्ज्ञानाकारस्य बहिष्ठस्यैव वा ऽध्यास इति वदन्ति। के चित्तु यत्र यदध्यासस्तद्विवेकाग्रहणनिबन्धनो भ्रम इति। यत्र यस्याध्यासस्तयोर्विवेकस्याग्रहणात्तन्निबन्धनो ऽयमेकत्वभ्रम इति वदन्तीत्यनुषङ्गः। अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते इति। यत्र शुक्तिकादौ यस्य रजतादेरध्यासस्तस्यैव शुक्तिशकलादेर्विपरीतधर्मत्वस्य रजतादिरूपत्वस्य कल्पनामविद्यमानस्यैवावभासमानतामाचक्षते सर्वथापि त्विति स्वमतानुसारित्वं

---

* अन्तरिव चेति २ पु०। † हि शब्दो नास्ति २ पु०। ‡ वा स्थाने च शब्दः २ पु०।
§ स्वकारणेति २ पु०। ‖ उन्मीलने निमीलने इति २ पु०।
¶ रागविनिवृत्तये इति पाठान्तरम्। ** शुक्तिशकलादाविति ३ पु०।

सर्वेषां कल्पनाप्रकाराणां दर्शयति अन्यस्यान्यधर्मावभासित्वं नाम लक्षणम् परत्रे-त्युक्ते ऽर्थात्परावभासः सिद्ध इति यदवादिष्म तन्न व्यभिचरति । कथम् । पूर्वस्मिन् कल्पे ज्ञानाकारस्य बहिस्थस्य वा शुक्तिधर्मत्वा * वभासनान्न व्यभि-चारः । द्वितीये ऽपि शुक्तिरजतयोः पृथक् सतोरपृथगवभासो † ऽभिमानात् । तृतीये ऽपि शुक्तिशकलस्य रजतरूपप्रतिभासनात् पूर्वदृष्टत्वस्मृतिरूपत्वयोः सर्वत्राव्यभिचारान्न ‡ विवाद इत्यभिप्रायः । तत्र स्मृतिरूपः पूर्वदृष्टावभास इत्येतावति लक्षणे निरधिष्ठानाध्यासवादिपक्षे ऽपि निरुपपत्तिके § लक्षणव्याप्तिः स्यादिति तन्निवृत्तये परत्रेत्युच्यते । कथं निरुपपत्तिको ऽयं पक्षः । न हि निरधिष्ठानो ऽध्यासो दृष्टपूर्वः संभवी वा ‖ । ननु केशोण्डुकाद्यवभासो निर-धिष्ठानो दृष्टः । न । तस्यापि तेजोवयवाधिष्ठानत्वात् ।

ननु रजते संवित् संविदि रजतमिति परस्पराधिष्ठानो भविष्यति बीजाङ्कुरादिवत् । नैतत्सारम् । न तत्र यतो बीजाद्यो ऽङ्कुरस्तत एव तद्बी-जमपि त्वङ्कुरान्तरात् इह पुनर्यस्यां संविदि यद्रजतमवभासते तयोरेवेतरे-तराध्यासस्ततो दुर्घटमेतत् । बीजाङ्कुरादिष्वपि न बीजाङ्कुरान्तरपरम्परामात्रेणा-ऽभिमतवस्तुसिद्धिः प्रतीतितो वस्तुतश्चानिवृत्ताकाङ्क्षत्वात् तथा च कुत इदमे-वमिति पर्यनुयोगे दृष्टत्वादेवमिति ¶ तत्र च दूरं वा परिधाव्य ** स्थातव्य-मन्यथा हेतुपरम्परामेवावलम्ब्य क्व चिदप्यनवतिष्ठमानो नानवस्थादोषमति-वर्तेत †† । अपि च । न क्व चिन्निरवधिको नेत्येव बाधावगमो दृष्टः यत्राप्यनुमाना-दाप्तवचनाद्वा न सर्प इत्येवावगमस्तत्रापि किं पुनरिदमित्यपेक्षादर्शनात्पुरो ऽवस्थितं वस्तुमात्रमवधिर्विद्यते प्रधानादिष्वपि जगत्कारणे त्रिगुणत्वादिबाधो ऽधिगता ‡‡ वधिरेव । अथवा सर्वलोकसाक्षिकमेतत् §§ केशोण्डुकादावपि तद्बाधे तदनुषङ्ग एव बोधे बाध्यते न बोधः । अतस्तदवधिः सर्वस्य बाधस्तेन त-न्मात्रस्य बाधाभावात्स्वतश्च विशेषानुपलब्धेः कूटस्थापरोक्षैकरसचैतन्यावधिः सर्वस्य बाधः । नाप्यध्यस्तमप्यसदेव । तथात्वे प्रतिभासायोगात् ।

---

* बहिस्थस्यैवाशुक्तिकाधर्मत्वेति २ पु॰ । † अवभासाभिमानादिति २ पु॰ ।
‡ अव्यभिचारे नेति २ पु॰ । § निरुपपत्तिका लक्षणव्याप्तिरिति २ पु॰ ।
‖ सम्भवी वेति २ पु॰ नास्ति । ¶ तत्रैवेति २ पु॰ । ** अवस्थातव्यमिति २ पु॰ ।
†† अतिवर्त्तते इति २, ३ पु॰ । ‡‡ अवगतावधिरेवेति २ पु॰ ।
§§ केशोण्डुकादाविति २ पु॰ ।

ननु सर्वमेवेदमसदिति भवतो मतम् । क एवमाह अनिर्वचनीयानाद्यविद्यात्मकमित्युद्घोषितमस्माभिः । अथ पुनर्विद्योदये ऽविद्याया निरूपाख्यतामङ्गीकृत्यासत्त्वमुच्येत काममभिधीयताम् । तथाच बाधकज्ञानं नेदं रजतमिति वि * शिष्टदेशकालसम्बद्धं रजतं † विलोपयदेवोदेति न देशान्तरसम्बन्धमापादयति तथानवगमात् । तथाच दूरवर्त्तिनीं ‡ रज्जुं सर्पं मन्यमानस्तन्निकटवर्त्तिना ऽऽप्तेन नायं सर्प इत्युक्ते सर्पाभावमात्रं प्रतिपद्यते न तस्य देशान्तरवर्तित्वम् । तत्प्रतिपत्तावसामर्थ्याद्वाक्यस्य । नार्थापत्त्या । इह भग्नघटाभाववत्तावन्मात्रेणापि § तत्सिद्धेः । यत्रापि सर्पबाधपूर्वको रज्जुविधिरक्षजन्यस्तादृशवाक्यजन्यो वा तत्रापि स एव न्यायस्तथा ऽनवगमात्तदेवं न क्व चिन्निरधिष्ठानो ऽध्यासस्तस्मात्साधूक्तं परत्रेति ।

यद्येवं परत्र पूर्वदृष्टावभास इत्येतावदस्तु लक्षणं तथाविधस्य स्मृतिरूपत्वाव्यभिचारात् । सत्यमर्थलभ्यस्य स्मृतित्वमेव स्यान्न स्मृतिरूपत्वम् । नच स्मृतिविषयस्याध्यासत्वमित्युक्तम् । यद्येवमेतावदस्तु लक्षणं परत्र स्मृतिरूपावभास इति । तत्र परत्रेत्युक्ते ऽर्थलभ्यस्य परावभासस्य स्मृतिरूपत्वं विशेषणम् । न हि परस्यासंयुक्तस्य पूर्वदृष्टत्वाभावे स्मृतिरूपत्वसम्भवः । ‖ सत्यम् । विस्पष्टार्थं पूर्वदृष्टग्रहणमिति यथान्यासमेव लक्षणमस्तु । तथा च लोके ऽनुभवइत्युदाहरणद्वयेन ¶ लौकिकसिद्धमेवेदमध्यासस्य स्वरूपं लक्षितं किमत्र युक्त्येति कथयति शुक्तिका हि रजतवदवभासत इति ।

ननु न शुक्तिका प्रतिभासते रजतमेव प्रतिभासते तेन ** शुक्तिकेति रजतवदिति चोभयं नोपपद्यते । उच्यते । शुक्तिकाग्रहणमुपरितनसम्यक्ज्ञानसिद्धं परमार्थतः शुक्तिकात्वमपेक्ष्य, वतिग्रहणं तु संप्रयुक्तस्यारजत †† स्वरूपस्य मिथ्यारजतसम्भेद इवाव ‡‡ भासनमङ्गीकृत्य,मिथ्यात्वमपि रजतस्यागन्तुकदोषनिमित्तत्वादनन्तरबाधदर्शनाच्च कथ्यते न पुनः परमार्थाभिमताद्रजतादन्यत्वमाश्रित्य, तत्रासंप्रयुक्तत्वाद्रजतस्य नेदन्तावभासस्तद्गतः किन्तु

---

* विशिष्टदेशसम्बन्धमिति २ पु० ।
† विलापयदिति २ पु० ।
‡ दूरवर्त्तिनो रज्जुमिति २ पु० ।
§ तन्मात्रेणाऽपि तत्सिद्धिरिति २ ३ पु० ।
‖ सत्यमेवेति ३ पु० ।
¶ लौकिकसिद्धमिति १ पु० ।
** शुक्तिको रजतवदितीति— इति २ पु० ।
†† स्वशब्दो नास्ति २ पु० ।
‡‡ अवभासमिति २ पु० ।

संप्रयुक्तगत एवापरोक्षावभासस्तु संस्कारजन्मनोपि रजतोल्लेखस्य दोषबलादिन्द्रियजज्ञानान्तर्भावाच्चेति द्रष्टव्यम् । तत्र शुक्तिकोदाहरणेन संप्रयुक्तस्यानात्मा रजतमिति * दर्शितम् । निरञ्जनस्य चैतन्यस्यास्मदर्थे ऽनिदमंशस्यानात्मा तदवभास्यत्वेन युष्मदर्थल † क्षणापन्नो ऽहंकारो ऽध्यस्त इति ‡ प्रदर्शनार्थम् । द्विचन्द्रोदाहरणेन जीवेश्वरयोर्जीवानां चानात्मरूपो भेदावभास इति दर्शितम् ।

ननु बहिरर्थे कारणदोषो ऽर्थगतः सादृश्यादिरिन्द्रियगतश्च तिमिरादिरुपलभ्यते तन्निमित्तश्चार्थस्य सांशत्वादंशान्तरावग्रहे ऽप्यंशान्तरप्रतिबन्धो युज्येत § न त्विह कारणान्तरायत्ता सिद्धिर्येन तद्दोषादनवभासो ऽपि स्यान्निरंशस्य चैतन्यस्य ‖ स्वयंज्योतिषस्तदयोगात् । ननु ब्रह्मस्वरूपमनवभासमानमस्त्येव न तदनवभासनाज्जीवेऽनवभासविपर्यासौ भवतः । न हि शुक्तेरग्रहणात्स्थाणाव ¶ ऽग्रहणं विपर्यासो वा । ननु न ब्रह्मणोन्यो जीवो ऽनेन जीवेनात्मनेतिश्रुतेरतस्तदग्रहणमात्मन एव ** तत् । एवं तर्हि सुतरामविद्यायास्तत्रासम्भवस्तस्य विद्यात्मकत्वात्तस्य भासा सर्वमिदं भातीति †† तच्चैतन्येनैव सर्वस्य भासमानत्वात् ‡‡ । उच्यते । विद्यत एवाचाप्यग्रहणाविद्यात्मको दोषः प्रकाशस्याच्छादकः । कथं गम्यते । श्रुतेस्तदर्थापत्तेश्च । श्रुतिस्तावदनृतेन हि प्रत्यूढा अनीशया शोचति मुह्यमान इत्येवमाद्या । तदर्थापत्तिरपि विद्यैव सर्वत्र श्रुतिषु ब्रह्मविषया मोक्षाय निवेद्यते । तेनार्थादिदमवगम्यते जीवस्य ब्रह्म §§ स्वरूपता ‖‖ नवगमो ऽविद्यात्मको बन्धो निसर्गत एवास्तीति ।

ननु न जीवो ब्रह्मणो ऽन्य इत्युक्तम् । बाढम् । अत एवाऽर्थाज्जीवे ब्रह्मस्वरूपप्रकाशाच्छादिका ऽविद्या कल्प्यते ऽन्यथापरमार्थतस्तत्स्वरूपत्वे तदवबोधेपि यदि नित्यसिद्धः स्यात्तदा तादात्म्योपदेशो व्यर्थः स्यात् अतो

---

* निदर्शितमिति २ पु· ।

† लक्षणोपपन्न इति २ पु· ।

‡ प्रशब्दो नास्ति २ पु· ।

§ युज्यते इति १ पु· उपकल्पितमास्ते ।

‖ चैतन्यस्येति २ पु· नास्ति ।

¶ स्याणवग्रहणमिति क्वचित् ।

** तदिति २ पुस्तके लिखितमपि छिन्नम् ।

†† विभातीति २ पु· ।

‡‡ भास्यमानत्वादिति २ पु· ।

§§ स्वेति २ पु· नास्ति ।

‖‖ अनवगमाविद्यात्मक इति २ पु· ।

ऽनादिसिद्धाविद्यावच्छिन्नानन्तजीवनिर्भासास्पदमेकरसं ब्रह्मेति श्रुतिस्मृति*-न्यायकोविदैरभ्युपगन्तव्यम् । तथा च स्मृतिः । प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीति† क्षेत्रक्षेत्रज्ञत्वनि‡मित्तामनादिसिद्धामविद्यां प्रकृतिशब्देनाह मायां तु प्रकृतिं विद्यादिति श्रुतेरतो मायावच्छिन्न§रूपत्वादनन्यदपि ब्रह्मरूपमात्मनो न वेत्ति । तथा चोक्तम् । अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते । अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदेति ।

ननु प्रमाणान्तरविरोधे‖ सति श्रुतिस्तदर्थापत्तिर्वा नाविद्यां निवेदयितुमलम् । किं तत्प्रमाणं येन सह विरोधः । निरंशस्य स्वयंज्योतिषः स्वरूपानवभासानुपपत्तिः । ननु भोक्तुः कार्यकारणसंघाताद्व्यावृत्तता स्वयंज्योतिषो ऽपि न प्रकाशते । ननु न भोक्ता स्वयंज्योतिः किं त्वहंप्रत्ययेनावभास्यते । यथा स्वयंप्रकाशमानता ऽहङ्कारो न प्रत्ययस्तथा वक्ष्यते ।

कथं पुनर्भोक्ता स्वयंज्योतिः कार्यकारणसंघाताद्व्यावृत्तो न प्रकाशते मनुष्योहमितिमिथ्यैवैकताभिमानात् । ननु गौणो ऽयं न मिथ्या । यथा न गौणस्तथा भाष्यकार¶ एव वक्ष्यति** ।

नन्वहमिति यदि देहसमानाधिकरणः प्रत्ययो न तर्हि तद्व्यतिक्त आत्मा सिध्यति अन्यस्य तथाग्राहिणः प्रत्ययस्याभावादागमानुमानयोरपि तद्विरोधे प्रमाणत्वायोगात् । मिथ्यात्वात्तस्य न विरोध इति चेत् कुतस्तर्हि मिथ्यात्वम् आगमादनुमानाद्वा । अन्यथावगमादिति चेत् । मैवम् । अन्योन्याश्रयता तथा स्यात् आगमानुमानयोः प्रवृत्तौ तन्मिथ्यात्वं तन्मिथ्यात्वे तयोः प्रवृत्तिरिति । तस्माद्देहादिव्यतिरिक्तविषय एवायमहङ्कार इत्यात्मवादिभिरभ्युपेयम् । अन्यथा ऽऽत्मसिद्धिर†† प्रामाणिकी स्यादतो गौणो मनुष्यत्वाभिमानः । उच्यते । यद्यपि देहादिव्यतिरिक्तभोक्तृविषय एवायमहङ्कारस्तथापि तथा ऽनध्यवसायात्तद्धर्मानात्मन्यध्यस्यति दृश्यते च स्वरूपेणावभासमाने ऽपि वस्त्वन्तरभेदानध्यवसायात्तत्सम्भेदेनावभासः । यथैकस्मिन्नप्यकारे ह्रस्वादिसम्भेदः ।

---

* तच्यायेति २ पु॰ । † क्षेत्रेति २ पु॰ नास्ति । ‡ निमित्तामित्यन्यत्र १ पाठः ।
§ स्वशब्दो ऽधिकः २ पु॰ । ‖ प्रमाणविरोधे श्रुतीति २, ३ पु॰ । ¶ भाष्यएवेति २, ३ पु॰ ।
** वक्ष्यतेति २,३ पु॰ । †† अप्रमाणिकीति १, २ च पु॰ ।

अथ पुनरेकान्ततो भिन्न एव देहादेरहङ्कर्ता ऽवभासेत * रसादिव गन्धः । ततस्तत्सद्भावे न विप्रतिपत्तिरिति तत्सिद्धये जिज्ञासा नावकल्पेत † जिज्ञासोत्तरकालं तर्हि गौण एव युक्तः । कथम् । जिज्ञासा नाम युक्त्यनुसन्धानम् । न हि युक्तिः पृथग् ज्ञानान्तरजननी किन्तु सिद्धस्यैवाहंप्रत्ययस्य विषयविवेचिनी ‡ । तस्माद्विविक्तविषयत्वाद्व्यतिरिक्तात्मानुभवपर्यन्त एवाहंकारो जिज्ञासोत्तरकालं युक्तः । न युक्तः अकारइव ह्रस्वत्वाभिमानः । ननु तत्रापि कथम् । अनुभव एव । एव § महङ्कारेऽपि समानश्चर्चः । नन्वनुभवस्तर्कबलाद्यथावभासिन्यकारे सम्भवति ह्रस्वादेः पृथक्सतस्तथानवगमात् । तन्न । एकस्य पृथक्त्वे ऽप्यर्थादितरस्यापि पृथक्त्वात् ।

ननु महदेतदिन्द्रजालं यत्तर्कानुगृहीतात्प्रमाणाद्यथायथमसाधारणरूपयोरेवावभासमानयोरेकत्वावगमो न गौण इति । बाढम् । इन्द्रजालमेवैतदविद्याकृतत्वात्तथाह्यहंप्रत्ययस्य स्वविषयप्रतिष्ठितस्यैव सतस्तदेकप्रतिष्ठिताप्रतिबन्धकृदनाद्यविद्याकृतं देहादिप्रतिष्ठितत्वमपि दृष्टम् । अतो देहादिविषयत्वाविरोधि स्वविषयप्रतिष्ठत्वमहंप्रत्ययस्याऽतो युक्त्या विषयविवेचने ऽपि स्वविषयोपदर्शनेन तत्प्रतिष्ठत्वमात्रं कृतं नाधिकमादर्शितम् । स्वविषयप्रतिष्ठत्वं च देहादिष्वहं ‖ ममाभिमानेन न विरुध्यत इत्युक्तमतो न्यायतो विषयविवेचनादूर्ध्वमपि न प्रागवस्थातो विशिष्यते ऽहंप्रत्ययस्तेन न कदाचिदपि मनुष्यो ऽहमिति प्रत्ययो गौणः । ¶ तदेवं स्वयंज्योतिष एव सतो जीवस्य कार्य ** करणसङ्घातव्यतिरिक्ततायास्तथा †† ऽन वभासदर्शनान्मनुष्योऽहमिति चाध्यासोपलब्धे ‡‡ ब्रह्मात्मैकत्वस्यापि तत्स्वरूपस्यानवभासनं पूर्वकालकोटिरहितप्रकाशाच्छादितमोनिमित्तं श्रुतितदर्थापत्तिसमर्पितं तन्निमित्ता §§ हंकाराध्यासश्च सम्भाव्यते ऽनादित्वाच्च ‖‖ पूर्वदृष्टत्वं स्मृतिरूपत्वं च पृथग्भोक्तृविषयानुभवफलाभावाद्भोक्तृचैतन्यसंवलितैकानुभवफलत्वाच्च परत्र परावभास-

---

* अवभासते–इति २ पु· । † अवकल्प्यते–इति २ पु· । ‡ विवेचनीति २ पु· ।
§ अहंकारो ऽपि समानचर्च इति १ पु· । ‖ अहंमानेनेति २ पु· ।
¶ यदेवमिति २ पु· । ** कारणव्यतिरिक्ततायाः इति २पु· ।
†† अनवभासनादित्युपकल्पितं १ पु· । ‡‡ एवं ब्रह्मेति १ पु· ब्रह्मात्मकत्वस्येति २ पु· ।
§§ अहंकाराद्यध्यासश्चेति २ पु· ।
‖‖ सदापूर्वदृष्टत्वमिति २ पु· १ पुस्तके तु सदाशब्दः सन्नपि च्छिन्नोऽस्ति ।

स्याऽन्योन्यसम्भेदस्य विद्यमानत्वादध्यासलक्षणाव्याप्तिरिहाप्युपपद्यते । कोऽयमध्यासो नामेति । किं वृत्तस्य प्रश्ने क्षेपे च समानवर्तिनो विशेषानुपलब्धेः पृष्टमनेनेति मत्वा ऽध्यासस्वरूपे ऽभिहिते पुनराक्षिप्रं मयेत्यभिप्रायं विवृणोति कथं पुनः प्रत्यगात्मन्यविषये ऽध्यासो विषय * तद्धर्माणामिति । बाढमेवंलक्षणो ऽध्यासः स चेह न सम्भवति । कथम् । यतः सर्वो हि पुरोऽवस्थिते विषये विषयान्तरमध्यस्यति युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनोऽविषयत्वं ब्रवीषि नह्यविषये ऽध्यासो दृष्टपूर्वः सम्भवी वा । उच्यते । न तावदयमेकान्तेनाविषयः अस्मत्प्रत्ययविषयत्वात् ।

ननु विषयिणश्चिदात्मनः कथं विषयभावः पराग्भावेनेदन्तासमुल्लेख्यो हि विषयो नाम भवति तद्वैपरीत्येन प्रत्यग्रूपेणानिदंप्रकाशो विषयी तत्कथमेकस्य निरंशस्य विरुद्धांशद्वयसंनिवेशः । अत्रोच्यते । अस्मत्प्रत्ययत्वाभिमतो ऽहंकारः । स चेदमनिदंरूपवस्तुगर्भः सर्वलोकसाक्षिकः । तमवहित † चेतस्तया निपुणतरमभिवीक्ष्य रूपकपरीक्षकवत् स्वानुभवमऽप्रच्छादयन्तो वदन्तु भवन्तः परीक्षकाः किमुक्तलक्षणो न वेति ‡ ।

ननु किमत्र वदितव्यमसम्भिन्नेदंरूप एवाहमित्यनुभवः । कथम् । प्रमातृप्रमेयप्रमितयस्तावदपरोक्षाः । प्रमेयं कर्मत्वेनापरोक्षम् प्रमातृप्रमिती पुनरपरोक्षे एव केवलं न कर्मतया प्रमितिरनुभवः स्वयंप्रकाशः प्रमाणफलं तद्बलेनेतरत्प्रकाशते प्रमाणं तु प्रमातृव्यापारः फललिङ्गो नित्यानुमेयस्तत्राहमिदं जानामीति प्रमातुर्ज्ञानव्यापारः कर्मविषयो नात्मविषयः । आत्मा तु विषयानुभवादेव निमित्तादहमिति फले विषये चानुसन्धीयते ।

ननु नायं विषयानुभवनिमित्तोऽहमुल्लेखः किं त्वन्य एवात्ममात्रविषयो ऽहमिति प्रत्ययः । तस्मिंश्च द्रव्य § स्वरूपत्वे नात्मनः प्रमेयत्वं ज्ञातृत्वेन प्रमातृत्वमिति प्रमातृप्रमेय ‖ निर्भासरूपत्वादहंप्रत्ययस्य ग्राह्यग्राहकरूप आत्मा तस्मादिदमनिदंरूपः प्रमेयांशस्येदं ¶ रूपत्वात्, अनिदंरूपत्वात् प्रमात्रंशस्य । नैतद्युक्तम् । अनंशत्वादपरिणामित्वाच्चात्मनः ।

---

* तदिति २ पु॰ नास्ति ।
‡ नेतीति ३ पु॰ ।
‖ प्रतिभासेति २ पु॰ कल्पितमास्ते ।
† चेतस्कतयेत्यपरत्र १ पाठः ।
§ स्वशब्दो नास्ति १, २ पु॰ ।
¶ रूपवत्त्वादिति २ पु॰ ।

प्रमेयस्य चेदंरूपतया पराग्रूपत्वादनात्मत्वात्तस्मान्नीलादिज्ञानफलमनुभवः स्वयंप्रकाशमानो ग्राह्यमिदंतया ग्राहकं * चानिदन्तया ऽवभासयति ग्रहणं चानुमापयतीति युक्तम् । अतो नेदमंशो ऽहंकारो युज्यते । उच्यते । तचेदं भवान् प्रष्टव्यः किमात्मा चैतन्यप्रकाशो ऽनुभवो जडप्रकाश उत सोपि चैतन्यप्रकाशः अथवा स एव चैतन्यप्रकाश आत्मा जडस्वरूप † इति । तत्र न तावत्प्रथमः कल्पः । जडस्वरूपे † प्रमाणफले विश्वस्यानवभासप्रसङ्गात् । मैवम् । प्रमाता चेतनस्तद्बलेन प्रदीपेनेव विषयमिदन्तया ऽऽत्मानं चानिदन्तया चेतयत इति न विश्वस्यानवभासप्रसङ्गः । तन्न । स्वयं चैतन्यस्वभावो ऽपि सन् ‡ विषयप्रमाणेनाचेतनेनानुगृहीतः प्रकाशत इति नैतत्साधु § लक्ष्यते । किं च । प्रमाणफलेन चेत् प्रदीपेनेव विषयमात्मानं च चेतयते तदा चेतयतिक्रियानवस्थाप्रसङ्गः ।

द्वितीये ‖ कल्पे ¶ आत्मापि स्वयमेव प्रकाशेत किमिति विषयानुभवमपेक्षेत । अथ चैतन्यस्वभावत्वेपि नात्मा स्वयंप्रकाशः । ** विशेषे हेतुर्वाच्यः । न हि चैतन्यस्वभावः सन् स्वयंपरोक्षो ऽन्यतो ऽपरोक्ष इति युज्यते । किं च । समत्वान्नेतरेतरापेक्षत्वं प्रकाशने प्रदीपयोरिव । तृतीये ऽपि †† कल्पे ऽनिच्छतोप्यात्मैव चितिप्रकाश आपद्यते न तदतिरिक्ततथाविधफलसद्भावे प्रमाणमस्ति । कथम् । प्रमाणजन्यश्चेदनुभवस्तथा सति स्वगतेन विशेषेण प्रतिविषयं पृथक् पृथगवभासेत सर्वानुभवानुगतं च गोत्ववदनुभवत्वमपरमी ‡‡-क्ष्येत । न च नीलानुभवः पीतानुभव इति विषयविशेषपरामर्शशून्यः स्वगतो विशेषो लक्ष्यते ।

ननु विनष्टाविनष्टत्वेन विशेषः सिध्यति । सिध्येद्यदि विनष्टाविनष्टता सिध्येत् । सा च जन्यत्वे सति तस्यां च सिद्धायां जन्यत्वमिति परस्परायत्त §§ स्थितित्वेनैकमपि न सिध्येत् । एतेनातिसादृश्यादनुभवभेदो न विभाव्यत इति प्रत्युक्तम् भेदासिद्धेः । न हि चित्प्रकाशस्य स्वगतो भेदो न प्रकाशते

---

* च शब्दो नास्ति २ पु० । † स्वशब्दो नास्ति २,३ पु० ।
‡ विषयप्रमाणेनेत्यस्य स्थाने विषयप्रवणेनेति कल्पितं २ पु० ।
§ न साधु–इति २ पु० । ‖ अपिशब्दो ऽत्राधिकः २ पु० ।
¶ विकल्पे इति १ पाठान्तरम् । ** विशेषहेतुरिति २ पु० । †† विकल्पे इति १ पु० ।
‡‡ वीक्षेतेति २ पु० । §§ स्थितित्वे नैकमपि सिध्येदिति २ पु० ।

इति युक्तिमत् येन तदप्रकाशनात्सादृश्यनिबन्धनो विभ्रमः स्यात् । न च यथा जीवस्य स्वयंज्योतिषोऽपि स्वरूपमेव सद् ब्रह्मरूपत्वं न प्रकाशते तद्वत्स्यादिति युक्तम् । अभिहितं तत्राप्रकाशने प्रमाणम् इह तन्नास्ति । नहि सामान्यतोदृष्टमनुभवविरोधे युक्तिविरोधे च समुत्तिष्ठति दर्शिते चानुभव-युक्ती । तस्मात् चित्स्वभाव एवात्मा तेन तेन प्रमेयभेदेनोपधीयमानोऽनु-भवाभिधानीयकं लभते ऽविवक्षितोपाधिरात्मादिशब्दैरभिधीयते ऽवधीरित-* वनाभिधाननिमित्तैकदेशावस्थाना इव वृक्षा वृक्षादिशब्दैरित्यभ्युपगन्तव्यम् । बाढम् । अत एव विषयानुभवनिमित्तोऽनिदमात्मको ऽहङ्कारो वर्ण्यते । सत्यमे-वम् । किन्तु तथा सति सुषुप्ते ऽप्य † हमित्युल्लेखः स्यात् । कथम् । नीलानुषङ्गो यश्चैतन्यस्य स ‡ नीलाभोगो नासावहमुल्लेखार्हः अहमित्यात्मावभासते तत्र यदि नाम सुषुप्ते विषयानुषङ्गाभावादिदं जानामीति विषयतदनुभवपरामर्शो § नास्ति मा भूत् अहमित्यात्ममात्रपरामर्शः किमिति न भवेत् ।

नन्वहमिति भोक्तृत्वं प्रतिभासते तदभावे कथं तथा प्रतिभासः । नैतत्सारम् । समुत्कालितोपाधिविशेषं चैतन्यमात्रमस्मदर्थस्ततः सर्वदा ऽह-मिति स्यान्नैतच्छक्यमुपाधि ‖ परामर्शेन चैतन्यमहमित्युल्लिख्यते इति वक्तुम् । तत्परामर्शो हि तत्सिद्धिनिमित्तो न स्वरूपसिद्धिहेतुः ¶ स्वमाहात्म्येनैव तु स्वरूपसिद्धिः ततश्च विषयोपरागानुभवात्मत्व ** शून्यः स्वरूपतो ऽहमिति सुषुप्ते ऽप्यवभासेत दृशिरूपत्वाविशेषात् । भवत्येवेति चेन्न । तथा सति स्मर्येत ह्यस्तन इवाहङ्कारः । अविनाशिनः संस्कारस्याभावान्न स्मर्यते इति चेत् । ह्य-स्तनो ऽपि न स्मर्येत ।

नन्वस्त्येव सुषुप्ते ऽहमुल्लेखः सुखमहमस्वाप्समिति सुषुप्तोत्थितस्य स्वापसुखानुभवपरामर्शदर्शनात् नात्मनो ऽन्यस्य तत्रानुभवः सम्भवति । सत्यमस्ति । न तत्स्वापे सुखानुभवसंस्कारजं स्मरणं किं तर्हि सुखावमर्शो दुःखाभावनिमित्तः । कथम् । स्वप्ने तावदस्त्येव दुःखानुभवः । सुषुप्ते तु तद-भावात्सुखव्यपदेशः । तदभावश्च करणव्यापारोपरमात् । यदि पुनः सुषुप्तः सुख-

---

* वनाभिधेयनिमित्तेति ३ पु॰ ।
† अहमुल्लेखइति २ पु॰ ।
‡ सनीलभाग इति २ पु॰ ।
§ नास्तीति २ पु॰ नास्ति ।
‖ परामर्शे चैतन्यमिति २ पु॰ ।
¶ स्वमहात्म्येनेति १ पु॰ ।
** त्वशब्दो नास्ति २ पु॰ ।

मिति च तद्विषयं स्मरणं स्या * त्तदा विशेषतः स्मर्येत न च तदस्ति । व्यपदेशो ऽपि सुखं सुप्तो न किंचिन्मया चेतितमिति हि दृश्यते । यत्पुनः सुप्तोत्थितस्याङ्गलाघवेन्द्रियप्रसादादिना सुखानुभवोन्नयनमिति । तदसत् । अनुभूतं चेत्सुखं स्मर्येत न तत्र लिङ्गेन प्रयोजनम् । यद्येवं सुप्तोत्थितस्य कथं कस्यचिदङ्गलाघवं कस्य चिन्नेति । उच्यते । जागरणे कार्यकरणानि श्राम्यन्ति तदपनुत्तये व्यापारोपरमः स्वापः तत्र यदि सम्यग् व्यापारोपरम † स्तदाङ्गानि लघूनीतरथा गुरूणीति । तदेवं नायं नीलादिप्रत्ययादन्य एवात्मविषयो ऽहंप्रत्ययो नापि विषयानुभवादेवाहमुल्लेखः । तस्माद् ब्रह्मविदामेकपुण्डरीकस्य लोकानुग्रहैकरसतया सम्यग्ज्ञानप्रवर्तनप्रयोजनकृतशरीरपरिग्रहस्य भगवतो भाष्यकारस्य मतमागमयितव्यम् ।

तदुच्यते । येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपमव्याकृतमविद्या माया प्रकृतिरग्रहणमव्यक्तं तमः कारणं लयः शक्तिर्महासुप्तिर्निद्रा चरमाकाशमिति च तत्र तत्र बहुधा गीयते चैतन्यस्य स्वत एवाव ‡ स्थितलक्षणब्रह्म §-स्वरूपतावभासं प्रतिबध्य जीवत्वापादिका ऽविद्याकर्मपूर्वप्रज्ञासंस्कारचित्रभित्तिः सुषुप्ते प्रकाशाच्छादनविक्षेपसंस्कारमात्ररूपस्थितिरनादिरविद्या । तस्याः परमेश्वराधिष्ठितत्वलब्धपरिणामविशेषो विज्ञानक्रियाशक्तिद्वयाश्रयः कर्तृत्वभोक्तृत्वैकाधारः कूटस्थचैतन्यसंवलनसंजातज्योतिः स्वयं प्रकाशमानो ऽपरोक्षो ऽहङ्कारो यत्सम्भेदात्कूटस्थचैतन्यो ऽनिदमंश आत्मधातुरपि मिथ्यैव भोक्तेति प्रसिद्धिमुपगतः । स च सुषुप्ते समुत्खातनिखिलपरिणामायामविद्यायां कुतस्त्यः । न चैवं मन्तव्यम् आश्रितपरिणतिभेदतयैवाहंकारस्य निर्भासे ऽनन्तर्भूतैव तन्निमित्तमिति तथा सत्यऽपाकृताहंकृतिसंसर्गो भोक्तृत्वादिस्तद्विशेषः केवलमिदन्तयैवावभासेत न च तथा समस्ति । स च परिणामविशेषो ऽनिदञ्चिदात्मनो बुद्ध्या निष्कृष्य वेदान्तवादिभिरन्तःकरणं मनो बुद्धिरहम्प्रत्ययीति च विज्ञानशक्तिविशेषमाश्रित्य व्यपदिश्यते परिस्पन्दशक्त्या च प्राण इति । तेनान्तःकरणोपरागनिमित्तं मिथ्यैवाहंकर्तृत्वमात्मनः स्फटिकमणेरिवो ‖ पधाननिमित्तो लोहितिमा । कथं पुनः स्फटिके

* तथेति १ पु॰ ।
† तदङ्गानीति १ पु॰, तदा लघूनीति २ पु॰ ।
‡ अवशब्दो नास्ति १, २ पु॰ ।
§ स्वशब्दो नास्ति २ पु॰ ।
‖ उपाधिनिमित्त इति २ पु॰ ।

लोहितिम्नो मिथ्यात्वम् । उच्यते । यदि स्फटिक * प्रतिस्फालिता † नायनरश्मयो जपाकुसुममुपसर्पेयुस्तदा विशिष्टसंनिवेशं तदेव लोहितं ग्राहयेयुः । न हि रूपमात्रनिष्ठश्चाक्षुषः प्रत्ययो दृष्टपूर्वः नापि स्वाश्रयमनाक्रम्यद्रूपमात्रं प्रतिविम्बितं क्वचिदुपलब्धपूर्वम् । नन्वभिजातस्येव पद्मरागादिमणेर्जपाकुसुमादेरपि प्रभा विद्यते तया व्याप्तत्वात् स्फटिको ऽपि लोहित इवावभासते । तथापि स्वयमलोहितो मिथ्यैव लोहित इत्यापद्येत । अथ प्रभैव लोहिता ऽवभासते न स्फटिक इति । शैाक्ल्यमपि तर्हि स्फटिके प्रकाशेत । ‡ अथ प्रभया ऽपसारितं तदिति चेत् । स तर्हि नीरूपः कथं चाक्षुषः स्यात् । न § च रूपिद्रव्य ||-संयोगात् । वायोरपि तथात्वप्रसङ्गात् । न प्रभानिमित्तं लैाहित्यं तत्रोत्पन्नम् उत्तरकालमपि तथारूपप्रसङ्गात् । अभ्युपगम्य प्रभामिदमुक्तम् । यथा पद्मरागादिप्रभा निराश्रया ऽप्युन्मुखोपलभ्यते न ¶ तथा जपाकुसुमादेः । तदेवं स्फटिकमणावुपधानोपराग इव चिदात्मन्य ** प्यहङ्कारोपरागस्ततः सम्भिन्नोभयरूपत्वाद्ग्रन्थिरिव भवतीत्यहङ्कारो ग्रन्थिरिति गीयते । तत्र जडरूपत्वादुपरक्तस्य न तद्बलादुपरागस्य साक्षाद्भावश्चिद्रूपस्य पुनरुपरागस्तद्विषयव्यापारविरहिणो ऽपि तद्बलात्प्रकाशते । तेन लक्षणत इदमंशः कथ्यते न व्यवहारतः । व्यवहारतः पुनर्यदुपरागादनिदमात्मनो ऽहंकर्तृत्वं मिथ्या तदात्मनस्तद्व्यापारेण व्याप्रियमाणस्यैव व्यापारपूर्वको यस्य परिच्छेदः स एवेदमात्मको विषयो ऽत एवाहमित्यसम्भिन्नेदमात्मको ऽव †† भास इति विभ्रमः केषांचित् ‡‡ दृष्टश्च लक्षणतस्तद्व्यवहारार्होऽपि तमननुपतन् । तद्यथाङ्कुरादिफलपर्यन्तो वृक्षविकारो मृत्परिणामपरम्परापरिनिष्पन्नो ऽपि घटव §§ ल्मीकवन्न मृन्मयव्यवहारमनुपतति । व्युत्पन्नमतयस्तु तद्व्यवहारमपि नातीवोल्बणं मन्यन्ते । अत एव निपुणतरमभिवीक्ष्य रूपकपरीक्षकवदहङ्कारं निरूपयतां सम्भिन्नेदंरूपः स इत्यभिहितम् । यत्पुनर्दर्पणजलादिषु मुखचन्द्रादि |||| प्रतिविम्बोदाहरणं तदहङ्कर्तुरनिदमंशो विम्बादिव प्रतिविम्बं न ब्रह्मणो वस्त्वन्तरं

---

* प्रतिफलिता इति ३ पु॰ । † नायना रश्मय इति १ पु॰ । ‡ अथेति २,३ पु॰ नास्ति ।
¶ नशब्दोनास्ति ३ पु॰ । § च शब्दो नास्ति १ पु॰ । || द्रव्येति २,३ पु॰ नास्ति ।
** अपिशब्दो नास्ति १ पु॰ । †† अवभासत इति २ पु॰ । ‡‡ दृष्ठ इत्यधिकं ३ पु॰ ।
§§ वल्मीकादिवदिति २ पु॰ । |||| प्रतीति २ पु॰ नास्ति ।

किं तु तदेव तत्पृथगवभासविपर्यय * स्वरूपतामात्रं मिथ्येति दर्शयितुम् । कथं पुनस्तदेव । तदेक † स्वलक्षणतावगमात् । तथाच यथा बहिःस्थितो देवदत्तो यत्स्वलक्षणः प्रतिपन्नस्तत्स्वलक्षण एव वेश्मान्तःप्रविष्टोऽपि प्रतीयते तथा दर्पणतलस्थितो ऽपि न तद्वस्त्वन्तरत्वे युज्यते । अपिच । अर्थाद्वस्त्वन्तरत्वे सत्याऽऽदर्श एव विम्बसन्निधावेव तदाकारगर्भितः परिणत इति वाच्यम् विरुद्धपरिमाणत्वात्संश्लेषाभावाच्च प्रतिमुद्रेव विम्बलाञ्छितत्वानुपपत्तेः । तथा सति विम्बसन्निधिलब्धपरिणतिरादर्शस्तदपाये ऽपि ‡ तथैवावतिष्ठेत । न खलु संवेष्टितः कटो निमित्तलब्धप्रसारणपरिणतिर्निमित्तापगमे तत्क्षणमेव संवेष्टते यथा तथा स्यादिति मन्तव्यम् । यतश्चिरकालसंवेष्टनाहितसंस्कारस्तत्र पुनः § संवेष्टनिमित्तम् । तथा च यावत्संस्कारक्षयं प्रसारणनिमित्तानुवृत्तौ पुनः संवेष्टनोपजनः । एवं ‖ चिरकालसन्निहितविम्बनिमित्ततदाकारपरिणति ¶ रादर्शस्तथैव तदपायेऽपि यावदायुरवतिष्ठेत न ** च तथोपलभ्यते । यः पुनः कमलमुकुलस्य विकासपरिणतिहेतोः सावित्रस्य †† तेजसो दीर्घकालानुवृत्तस्यापि विगमे तत्समकालं पुनर्मुकुलीभावः स प्रथमतरमुकुल ‡‡ हेतुपार्थिवाप्यावयवव्यापारनिमित्तस्तदुपरमे जीर्णस्य पुनर्मुकुलतानुपलब्धेर्नादर्शे पुनस्तथा पूर्वरूपपरिणामहेतुरस्त्यथाह भवतु न वस्त्वन्तरम् तदेव तदिति तु न क्षम्यते शुक्तिकारजतस्य मिथ्यारूपस्यापि सत्यरजतैकरूपावभासित्वदर्शनात् । मैवम् । तत्र हि बाधदर्शनान् मिथ्याभावो नेह स बाधो दृश्यते । यत्पुनर्दर्पणापगमे तदपगमो न स बाधो दर्पणे ऽपि तत्प्रसङ्गात् ।

ननु तत्त्वमसिवाक्याद् बाधो दृश्यते । मैवम् । तत्र तत्त्वमिति विम्बस्थानीयब्रह्म §§ स्वरूपता प्रतिविम्बस्थानीयस्य जीवस्योपदिश्यते ऽन्यथा न तत्त्वमसीति स्यात् किन्तु न त्वमसीति भवेन्न रजतमस्तीतिवत् । किंच । शास्त्रीयो ऽपि व्यवहारः प्रतिविम्बस्य पारमार्थिकमेव विम्बैकरूपत्वं

* स्वेति नास्ति २ पु० ।
† स्वलक्षणत्वावगमादिति २ पु० ।
‡ तथैवेति २ पु० नास्ति ।
§ संवेष्टने-इति २ पु० ।
‖ चिरकालमिति २ पु० ।
¶ तदपायेऽप्यादर्शस्तथैव यावदायुरिति २ पु० ।
** चेति २ पु० नास्ति ।
†† सावित्रतेजस इति २ पु० ।
‡‡ मुकुलभावेति २ पु० ।
§§ स्वेतिशब्दो नास्ति २ पु० ।

दर्शयति "नैवैतोद्यन्तमादित्यं नास्तं यन्तं कदाचन । नोपरक्तं न वारिस्थं न मध्यं नभसो गतमिति । यस्तु मन्यते न पराक्प्रवणप्रवृत्तनायनरश्मिभिर्विम्बमेव भिन्नदेशस्थं गृह्यते किन्तु दर्पणप्र * तिस्फालितैः परावृत्त्य प्रत्यङ्मुखैः स्वदेशस्थमेव विम्बं गृह्यत इति तमनुभव एव निराकरोतीति न पराक्रम्यते। कथं पुनः † परिच्छिन्नमेकमेकस्वभावं विच्छिन्नदेशद्वये सर्वात्मना ऽवभासमानमुभयत्र पारमार्थिकं भवति । न वयं विच्छेदावभासं पारमार्थिकं ब्रूमः किं त्वेकत्वम् । विच्छेदस्तु मायाविजृम्भितः । न हि मायायामसम्भावनीयं नाम । असम्भावनीयावभासचतुरा हि सा ।

ननु सत्येव विम्बैकतावगमे प्रतिविम्बस्य तद्गतो विच्छेदादिमिथ्यावभासस्तथा ब्रह्मैकतावगमे ऽपि जीवस्य विच्छेदादिमिथ्यावभासो न निवर्तितुमर्हति । उच्यते । देवदत्तस्याचेतनांशस्यैव ‡ प्रतिविम्बत्वात्सचेतनांशस्यैव वा § प्रतिविम्बत्वे प्रतिविम्बहेतोः श्यामादिधर्मेणैव जाड्येनाप्यास्कन्दितत्वान्न तत्प्रतिविम्बं विम्बैकरूपतामात्मनो जानात्यचेतनत्वात् । तथा चानुभवो न विम्बचेष्टया ‖ विना प्रतिविम्बं चेष्टते । यस्य हि भ्रान्तिरात्मनि परत्र वा समुत्पन्ना तद्गतेनैव सम्यग्ज्ञानेन सा निवर्तते यस्तु जानीते देवदत्तः प्रतिविम्बस्यात्मनो ऽभिन्नत्वं न स तद्गतेन दोषेण संस्पृश्यते नाऽपि ज्ञानमात्रात्प्रतिविम्बस्य निवृत्तिस्तद्धेतोर्दर्पणादेः परमार्थिकत्वात् । जीवः पुनः प्रतिविम्बकल्पः सर्वेषां नः प्रत्यक्चिद्रूपो नान्तःकरणजाड्येनास्कन्दितः । स चाहंक ¶ र्तृत्वमात्मनो रूपं मन्यते न विम्बकल्पब्रह्मैकरूपतामतो युक्तस्तद्रूपावगमे मि **-थ्यात्वापगमः । ननु तत्र विभ्राम्यतो विभ्रमहेतुर्दर्पणालक्तकादिपरमार्थवस्तु संनिहितमस्ति न तथेह किञ्चित्सर्वत्रैव चिद्विलक्षणे विभ्रमविलासाभिमानिन इति मा भूदाशङ्केति रज्जुसर्पमुदाहरन्ति ।

ननु तत्रापि यदि नामेदानीमसन्निहितः सर्पस्तथापि पूर्वनिर्वृत्ततदनुभवसंस्कारः समस्त्येव । बाढम् । इहाप्यहङ्कर्तृतातत्संस्कारयोर्बीजाङ्कुरयोरिवानादेः कार्यकारणभावस्य वक्ष्यमाणत्वात्संस्कारो विभ्रमहेतुर्विद्यते । तत्र

* प्रतिस्फलितैरिति २ पु०, प्रतिफलितैरिति ३ पु० । † परिच्छिन्नदेशमिति २ पु० ।
‡ प्रतिविम्बितत्वादिति २ पु० । § प्रतिविम्बितत्वे इति २ पु० ।
‖ न विम्बचेष्टां विनेति ३ पु० । ¶ कर्तृत्वमेवात्मन इति २ पु० ।
** मिथ्यापगम इत्युपकल्पितं २ पु० ।

यद्यप्यनिर्वचनीयतयैवारुणादिना स्फटिकादेः सावयवत्वेन सम्भेदयोग्यस्याप्यसम्भेदा * वभासः सिद्धस्तथापि तदासङ्गीव स्फटिकप्रतिविम्बमुत्प्रेक्षते रज्ज्वां पुनः सर्पबुद्धिरेव न तत्सम्भिन्नत्वमसम्भिन्नत्वं वा तस्यान्तेना ऽसङ्गो नहि सज्जते † असङ्गो ह्ययं पुरुष इत्यादिश्रुतिसमर्पिता ऽसङ्गता ऽऽत्मनो न स्पष्टं ‡ दर्शितेति तदर्थं घटाकाशोदाहरणम् । तत्र हि तत्परामर्शादृते न भेदरूपकार्यसमाख्याः स्वगता दृश्यन्ते । एतच्च सर्वमुदाहरणजातं श्रुतितन्न्यायानुभवसिद्धस्य तदसम्भावनापरिहाराय बुद्धिसाम्यार्थं च न वस्तुन एव साक्षात्सिद्धये । तदेवं यद्यपि चैतन्यैकरसो ऽनिदमात्मकत्वादविषयस्तथाप्यहङ्कारे व्यवहारयोग्यो भवतीति गौण्या वृत्त्या ऽस्मत्प्रत्ययविषयतोच्यते प्रमेयस्य § व्यवहारयोग्यत्वाव्यभिचारात् ।

ननु व्यवहारयोग्यत्वे ऽध्यासो ऽध्यासपरिनिष्पन्नाहम्प्रत्ययबलाद्व्यवहारयोग्यत्वमिति प्राप्तमितरेतराश्रयत्वम् । नाऽनादित्वेन प्रत्युक्तत्वात् । तत्रैवम्भूतस्याहङ्कर्तुरिदमंशस्य ज्ञानसंशब्दितो व्यापारविशेषः सकर्मत्वात्कर्मकारकाभिमुखं स्वाश्रये किञ्चिदवस्थाविशेषमादधाति स्वाश्रयविकारहेतुत्वात्क्रियायाः । स च प्राप्नोतिक्रियाहितकर्तृस्थविशेषवत्कर्मसम्ब || न्धो ज्ञातुर्ज्ञेयसम्बन्ध इति गीयते । तेन विषयविशेषसम्बद्धमेवान्तःकरणं चैतन्यस्यावच्छेदकं कर्मकारकमपि प्रधानक्रियासिद्धौ स्वव्यापाराविष्टं चैतन्यविवर्त्तत्वात्प्रधानक्रियाहितप्रमात्रवस्थाविशेषावच्छिन्नापरोक्षतैकरूपामपरोक्षतामभिव्यनक्ति ततश्चात्मनो ऽन्तःकरणा ¶ वस्थाविशेषोपाधिजनितो विशेषो विषयानुभवसंशब्दितो विषयस्यापरोक्षैकरसः फलमिति क्रियैकविषयताफलस्य युज्यते । एवं चाहङ्कर्त्ता स्वांशचैतन्यबलेन व्यापाराविष्टतया च प्रमातेति बुद्धिस्थमर्थं पुरुषश्चेतयत इत्युच्यते । तत्र च प्रमातुः स्वयंज्योतिषो विषयसम्बन्धसञ्जातविशेषो ऽनुभवो ऽपरोक्षतया सर्वान् प्रत्यऽविशिष्टोऽपि कारकाणां सम्भूय प्रधानक्रियासाधनत्वाद्येन सह साधनं तन्निष्ठ एव नान्यत्र कर्मकारकमपि येन सह साधनं तस्यैवापरोक्षम् गन्तृसम्बन्ध इव ग्रामस्य ।

---

* अवगम इति २ पु॰ ।
† सज्यत इति क्वचित् ।
‡ उपेत्यधिकं २ पु॰ ।
§ चशब्दो ऽत्राधिकः २ पु॰ ।
|| सम्बन्धादिति २ पु॰ ।
¶ अन्तःकरणस्यावस्थाविशेष इति पुस्तकान्तरे ।

ननु नीलादिविषयेऽपि चेदपरोक्षस्वभावो नीलात्मिका संविदित्युक्तं स्यात्। अतः स एव * माहायानिकपक्षः समर्थितः। मैवम्। परस्परव्यावृत्तौ नीलपीतावभासेते अपरोक्षता तु न तया एकरूपावगमाद्विच्छेदावभासे ऽप्यतो न तत्स्वभावा। यदि स्यात्तद्वदेव व्यावृत्तस्वभावता ऽप्यवभासेत। न तथा।

किंच। तैरपि नीलात्मकसंविदो ऽन्य एव पराग्व्यावृत्तो ऽपरोक्षः प्रत्यगवभासः स्वरूपमात्रे पर्यवसितो विकल्प उपेयते प्रतीयते च नीलसंवित् † प्रत्यग्व्यावृत्तेदन्तया ‡ ग्राह्यरूपा ततश्च वस्तुद्वयं ग्राह्यग्राहकरूपमितरेतरव्यावृत्तं सिद्धम्। नैतत्। द्वयोरपि स्वरूपमात्रनिष्ठयोः कुतो विषयविषयिभावः। कथं पुनरिदमहं जानामीति तयोर्ग्राह्यग्राहकतावभासः। नायं तदवभासः किन्त्वहमिति इदमिति जानामीति च परस्पर § व्यावृत्ताः विकल्पा एते। कथं पुनस्तेषु कटाक्षेणाप्य ‖ न्योन्यमनीक्षमाणेष्वयं सम्बन्धावगमः। तद्वासनासमेतसमनन्तरप्रत्ययसमुत्थं सङ्कलनात्मकं प्रत्ययान्तरमेतन्नेह सम्बन्धावगमः। किं पुनरेवमनुभवानारूढामेव प्रक्रियां विरचयति भवान्। क्षणविध्वंसिनः क्रियानुपपत्तेः। स्थायित्वे हि सत्यऽहमुल्लेख्यस्य स्थायिनैव नीलादिना क्रियानिमित्तः सम्बन्धस्ततश्च क्रियानिमित्तैव नीलादेरप्यपरोक्षता स्यात् न च स्थायित्वमस्ति। यद्येवमहमिति संविदः प्रतिक्षणं स्वलक्षणभेदेन भाव्यम्। स किं विद्यते नवेति स्वसंविदमगूहमानै ¶ रेवाभिधीयताम्। अथात्यन्तसादृश्यान्न ** भेदो ऽवभासत इति संविदो ऽपि चेत् स्वरूपं नावभासते आयातमान्ध्यम †† शेषजगतः।

अपि च। तद्रूपप्रतिभासे सादृश्यकल्पना प्रमाणविरुद्धा ‡‡ निष्प्रमाणिका च। तद्रूपप्रतीतेर्व्यामोहत्वान्न प्रमाणविरुद्धता §§ नाप्यप्रामाणिकता निर्बीजभ्रान्त्ययोगादिति चेत् नेतरेतराश्रयत्वात्। ‖‖ सिद्धे व्यामोहे सादृश्यसिद्धिः

---

* महायानिकेति १ पु०, अतस्त्वयैव महायानिकेति ३ पु०।

† अत्र तुशब्दोऽधिकः २ पु०। ‡ ग्राह्यैकरूपेति २ पु०। § व्यावृत्त्येति २ पु०

‖ अन्योन्यमीक्षमाणेष्विति १ पु०, अन्योन्यमनिरीक्षमाणेष्विति ३ पु०।

¶ एवकारो नास्ति १, २ पु०।

** न भेदोऽवभासत इति संविदोऽपि स्वरूपं नावभासेत आयातमिति ३ पु०।

†† अशेषस्येति २, ३ पु०।

‡‡ निःप्रमाणकी चेति १ पु०, निष्प्रामाणिकी चेति ३ पु०।

§§ नाप्यप्रमाणिकत्वं चेति १ पु०, नाप्रामाणिकतेति २ पु०।

‖‖ सिद्धे व्यामोहत्वे-इत्युपकल्पितं ३ पु०।

प्रमाणविरोधाभावात्प्रमाणसद्भावाच्च । सिद्धे च सादृश्ये * तन्निमित्ता † व्यामोह-सिद्धिः । स्यादेतत् । अव्यामोहे ऽपि तुल्यमेतत् । सिद्धे हि सादृश्यकल्पनाया ‡ अप्रामाणिकत्वे प्रमाणविरोधे च तद्रूपप्रतीतेरव्यामोहत्वम् अव्यामोहत्वे चास्याः सादृश्यकल्पनायाः निष्प्रमाणकत्वं प्रमाणविरोधश्च । नैतत् । स्वारसिकं हि प्रामाण्यं प्रतीतेरनपेक्षम् । तथा च तत्प्रामाण्यात्सादृश्यकल्पना § निष्प्रामाणिकी प्रमाणविरुद्धा च । न तु सादृश्यकल्पना स्वतःसिद्धा येन प्रामाण्यमावहेदप्रामाण्यपूर्विकैव सा । अथान्ते क्षयदर्शनादादौ क्षयानुमानम् अतो भिन्नत्वात्सादृश्यकल्पनेति । आदौ सत्तादर्शनादन्तेऽपि सा किं नानुमीयते । क्षयानुभवविरोधादिति चेत् इहापि तद्रूपस ‖ स्वानुभवविरोधः । न ह्युभयोरनुभवयोः कश्चिद्विशेषः ।

अथ मन्येत यो ऽसौ स्थिरत्वेनाभिमतो ऽहमुल्लेखः स किं कांचिदर्थक्रियां कुर्याद्वा न वा । यदि न कुर्यादसल्लक्षणप्राप्तेर्न परमार्थवस्तु । अथ कुर्यात् न तर्हि स्थायी । स्थायिनो ऽर्थक्रियाऽयोगात् । कथमयोगः । इत्थमयोगः । स तां कुर्वन् क्रमेण ¶ कुर्याद्यौगपद्येन वा । न तावत्क्रमेण । पूर्वोत्तरकालयोरस्य विशेषाभावे ऽपि किमिति पूर्वस्मिन्नेव काले उत्तरकालभाविनीमपि न कुर्यात् । नापि यौगपद्येन । यावज्जीवकृत्यमेकस्मिन्नेव क्षणे कृतमित्युत्तरकाले तद्विरहादसल्लक्षणप्राप्तेः । अतो ऽर्थक्रियाकारित्वादेव न स्थायी । तेन प्रतिक्षणं भिन्नेष्वहमुल्लेखेषु तद्बुद्धिः सादृश्यनिबन्धनेति । उच्यते । अथ केयमर्थक्रिया यदभावादसल्लक्षण ** त्वप्राप्तिः । स्वविषयज्ञानजननम् । प्राप्तं तर्हि सर्वासामेव संविदां स्वसंविदितरूपत्वेन स्वविषयज्ञानाजननादसल्लक्षणत्वम् । न सन्तानान्तरे ऽपि तज्जननम् अनैन्द्रियकत्वात् अनुमाने ऽप्यर्थजन्यत्वाभावा ††-त्सार्वज्ञ्येऽपि न साक्षात्स्वसंविदं जनयति संसारसंविदेकरूपत्वप्रसङ्गात् अतद्रूपत्वे तद्विषयत्वायोगात् । अथ क्षणान्तरोत्पादो ऽर्थक्रिया । चरमक्षणस्यासल्लक्षणत्वप्रसङ्गः । न च सर्वज्ञज्ञानजननेनार्थवत्त्वम् । चरमत्वानुपपत्तेः

---

* तन्निमित्तव्यामोहेति २ पु॰ ।
† व्यामोहत्वेत्युपकल्पितं ३ पु॰ ।
‡ अप्रमाणकत्वे–इति २ पु॰ ।
§ निःप्रमाणिकेति २ पु॰ ।
‖ सत्तानुभवेति २ पु॰ ।
¶ क्रमेण वा कुर्यादिति २ पु॰ ।
** त्वशब्दोनास्ति २ पु॰ ।
†† न सार्वज्ञेऽपि साक्षादिति २ पु॰, न सार्वज्ञेऽपि ज्ञाने साक्षादिति ३ पु॰ ।

मुक्त्यभावप्रसङ्गात् । न च संवित्संविदो विषयः संविदात्मना भेदाभावात्प्रदीपस्येव प्रदीपान्तरम् । किञ्च । नार्थक्रियातः सत्त्वं भवति स्वकारणनिष्पन्नस्य कार्यजननात् । अतः प्रतीतिर्वक्तव्या । तच्च तस्या * अन्यतः सत्त्वप्रतीतिस्तस्या अप्यन्यत इत्यनवस्थानान्न क्वचित्सत्तावगम इति शून्यं जगदभविष्यत् । ननु स्वज्ञानार्थक्रियायाः स्वयंसिद्धत्वान्नानवस्था । न तर्ह्यर्थक्रियातः सत्तावगमः । न हि स्वरूपमेव स्वस्यार्थक्रिया ।

यत्पुनः क्रमेणार्थक्रिया न युज्यते पूर्वोत्तरकालयोस्तस्य † विशेषाभावादिति । नैष दोषः । स्थायिनो ऽपि कारणस्य सहकारिसव्यपेक्षस्य जनकत्वात् विशेषाभावादित्ययुक्तम् । अथ कारणस्यान्यापेक्षा न युक्ता अकारणस्याऽपि नतरामित्यसहकारि विश्वं स्यात् । अथाकारणं कारणोत्पत्तयेऽपेक्षत इति चेत् अथ तत्कारणस्य कारणम ‡ कारणं वा । कारणं चेन्नापेक्षितुमर्हति अकारणं चेन्नतराम् । अथ नापेक्षा हेतूनां सहकारिणीति ब्रूयाद्दर्शनेन बाध्येत । दृष्टं हि सहकार्यपेक्षत्वं हेतूनाम् । तस्माद्यथैव हेतोर्हेतुत्वं सति कार्ये केनाप्यतर्कणीयेन क्रमेण ज्ञायते सत्येव हेतौ कार्यस्य दर्शनात्तथा समेतसहकारिण्येव दर्शनात्सहकार्यपेक्षस्य तद्विज्ञेयम् ।

यस्तु मन्यते सहकारिजनितविशेषो हेतुः कार्यं जनयति अन्यथा ऽनुपकारिणो ऽपेक्षायोगादिति । स वक्तव्यो विशेषस्य स हेतुरहेतुर्वा । अहेतुश्चेद्विशेषोत्पत्तौ ना § पेक्ष्येत तच्च केवला एव सहकारिणो विशेषमुत्पादयेयुस्ततश्च कार्यं स्यात् । अथ हेतुः सहकारिभिरजनितविशेषस्तमेव कथं कुर्याद् विशेषस्य वा जननेऽनवस्था । अथ मतम् । न सर्वं कार्यं सहकारिभिरजनितात्मभेदहेतुजन्यम् समग्रेषु हेतुषु तावत्येवाभवदङ्कुरादि तथा किञ्चि ‖ त्सन्निहितसहकारिहेतुजन्यं यथा ऽक्षेपकारीन्द्रियादिज्ञानम् । तत्राद्यो विशेषः सहकारिसन्निधानमात्रलभ्यः अक्षेपकारीन्द्रियादिज्ञानवदिति नानवस्था । अनुपकुर्वन्नपि तर्हि सहकार्यपे ¶ क्ष्येत न हि तत्र हेतोः सहकारिभ्य आत्मभेदः । मानुप-

---

* अपिशब्दोऽधिकः २ पु० ।
† विशेषस्याभावादिति २ पु० ।
‡ अथाऽकारणमिति २ पु० ।
§ अपेक्षेतेति २ पु० ।
‖ तुशब्दो ऽधिकः २ पु० ।
¶ अपेक्ष्यते-इत्युपकल्पितं २ पु० ।

प्रमाणविरोधाभावात्प्रमाणसद्भावाच्च । सिद्धे च सादृश्ये * तन्निमित्ता † व्यामोह-सिद्धिः । स्यादेतत् । अव्यामोहे ऽपि तुल्यमेतत् । सिद्धे हि सादृश्यकल्पनाया ‡ अप्रामाणिकत्वे प्रमाणविरोधे च तद्रूपप्रतीतिरव्यामोहत्वम् अव्यामोहत्वे चास्याः सादृश्यकल्पनायाः निष्प्रमाणकत्वं प्रमाणविरोधश्च । नैतत् । स्वारसिकं हि प्रामाण्यं प्रतीतेरनपेक्षम् । तथा च तत्प्रामाण्यात्सादृश्यकल्पना § निष्प्रामाणिकी प्रमाणविरुद्धा च । न तु सादृश्यकल्पना स्वतःसिद्धा येन प्रामाण्यमावहेदप्रामाण्यपूर्विकैव सा । अथान्ते क्षयदर्शनादादौ क्षयानुमानम् अतो भिन्नत्वात्सादृश्यकल्पनेति । आदौ सत्तादर्शनादन्तेऽपि सा किं नानुमीयते । क्षयानुभवविरोधादिति चेत् इहापि तद्रूपस ‖ स्वानुभवविरोधः । न ह्युभयोरनुभवयोः कश्चिद्विशेषः ।

अथ मन्येत यो ऽसौ स्थिरत्वेनाभिमतो ऽहमुल्लेखः स किं कांचिदर्थक्रियां कुर्याद्वा न वा । यदि न कुर्यादसल्लक्षणप्राप्तेर्न परमार्थवस्तु । अथ कुर्यात् न तर्हि स्थायी । स्थायिनो ऽर्थक्रियाऽयोगात् । कथमयोगः । इत्थमयोगः । स तां कुर्वन् क्रमेण ¶ कुर्याद्यौगपद्येन वा । न तावत्क्रमेण । पूर्वोत्तरकालयोस्तस्य विशेषाभावे ऽपि किमिति पूर्वस्मिन्नेव काले उत्तरकालभाविनीमपि न कुर्यात् । नापि यौगपद्येन । यावज्जीवकृत्यमेकस्मिन्नेव क्षणे कृतमित्युत्तरकाले तद्विरहादसल्लक्षणप्राप्तेः । अतो ऽर्थक्रियाकारित्वादेव न स्थायी । तेन प्रतिक्षणं भिन्नेष्वहमुल्लेखेषु तद्बुद्धिः सादृश्यनिबन्धनेति । उच्यते । अथ केयमर्थक्रिया यदभावादसल्लक्षण ** त्वप्राप्तिः । स्वविषयज्ञानजननम् । प्राप्तं तर्हि सर्वासामेव संविदां स्वसंविदितरूपत्वेन स्वविषयज्ञानाजननादसल्लक्षणत्वम् । न सन्तानान्तरे ऽपि तज्जननम् अनैन्द्रियकत्वात् अनुमाने ऽप्यर्थजन्यत्वाभावा ††-त्सार्वज्ञ्येऽपि न साक्षात्स्वसंविदं जनयति संसारसंविदेकरूपत्वप्रसङ्गात् अतद्रूपत्वे तद्विषयत्वायोगात् । अथ क्षणान्तरोत्पादो ऽर्थक्रिया । चरमक्षणस्यासल्लक्षणत्वप्रसङ्गः । न च सर्वज्ञज्ञानजननेनार्थवत्त्वम् । चरमत्वानुपपत्तेः

---

* तन्निमित्तव्यामोहेति २ पु॰ ।

† व्यामोहत्वेत्युपकल्पितं ३ पु॰ ।

‡ अप्रमाणकत्वे–इति २ पु॰ ।

§ निःप्रमाणिकेति २ पु॰ ।

‖ सत्तानुभवेति २ पु॰ ।

¶ क्रमेण वा कुर्यादिति २ पु॰ ।

** त्वशब्दोनास्ति २ पु॰ ।

†† न सार्वज्ञ्येऽपि साक्षादिति २ पु॰, न सार्वज्ञ्येऽपि ज्ञाने साक्षादिति ३ पु॰ ।

मुक्त्यभावप्रसङ्गात् । न च संवित्संविदो विषयः संविदात्मना भेदाभावात्प्रदीपस्येव प्रदीपान्तरम् । किञ्च । नार्थक्रियातः सत्त्वं भवति स्वकारणनिष्पन्नस्य कार्यजननात् । अतः प्रतीतिर्वक्तव्या । तच्च तस्या * अन्यतः सत्त्वप्रतीतिस्तस्या अप्यन्यत इत्यनवस्थानान्न क्वचित्सत्तावगम इति शून्यं जगदभविष्यत् । ननु स्वज्ञानार्थक्रियायाः स्वयंसिद्धत्वान्नानवस्था । न तर्ह्यर्थक्रियातः सत्तावगमः । न हि स्वरूपमेव स्वस्यार्थक्रिया ।

यत्पुनः क्रमेणार्थक्रिया न युज्यते पूर्वोत्तरकालयोस्तस्य † विशेषाभावादिति । नैष दोषः । स्थायिनो ऽपि कारणस्य सहकारिसव्यपेक्षस्य जनकत्वात् विशेषाभावादित्ययुक्तम् । अथ कारणस्यान्यापेक्षा न युक्ता अकारणस्याऽपि नतरामित्यसहकारि विश्वं स्यात् । अथाकारणं कारणोत्पत्तयेऽपेक्षत इति चेत् अथ तत्कारणस्य कारणम् ‡ कारणं वा । कारणं चेन्नापेक्षितुमर्हति अकारणं चेन्नतराम् । अथ नापेक्षा हेतूनां सहकारिणीति ब्रूयाद्दर्शनेन बाध्येत । दृष्टं हि सहकार्यपेक्षत्वं हेतूनाम् । तस्माद्यथैव हेतोर्हेतुत्वं सति कार्ये केनाप्यतर्कणीयेन क्रमेण ज्ञायते सत्येव हेतौ कार्यस्य दर्शनात्तथा समेतसहकारिण्येव दर्शनात्सहकार्यपेक्षस्य तद्विज्ञेयम् ।

यस्तु मन्यते सहकारिजनितविशेषो हेतुः कार्यं जनयति अन्यथा ऽनुपकारिणो ऽपेक्षायोगादिति । स वक्तव्यो विशेषस्य स हेतुरहेतुर्वा । अहेतुश्चेद्विशेषोत्पत्तौ ना§पेक्ष्येत तच्च केवला एव सहकारिणो विशेषमुत्पादयेयुस्ततश्च कार्यं स्यात् । अथ हेतुः सहकारिभिरजनितविशेषस्तमेव कथं कुर्याद् विशेषस्य वा जननेऽनवस्था । अथ मतम् । न सर्वं कार्यं सहकारिभिरजनितात्मभेदहेतुजन्यम् समग्रेषु हेतुषु तावत्येशाभवदङ्कुरादि तथा किञ्चि ‖ त्सन्निहितसहकारिहेतुजन्यं यथा ऽक्षेपकारीन्द्रियादिज्ञानम् । तत्राद्यो विशेषः सहकारिसन्निधानमात्रलभ्यः अक्षेपकारीन्द्रियादिज्ञानवदिति नानवस्था । अनुपकुर्वन्नपि तर्हि सहकार्यपे ¶ क्ष्येत न हि तत्र हेतोः सहकारिभ्य आत्मभेदः । मानुप-

---

* अपिशब्दोऽधिकः २ पु· ।
† विशेषस्याभावादिति २ पु· ।
‡ अथाऽकारणमिति २ पु· ।
§ अपेक्षेतेति २ पु· ।
‖ तुशब्दो ऽधिकः २ पु· ।
¶ अपेक्ष्यते–इत्युपकल्पितं २ पु· ।

कुर्व * न्नपेक्ष्यते ऽतिप्रसङ्गात् स्वरूपे तु नोपकारोति किन्तु कार्ये तत्सिद्धेस्त-न्नान्तरीयकत्वात् । नित्ये। ऽपि तर्ह्यनाधेयातिशये। भावः कार्यसिद्धये क्षणिक इव सहकारिणमपेक्षत इति किन्नाभ्युपेयते । यथैव क्षणिको भावः सहकारिस-मवधान एव कार्यं जनयति सामग्रीसाध्यत्वात्तथा नित्ये। ऽपि स्वरूपानुपयो-गित्वे ऽपि सहकारिसमवधानं कार्योपयोगादपेक्षेत । अथ मतं क्षणिकोऽपि नैवापेक्षते ऽन्यजनकस्य स्वयमन्यापेक्षानुपपत्तेः । कार्यं तु यदन्यसन्निधो भवति तत्तस्यान्यसन्निधावेव भावादन्यथा चाभावान्नित्यस्य तु जनकस्य सर्वदा † जननप्रसङ्गः । के। हेतुरन्यापेक्षायाः । क्षणिकस्तु ये। जनके। भावः स न पुरस्तान्न पश्चादिति न ‡ पूर्वोत्तरकालयोः कार्योत्पादः ।

इदमयुक्तम् वर्त्तते । किमत्रायुक्तम् । सति नियमे § ऽपि निरपेक्ष-त्वम् । तथाहि । यः कश्चित् कस्यचित् क्वचिन्नियमः स ‖ तदपेक्षाप्रभावितः अनपेक्षत्वे नियमानुपपत्तेः । एवं हि कार्यकारणभावसिद्धिः । कार्यार्थिभिश्च विशिष्टानां हेतूनामुपादानम् तत्र यदि न क्षणिकं कारणं सहकारिणमपेक्षते नापि तत्कार्यं कथं ¶ नियमः । तथाहि । हेतुपरम्पराप्रतिबन्धान्न हेतुः स्वरूपे सहकारिणमपेक्षते न कार्ये स्वयंजननशक्तेः । नापि कार्यम् एकस्यापि शक्तिमत्त्वेन प्रसह्यजननात्तत्र सहकारिसन्निधिनियमो ऽनर्थकः स्यात् । काक-तालीयमुच्यते । तथाच कार्यकारणव्यवहाराः सर्वं एवोत्सीदेयुः । तस्मात् क्षणिकस्यापि भावस्य स्वयंजनकस्य स्वरूपानुपयोगिन्यपि सहकारिणि कार्य-सिद्धये ऽपेक्षा वाच्या कार्यस्यैव वा सामग्रीसाध्यत्वात्तत्र नियमात् तथा नित्येपीति न विशेषं पश्यामः ।

तदेवमहंकर्तुः ** सदैकरूपावगमात्स्थायित्वे ऽप्यर्थक्रियासम्भवान्न नीलस्य स्वगतापरोक्षत्व †† मात्रेण ‡‡ माहायानिकपक्षः समर्थ्यते । किन्तु ग्राहकस्याहङ्कर्तुरात्मनः स्थायिनो ऽभावे । स चैकरूपो ऽनुभवाद्युक्तिबलाच्च प्रसाधितः । ननु नानुमेयादिष्वपरोक्षता दृश्यते । उच्यते । नानुमेयादिष्व-

---

* अपेक्षते-इति ३ पु॰ ।
† जननप्रसङ्गात् को हेतुरिति ३ पु॰
‡ नः-इति २ पु॰ ।
§ अपिशब्दो नास्ति ३ पु॰ ।
‖ तदपेक्षः प्रभावितइत्युपकल्पित ३ पु॰ ।
¶ कथं सन्निधिनियम इति २ पु॰ ।
** सदैकरूपत्वावगमादिति २ पु॰ ।
†† त्वशब्दो नास्ति २ पु॰ ।
‡‡ महायानिकेति १ पु॰ ।

परोक्षत्वं स्वज्ञानोत्पत्तावव्यापृतत्वात् । लिङ्गादीनामेव कुतश्चित्सम्बन्धविशेषाद्विशिष्टैकार्थज्ञानहेतुत्वात् । प्रमेयस्य ‖ स्वज्ञानोत्पत्तिहेतुत्वे प्रमाणाभावात् । अलं प्रसङ्गागतप्रपञ्चेन स्वावसर एवैतत्सुगतमतपरीक्षायां निपुणतर ¶ मप्रपञ्चयिष्यामः ।

तदेवमहङ्कारग्रन्थिरस्मच्छ * ब्दसंशब्दितः प्रत्ययश्चासावादर्श इव प्रतिविम्बस्यानिदञ्चित्सम्वलितत्वेन तस्याभिव्यक्तिहेतुत्वात् । अतस्तस्य विषयवद्भवतीत्युपचारेणानिदञ्चिदात्मधातुरस्मत्प्रत्ययविषय उच्यते । स पुनरेवम्भूतो जाग्रत्स्वप्नयोरहमुल्लेखरूपेण सुषुप्ते † तत्संस्काररञ्जिताग्रहणाविद्याप्रतिबद्धप्रकाशत्वेन च गतागतमाचरन् संसारी जीवो विज्ञानघनो विज्ञानात्मा प्राज्ञः शरीरी शारीर आत्मा सम्प्रसादः पुरुषः प्रत्यागात्मा कर्ता भोक्ता क्षेत्रज्ञ इति च श्रुतिस्मृतिप्रवादेषु गीयते । किञ्च । न केवलमस्मत्प्रत्ययविषयत्वादध्यासार्हः अपरोक्षत्वाच्च । तत्साधनार्थमाह प्रत्यगात्मप्रसिद्धेरिति । न ह्यात्मन्य ऽप्रसिद्धे स्वपरसंवेद्ययोर्विशेषः । न च संवेद्यज्ञानेनैव तत्सिद्धिरकर्मकारकत्वादतिप्रसङ्गात् । न च ज्ञानान्तरेण । भिन्नकालत्वे संवेद्यसम्बन्धानवगमात्स्वपरसंवेद्याविशेषात् । न ह्येककालं विरुद्धविषयद्वय ‡ ग्राहिज्ञानद्वयोत्पादः । न हि देवदत्तस्याग्रपृष्ठदेशस्थितार्थव्यापिगमनक्रियाद्वयावेशो युगपद्दृश्यते । आह । माभूच्चलनात्मकं क्रियाद्वयं युगपत् परिणामात्मकं तु भवत्येव । मैवम् । परिस्पन्दात्मकमपि भवत्यऽविरुद्धं यथा गायन् गच्छतीति । परिणामात्मकमपि न भवति विरुद्धम् यथा यौवनस्थाविरहेतुः । तस्मात्प्रत्यगात्मा स्वयंप्रसिद्धः सर्वस्य हानोपादानावधिः स्वयमहेयो ऽनुपादेयः स्वमहिम्नैवापरोक्षत्वादध्यासयोग्यः ॥

ननु न क्वचिदपरोक्षमात्रेऽध्यासो § दृष्टपूर्वः सर्वत्राक्षिसम्प्रयोगितया पुरोवस्थितापरोक्ष एव दृश्यते इत्याशङ्क्याह न चायमस्ति नियम इति । अप्रत्यक्षे ऽपि ह्याकाश इति परोक्ष इत्यर्थः । अथवा अक्षव्यापारमन्तरेणाप्य-

---

* प्रदर्शयिष्याम इति ३ पु· ।

† तुशब्दोऽत्राधिकः ३ पु· ।

‡ विषयग्राहीति १ पु· ।

§ पूर्वशब्दो नास्ति २ पु· ।

‖ प्रमेयस्य चेति २ पु· ।

¶ शब्देति नास्ति २ पु· ।

परोक्ष आकाशे बाला अयथार्थदर्शिन * स्तलमिन्द्रनीलतमालपत्रसदृशं मलिनताञ्च धूमादिकमन्यच्च नीलोत्पलसमानवर्णताद्यऽध्यस्यन्ति एवमविरुद्ध इति सम्भाषनां निगमयति । यथा ऽऽकाशस्याक्षव्यापारमन्तराप्यपरोक्षता तथा दर्शयिष्यामः ।

ननु ब्रह्मविद्यामनर्थहेतु † निबर्हणीं प्रतिजानता ऽविद्यानर्थहेतुः सूचिता । ततः सैव कर्तृत्वाद्यनर्थबीजमुपदर्शनीया किमिदमध्यासः प्रपञ्च्यते इत्याशङ्क्याह तमेतमेवंलक्षणमध्यासं पण्डिताः प्रमाणकुशला अविद्येति मन्यन्ते तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः । अध्यस्तातद्रूपसर्पविलयनं कुर्वद्वस्तुस्वरूपं रज्जुरेवेत्यवधारयद् विज्ञानं विद्येति प्रसिद्धमेव लोके ब्रह्मविदो वदन्ति । यद्येवमध्यास इति प्रक्रम्य पुनस्तस्याविद्याभिधानव्याख्याने यत्नगौरवाद्वरमविद्येत्येवोपक्रमः कृतः । नैतत्सारम् अथैवविद्येत्येवोच्यमाने आच्छादकत्वं नाम यत्तस्यास्तत्त्वं तदेवाऽभिहितं स्यान्नातद्रूपावभासितया ऽनर्थहेतुत्वम् अतो ऽतद्रूपावभासित्वमध्यासशब्देन प्रकृतोपयोगितयोपक्षिप्य पुनस्तस्याविद्याशब्दतया विद्यामात्रा ‡ पनोदनार्हत्वं दर्शनीयम् तदेतदाह यत्र यदध्यासस्तत्कृतेन दोषेण गुणेन वा ऽणुमात्रेणाऽपि स न सम्बध्यत इत्यवास्तवमनर्थं दर्शयति । वास्तवत्वे हि न ज्ञानमात्रात्तद्विगम इति प्रतिज्ञा हीयेत ।

एवम् तावद्युष्मदस्मदित्यादिना मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्याहमिदं ममेदमिति § नैसर्गिको ऽयं लोकव्यवहार इत्यन्तेन भाष्येण सिद्धवदुपन्यस्तमात्मानात्मनोरितरेतरविषयमविद्याख्यमध्यासं सिषाधयिषुस्तस्य लक्षणमभिधाय तत्सम्भवं चात्मनि दर्शयित्वा पुन ‖ स्तत्र सद्भावनिश्चयमुपपत्तित उपपादयितुमिच्छन्नाह तमेतमविद्याख्यमात्मनात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहाराः लौकिकाः ¶ वैदिकाश्च प्रवृत्ताः सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणीति । मोक्षपरत्वं च शास्त्रस्य

---

* तलमिन्द्रनीलमातपत्रसदृशं मलितां च धूमादि अन्यच्च नीलोत्पलसमानवर्णतामप्यध्यस्यन्तीति २ पु॰ ।

† निबर्हिणीमिति ३ पु॰ ।

† अन्तरेणेति २ पु॰ ।

‡ अपनोदार्हत्वमिति १, २ पु॰ ।

§ नैसर्गिको योऽयमिति ३ पु॰ ।

‖ पुनस्तत्सद्भावनिश्चयमिति २ पु॰ ।

¶ वैदिकाश्चेति नास्ति ३ पु॰ ।

विधिप्रतिषेधविरहिततयोपादानपरित्यागशून्यत्वात्स्वरूपमात्रनिष्ठत्वमङ्गीकृत्य पृथक् क्रियते । कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति । बाढमुक्तलक्षणाविद्या प्रत्यग्दृश्यपि सम्भवेन्नैतावता तत्स*-म्भवः सिध्यति तेन निदर्शनीयः सः । प्रमातारमाश्रयन्ति प्रमाणानि तेन प्रमाता प्रमाणानामाश्रयो नाविद्यावान् अनुपयोगादित्यभिप्रायः । अथवा । कथमविद्यावद्विषयाणि प्रत्यक्षादीनि शास्त्राणि † च प्रमाणानीति सम्बन्धः । अविद्यावद्विषयत्वे सत्यऽऽश्रयदोषानुगमादप्रमाणान्येव स्युरित्याक्षेपः । उच्यते । देहेन्द्रियादिष्वहंममाभिमानहीनस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेरिति भाष्यकारस्य वस्तुसंग्रहवाक्यम् अस्यैव प्रपञ्चो नहीन्द्रियाण्यनुपादाये ‡ त्यादिः । न हि देहेन्द्रियादिष्वहंममाभिमानहीनस्य सुषुप्तस्य प्रमातृत्वं दृश्यते । यतो देहे ऽहमभिमानः इन्द्रियादिषु ममाभिमानः आदिशब्देन बाह्याद्यवयवग्रहणम् । देहशब्देन सशिरस्को मनुष्य § त्वादिजातिसम्भिन्नो ऽवयव्यभिमतो न शरीरमात्रम् देहो ऽहमिति प्रतीत्यऽभावात्सर्वो हि मनुष्यो ऽहं देवो ऽहमिति जातिविशेषैकाधिकरणे ‖ चैतन्ये एव ¶ प्रवर्तते इति स्वसाक्षिकमेतन्न स्वत्वेन संबन्धिना मनुष्यावयविना तदनुस्यूतेन वा चक्षुरादिना प्रमात्रादिव्यवहारः सिध्यति । भृत्यादिमनुष्यावयविनापि प्रसङ्गात् ।

अपर आह । आत्मेच्छानुविधायित्वं कार्ये ** कारणसंघातस्यात्मना सम्बन्धस्तस्यापि तस्य यथेष्टविनियोजकत्वं तेन सम्बन्धस्तत आत्मनः प्रमात्रादिकः सर्वः क्रियाकारकफलव्यवहारस्तथा चोत्तिष्ठामीति इच्छयोत्तिष्ठत्युपविशति च । नच भृत्यादिषु तदस्ति । तेन तत्र प्रमात्रादिव्यवहाराभावो न मिथ्या मुख्याभिमानाभावादिति । नैतत् संविदि बहुमानवतो युक्तम् । तथाहि । मनुष्योऽहमिति स्वसाक्षिका संवित् न मे मनुष्य इति । गौणोति चेद्भवानेवात्र †† प्रमाणम् । अपि ‡‡ च । इच्छापि परिणामविशेषः स कथमपरिणामिन आत्मनः स्यात् परिणाम्यन्तःकरणसम्वलिताऽहङ्कर्तृ-

---

* तत्सद्भाव इति २ पु० ।

‡ इत्यादि-इति १, ३ पु० ।

‖ समासो २ पु० ।

** करणेति २ पु० ।

‡‡ अपि चेदिच्छापीति १ पु० ।

† च शब्दो नास्ति ३ पु० ।

§ त्वप्रत्ययो नास्ति १, २ पु. ।

¶ प्रवृत्त इति ३ पु० ।

†† भवानेव प्रमाणमिति २ पुस्तके

त्वमन्तरेण । तथा चानुभवो ऽहमुत्तिष्ठामीति इच्छयोत्तिष्ठत्युपविशति च । तस्माद्यत्किञ्चिदेतत् । अतः स्वयमसङ्गस्याविकारिणोऽविद्याध्यासमन्तरेण न प्रमातृत्वमु * पपद्यते । तेन यद्यपि प्रमातृत्वशक्तिसन्मात्रं प्रमाणप्रवृत्तौ निमित्तम् । तदेव त्वविद्याध्यासविलसितमित्यविद्यावद्विषयता प्रमाणाना † मुच्यते । तथा निरपेक्षाणां स्वसामर्थ्येनार्थसिद्धिं विदधतां बाधानुपलब्धेः प्रामाण्यमविद्यावद्विषयत्वं च विधिमुखेोपदर्शितं न नेति शक्यमपह्नोतुम् । दोषस्त्वागन्तुक एव मिथ्यात्वे हेतुर्न नैसर्गिकस्तथोपलब्धेः । न च सर्वसाधारणे नैसर्गिके दोषबुद्धिस्तथाहि क्षुत्पिपासोपजनिते सन्तापे शश्वदनुवर्तमाने जाठराग्निकृतविकारे ऽन्नपाननिष्पन्दे वा न रोगबुद्धिर्जनस्य । मुहूर्तमात्रपरिवर्त्तिनि मन्दे ज्वरे प्रतिश्याये वाऽल्पकफप्रसूतावपि रोगबुद्धिरनैसर्गिकत्वात् । अनैसर्गिकं च दोषमभिप्रत्योक्तं यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनः ‡ प्रत्ययो नान्य इति ।

इतश्चैतदेवं पश्वादिभिश्चाविशेषात् । तथाच पश्वादयः प्रमातृत्वादिव्यवहारकाले प्रवृत्तिनिवृत्त्यौदासीन्यं भजमानाः कार्यकारणसंघात एवाहंमानं कुर्वन्तीति प्रसिद्धं लोके । तदेकरूपयोगक्षेमा हि मनुष्या जन्मत एव पश्वादिभ्यो ऽधिकतरविवेकमतयः शास्त्राधेयसाम्परायिक § मतिसामर्थ्या अपि अतस्तदेकरूपकार्यदर्शना ‖ त्कार्यकारणसंघाते ऽप्यात्माभिमानः समानो युक्तः । ननु पश्वादीनामपि कार्य ¶ कारणसंघातेऽहङ्कारानु ** बन्ध इति कुतो ऽवसीयते येन †† सिद्धवदभिधीयते । उच्यते । प्रौढमतिभ्य एव प्रत्यक्षादिवृत्तकुशलैरात्मा व्युत्पाद्यते ऽन्यथा तदनर्थकत्वप्रसङ्गात् एवमेव प्रमाणविचारविरहं सर्वः ‡‡ संप्रतिपद्येत ॥

ननु गोपालाङ्गनादयः प्रमाणविरहमेव वर्त्तमानदेहपातेपि स्थायिनं भोक्तारं मन्यमानास्तदर्थमाचरन्ति । न । तदभिज्ञव्यवहारमात्रप्रमाणक §§ त्वात् । तथाच ते पृष्टाः कः परलोकसम्बन्धीति न विद्मो विशेषतः प्रसिद्धो लोके

---

* उपलभ्यत इति २ पु॰ ।
† प्रमाणानामित्युच्यत इति १ पु॰ ।
‡ प्रत्यय इति नास्ति २ पु॰ ।
§ मतिसमर्था अपीति ३ पु॰ ।
‖ कार्यकारणेऽपीति २ पु॰ ।
¶ करणेति २ पु॰ ।
** अनुसम्बन्धइति २ पु॰ ।
†† प्रशब्दोऽधिकः २ पु॰ ।
‡‡ प्रतिपद्यते इति २ पु॰ ।
§§ कप्रत्ययो नास्ति २ पु॰ ।

इति प्रतिब्रुवन्ति । तस्माद्युक्तमुक्तम् । पश्वादीनां च प्रसिद्धो ऽविवेकपूर्वकः प्रत्यक्षादिव्यवहारस्तत्सामान्यदर्शनाद् व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति । एवं तावत्प्रत्यक्षादीनि प्रमाणानि चक्षुरादिसाधनानि तानि च नाधिष्ठानशून्यानि व्याप्रियन्ते अधिष्ठानं च देहो न तेनानध्यस्तात्मभावेनासङ्गस्याविकारिणश्चैतन्यैकरसस्यात्मनः प्रमातृत्वमुपपद्यत इत्यनुभवारूढमविद्यावद्विषयत्वं प्रत्यक्षादीनामुपदिश्य पश्वादिव्यवहारसाम्येन कार्यतो ऽप्यापाद्य शास्त्रं पुनः प्रतिपन्नात्मविषयमेव तेन न तत्राध्यासपूर्विका प्रवृत्तिरिति विशेषमाशङ्क्य तस्याप्यविद्यावद्विषयत्वप्रदर्शनायाह शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा ऽऽत्मनः परलोकसम्बन्धमधिक्रियते इति ।

ननु फलनैयमिकनैमित्तिकप्रायश्चित्तचोदना वर्तमानशरीरपातादूर्ध्वकालस्थायिनं भोक्तारमन्तरेणापि प्रमाणतामश्नुवत एव । यथा चैतदेवं तथैक आत्मानः शरीरे ऽभावादित्यधिकरणारम्भे दर्शयिष्यामः । सत्यमेवम् । तथापि सकलशास्त्र * पर्यालोचनापरिनिष्पन्नं † प्रामाणिकमर्थमङ्गीकृत्याह ‡ भाष्यकारः । तथाच विधिवृत्तमीमांसाभाष्यकारो ऽप्युत्सूत्रमेवा § त्मसिद्धौ पराक्रान्तवान् । तत्कस्य हेतोः । धर्मजिज्ञासेति कार्यार्थविचारं प्रतिज्ञाय तदवगमस्य प्रामाण्ये ऽनपेक्षत्वं कारणमनुसरता सूत्रकारेण विशेषाभावात्स्वरूपनिष्ठानामपि वाक्यानां प्रामाण्यमनुस्मृतं ‖ मन्यते तथा चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवञ्जातीयकमर्थं शक्नोत्यवगमयितुमिति वदंश्चोदनाशेषत्वेनापि स्वरूपावगमे ऽनपेक्षत्वमविशिष्टमवगच्छतीत्यवगम्यते । स च स्वरूपावगमः कस्मिन् कथं ¶ वेति धर्ममात्रविचारं प्रतिज्ञाय तत्रैव प्रयतमानेन भगवता जैमिना न मीमांसितमुपयोगाभावाद्भगवांस्तु पुनर्बादरायणः पृथग् ** विचारं प्रतिज्ञाय व्यचीचरत् समन्वयलक्षणेन । तत्र च देहान्तरोपभोग्यः स्वर्गः स्यास्यति । तच्च सर्वं कार्यकारणसंघातादन्येन भोक्त्रा विना न सिध्यति । तत्सिद्धिश्च नागममात्रायत्ता । प्रमाणान्तरगोचरस्य तदभावे तद्विरोधे वा

* पर्यालोचनया परिनिष्पन्नमिति ३ पु॰ ।
† समासो ऽत्र २ पु॰ ।
‡ भगवानित्यधिकं ३ पु॰ ।
§ आत्मसिद्धौ-इति ३ पु॰ ।
‖ अनुस्मृतमिति २ पु॰ ।
¶ चेतीति २ पु॰ ।
** पृथक्तद्विचारमिति २ पु॰ ।

५

शिलाप्लवनवाक्यवदप्रामाण्यप्रसङ्गात् । अतस्तत्सिद्धौ पराक्रान्तवान् । तेन सत्यं विनापि तेन सिध्येत्प्रामाण्यम् । अस्ति तु तत्तस्मिन् विद्यमाने न तेन विना प्रामाण्यं सिध्यति फलादिचोदनानामिति मत्वा ऽऽह शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वात्मनः परलोकसंबन्धमधिक्रियते इति तथापि न वेदान्तवेद्यमिति ।

किं तदित्यत आह असंसार्यात्मतत्त्वं न तदधिकारेऽपेक्ष्यतेऽनुपयोगादधिकारविरोधाच्च । अशनायाद्यतीतमित्य ऽसंसार्यात्मतत्त्वं दर्शयति । अशनायाद्युपप्लुतो हि * सर्वो जन्तुः स्वास्थ्यमलभमानः प्रवर्त्तते तदपाये स्वास्थ्ये स्थितो न किंचिदुपादेयं हेयं वा पश्यति । अपेतब्रह्मक्षत्रादिभेदमिति प्रपञ्चशून्यमेकरसं दर्शयति । प्राक् च तथाभूतात्मविज्ञानात्प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्त्तत इति । तत्त्वमसीतिवाक्यार्थावगमादऽर्वागऽविद्याकृतं † संसारमहमुल्लेखमाश्रित्य प्रवर्त्तमानं शास्त्रं नाऽविद्यावद् ‡ विषयत्वमतिवर्त्तते । तस्माद्युक्तमुक्तं प्रत्यक्षादीनां प्रमाणानां शास्त्रस्य चाविद्यावद्विषयत्वम् ।

तदेव दर्शयति । तथाहि । ब्राह्मणो यजेतेत्यादीनि शास्त्राण्यात्मन्यतदध्यासमाश्रित्य प्रवर्त्तन्ते । वर्णवयोध्यासः अष्टवर्षं ब्राह्मणमुपनयीतेत्यादिः § । आश्रमाध्यासो न ह वै स्नात्वा भिक्षेतेति । अवस्थाध्यासो यो ज्योगामयावी स्यात्स एतामिष्टिं निर्वपेदिति । आदिशब्देन यावज्जीवं जुहुयादिति जीवनाध्यासः । एवमध्याससद्भावं प्रसाध्य स्मृतिरूप इत्यादिना सर्वथापि त्वन्यस्यान्यधर्मावभासतां न व्यभिचरतीत्यन्तेन भाष्येण लक्षितं निरुपचरितमतदारोपम् अध्यासो नामातस्मिँस्तद्बुद्धिरित्यवोचामेति परामृशति । कस्य युष्मदर्थस्य कस्मिन्नस्मदर्थे तद्विपर्ययेण चाध्यास इति विवेकतः प्रदर्शयितुमतस्मिन्नऽयुष्मदर्थेऽनिदंचिति तद्बुद्धिर्युष्मदर्थावभास इत्यर्थः । तदाह तद्यथा पुत्रभार्यादिष्वित्यादि ।

ननु प्रणव एव विस्वरो नहि पुत्रादीनां वैकल्यं साकल्यं वा ऽऽत्मनि मुख्यमध्यस्यति मुख्यो ह्यतदारोपो दर्शयितुं प्रारब्धः । सत्यम् । स

---

* सर्व इति २ पुस्तके नास्ति । † अविद्याकृतं रसान्तरमिति २ पु॰ पाठः ।
‡ मतुप्प्रत्ययो नास्ति १ पु॰ । § आदिशब्दो नास्ति २ पु॰ ।

एव * निदर्श्यते । कथम् । तद्यथा बालके प्रातिवेश्यमात्रसंबन्धिना केनचिद्व-स्त्रालङ्कारादिना पूजिते निरुपचरितमात्मानमेव पूजितं मन्यते पिता । पूज-यितापि पितरमेवा † पूपुजमिति मन्यते । यतो न बालकस्य पूजित ‡ त्वा-भिमानोऽव्यक्तत्वात् । तथैव राजानमुपहन्तुकामो ऽनन्तरो विजिगीषुस्त-द्राष्ट्रे ग्राममात्रमप्युपहत्य तमेवोपघ्नन्तमात्मानं मन्यते सो ऽप्युपहतोस्मी-ति संतप्यते । तदेवं प्रसिद्धव्यतिरेकस्यात्मनि मुख्य एवाध्यासो दृष्टः किमु वक्तव्यं कृशस्थूलाद्यभिमानस्य मुख्यत्वमिति कथयितुमाह अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यतीति । बाह्येषु पुत्रादिषु पूजादेर्धर्म-मात्रस्यैव युष्मदर्थस्याध्यासः ।

अस्मदर्थश्चाहंप्रत्ययिसम्भिन्न एवानिदंचिदंशो विषयो न पुनः शुद्ध एवाहंप्रत्ययिन इवाध्यासेऽध्यासान्तरानास्कन्दितस्तथा देहधर्मान् कृशत्वादा-निति धर्मिणो ऽपि धर्मशब्दस्तु मनुष्यत्वादिधर्मसमवायिन एवाध्यासो न देहोऽहमिति कथयितुं तन्निमित्तश्च शास्त्रेणेतश्चेतश्च नियमः क्रियते तथे-न्द्रियधर्मान्मूकत्वादीनिति धर्ममात्रं तथान्तःकरणधर्मान् कामादीनिति धर्म-ग्रहणमन्तःकरणमित्यहंप्रत्ययिनो विज्ञानशक्तिभागो ऽभिधीयते तस्य धर्माः कामादयः । एवमहंप्रत्ययिनमिति धर्मिग्रहणम् । प्रत्ययाः कामादयो ऽस्येति प्रत्ययी अहं चासौ प्रत्ययी चेत्यहंप्रत्ययी तमशेषस्वप्रचारसाक्षिणि प्रत्यगात्म-न्यध्यस्येति स्वशब्देनाहङ्कारग्रन्थिः संसारनृत्यशालामूलस्तम्भो ऽभिधीयते । तस्य प्रचारः कामसङ्कल्पकर्तृत्वादिरनेकविधः परिणामो यन्निमित्तं ब्रह्मादि-स्थावरान्तेषु प्रदीप्तशिरा इव परवशो जन्तुर्बम्भ्रमीति ।

तं प्रचारमशेषमसङ्गितया ऽविकारित्वेन च हानोपादानशून्यः साक्षा-दव्यवधानमवभासयति § चितिधातुः स एव देहादिष्विदन्तया बहिर्भावमाप-द्यमानेषु || प्रातिलोम्येनाञ्चतीवो ¶ पलक्ष्यते इति प्रत्यगुच्यते आत्मा च निरुपच-रितस्वरूपत्वात् । तत्राध्यस्य तं च प्रत्यगात्मानमिति । यदि युष्मदर्थस्यैव प्रत्यगात्मनि अध्यासः स्यात् प्रत्यगात्मा न प्रकाशेत न हि शुक्तौ रजताध्यासे शुक्तिः प्रकाशते प्रकाशते चेह चैतन्यमहङ्कारादौ तथा यदि चैतन्यस्यैवाहङ्का-

* निर्दिश्यते इति २ पु· । † अपुपूजमिति २ पु· । ‡ पूजिताभिमान इति २ पु· ।
§ चिद्धातुरिति २ पु· । || प्रतिलोम्येनेति २ पु· । ¶ उपलभ्यते-इति २ पु· ।

रादावध्यासो भवेत्तदा नाहङ्कारप्रमुखः प्रपञ्चः प्रकाशेत तदुभयं मा भूदित्यनुभवमेवानुसरन्नाह तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति । नाच विवदितव्यमितरेतराध्यासे पृथगवभासनान्न मिथ्यागैाणोऽयमिति तथानुभवाभावान्मुख्या * भिमानः । नहि दृष्टेऽनुपपन्नं नाम ।

नन्वन्तःकरण एव प्रत्यगात्मनः शुद्धस्याध्यासो ऽन्यच पुनश्चैतन्याध्यास † परिनिष्पन्नापरोक्ष्यमन्तःकरणमेवाध्यस्यते अत एव तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तमित्युक्तम् । अन्यथा चैतन्यमात्रैकरसस्य कुतो धर्मा ये ऽध्यस्येरन् । सत्यमाह भवान् अपि त्वन्यथान्तःकरणं सचित्कमेवाध्यस्यमानं यत्राऽध्यस्यते तस्यैवात्मनः ‡ कार्यकरत्वमापाद्य स्वयमविद्यमानमिव तिरस्कृतं तिष्ठति चिद्रूपमेव सर्वत्राध्यासे स्वतः परतो वा न विशिष्यते तेनोच्यते तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यतीति । अत एव बुद्ध्यादिष्वेव चिद्रूपमनुस्यूतमुत्प्रेक्षमाणा बुद्धिमनःप्राणेन्द्रियशरीरेष्वे § कैकस्मिँश्चेतनत्वेनाहङ्कर्तृत्वं योजयन्तो भ्राम्यन्ति । एवमयमनादिरनन्तो नैसर्गिको ऽध्यास इति निगमयति ।

ननूपन्यासकाले नैसर्गिको ऽयं लोकव्यवहार इति || लोकव्यवहारो नैसर्गिक उक्तः कथमिहाध्यासो निगम्यते ऽनादिरिति चाधिकावापः । अत्रोच्यते । तत्रापि प्रत्यगात्मन्यहङ्कारा ¶ ध्यास एव नैसर्गिको लोकव्यवहारो ऽभिप्रेतः । स च प्रत्यगात्मा ऽनादिसिद्धस्तस्मिन् नैसर्गिकस्यानादित्वमर्थसिद्धमतः प्रक्रमानुरूपमेव निगमनं नचाधिकावापः ।

ननु भवेदनादिः । अनन्तः कथम् । यदि स्यात्तत्प्रहाणाय कथं वेदान्ता आरभ्यन्ते । अन्तवत्त्वेपि तर्हि कथं ** स्वतो ऽन्यतो वा तत्सिद्धेस्तस्मादनन्तस्य प्रहाणाय †† वेदान्ता आरभ्यन्त इत्युक्तेऽर्थादेष एव प्रहाणहेतुरसत्यस्मिन्ननन्त इति निश्चीयते । मिथ्याप्रत्यय ‡‡ रूपइति-रूपग्रहणं लक्षणतस्तथा रूप्यते न व्यवहारत इति दर्शयितुम् । कर्तृत्वभोक्तृत्वप्रवर्तन इति अनर्थहेतुत्वं

---

* अभिमानादिति ३ पु॰ ।
† परिनिष्पन्नापरोक्षमिति १, २ पु॰ ।
‡ कार्यकरणत्वमिति क्वचित् ।
§ एवशब्दोऽत्राधिकः २ पु॰ ।
|| नैसर्गिको लोकव्यवहार इति ३ पु॰ ।
¶ आदिशब्दोऽत्राधिकः २ पु॰ ।
** स्वतो वा परतो वेति २ पु॰ ।
†† कथमित्यधिकमत्र १, ३ पु॰ ।
‡‡ रूपमितीति २ पु॰ ।

दर्शयति हेयतासिद्धये तेन कर्तुर्भोक्तुश्च सतो * मिथ्याज्ञानं दोषप्रवर्तनमिति येषां मतं तन्निराकृतं भवति । सर्वलोकप्रत्यक्ष इति । देहेन्द्रियादिष्वहंममाभिमानहीनस्येत्युपन्यस्य नहीन्द्रियाण्यनुपादायेत्यादिना यो ऽनुभवो मिथ्यात्वसिद्धये ऽनुसृतस्तं निगमयति ।

एवं तावत्सूत्रेणार्थो † पात्तयोर्विषयप्रयोजनयोः सिद्धये जीवस्या ऽब्रह्मस्वरूपत्वमध्यासात्मकमुपदर्श्यास्यानर्थहेतोः प्रहाणायेति प्रयोजनं निर्दिशति । हेतोः प्रहाण्या हि हेतुमतः प्रहाणिरात्यन्तिकी यतः । नन्वनर्थहेतुरध्यासो ऽनादिः स कथं प्रहीयते । तथा हि ‡ मनुष्यादिजातिविशेषमात्राध्यासस्ततो विविक्ते ऽपि न्यायतो ऽहंप्रत्यये ऽनादित्वात्पूर्ववद् § ऽविकलो वर्तते । नायं दोषः । तत्त्वमसीत्यादिवाक्याद्ब्रह्म ‖ रूपावगाहि ¶ ज्ञानान्तरोत्पत्तेरिष्टत्वात् । तद्धि ब्रह्मणो ऽवच्छिद्यैव चैतन्यस्य ब्रह्मरूपत्वप्रच्छादनेन जीवरूपत्वापादिकामनादिसिद्धामविद्यामहङ्कारादिविक्षेपहेतुं निराकुर्वदेवोत्पद्यते । ततः कारणनिवृत्तौ तत्कार्यमहमिति जीवे भोक्तृत्व ** रूपता सपरिकरा निवर्तते इति युज्यते । अहंप्रत्ययः पुनरनादिसिद्धो ऽनादिसिद्धेनैव कार्य †† करणमात्रेण सहभावादविरोधान्न स्वरूपविवेकमात्रेण निवर्तते । नापि ‡‡ ज्ञानान्तरसमुत्पन्नमिति विशेषः ।

ननु निरतिशयानन्दं ब्रह्म श्रूयते ब्रह्मावाप्तिसाधनं च ब्रह्मविद्या स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुतिभ्यस्तस्मान्निरतिशयसुखावाप्तये इति वक्तव्यम् । किमिदमुच्यते ऽनर्थहेतोः प्रहाणायेति । ननु चानर्थस्यापि समूलस्य प्रहाणं श्रूयते ब्रह्मविद्याफलम् । तरति शोकमात्मवित् । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमान §§ मेति वीतशोक इति च उभयं तर्हि वक्तव्यं श्रूयमाणत्वात् पुरुषार्थत्वाच्च । न वक्तव्यम् । कथम् । आत्मैकत्वविद्याप्रतिपत्तय इत्यात्मनो जीवस्य ‖‖ ब्रह्मात्मकता शास्त्रस्य विषयस्तेनानन्दात्मक ¶¶ ब्रह्मस्व ** रूपताप्राप्तिर्जीवस्य विषयतयैव संवृत्ता न च सा

---

* जीवस्येत्यधिकं ३ पु॰ । † अर्थादुपात्तयोरिति २ पु॰ । ‡ मनुष्यत्वादीति २, ३ पु॰ ।
§ अविचलद्इति २ पु॰ । ‖ ब्रह्मरूपतावगाहीति २ पु॰ । ¶ विशब्दोऽत्राधिकः २ पु॰ ।
** त्वप्रत्ययो नास्ति २ पु॰ । †† कारणेति ३ पु॰ । ‡‡ ज्ञानान्तरमुत्पन्नमिति २ पु॰ ।
§§ एतिस्थाने इतिशब्दः २, ३ पु॰ । ‖‖ ब्रह्मात्मैकतेति ३ पु॰ ।
¶¶ कप्रत्ययो नास्ति २ पु॰ । ** स्वशब्दो नास्ति २ पु॰ ।

विषयाद्बहिर्येन पृथङ्निर्देशार्हो स्यात्समूलाऽनर्थहानिस्तु बहिः शास्त्रविषयाद् * ब्रह्मात्मरूपात् । अनर्थहेतुप्रहाणमपि † तर्हि न पृथङ्निर्देष्टव्यम् । यतः । सर्वेषु वेदान्तेष्वलौकिकत्वाद् ब्रह्मणस्तत्प्रतिपादनपूर्वकमेव जीवस्य तद्रूपता प्रतिपाद्यते । तद्यथा सदेव सोम्येदमग्र आसीदित्युपक्रम्यैतदात्म्यमिदं सर्वन्तत्सत्यम् स आत्मेत्यवसानं निरस्त ‡ समस्तप्रपञ्चं वस्तु तत्पदाभिधेयं समर्पयदेकं वाक्यम् तथा सति तादृशेन तत्पदार्थेन संसृज्यमानस्त्वंपदार्थः पराकृत्यैव निर्लेपमनर्थहेतुमग्रहणमन्यथाग्रहणं च तथा निश्चीयते इति । यद्येवं ब्रह्मात्मावगतिनान्तरीयकमनर्थहेतोरविद्यायाः प्रहाणं न शब्दस्य तच व्यापारस्तेन पृथङ्निर्दिश्यते । युक्तं चैतत् । न हि विपर्यासगृहीतं वस्तु तन्निरासादृते तत्त्वतो निर्णेतुं शक्यम् । तस्मात् पूर्वावसितमतद्धर्मं निरस्यदेव तत्त्वावद्योतिवाक्यं तत्त्वमवसाययति ।

ननु च नञादेर्निरासकृतो निरस्यमानवाचिनश्च पदस्याश्रवणात्कथं तन्नि § रस्यदेवेति । उच्यते । नेदं रजतमिति यत्र विपर्ययासमात्रं निरस्यते न वस्तुतत्त्वमवबोध्यते । तत्र तथा भवतु । इह पुनर्विज्ञानमेव तादृशमुत्पन्नं यद्विरोधिनिराकरणमन्तरेण न स्वार्थं साधयितुमलम् तुलोन्नमनव्यापार ‖ इवानमननान्तरीयकः । तथाह्युन्नमनव्यापारः स्वविषयस्य ¶ तुलाद्रव्यस्योर्ध्वदेशसम्बन्धं न साधयितुमलं तत्कालमेव तस्याधोदेशसम्बन्धमनापाद्य । न चोन्नमनकारकस्य हस्तप्रयत्नादेरामनने ऽपि कारकत्वम् । प्रसिद्ध्यभावादनुभवविरोधाच्च । तदेवं विपर्यासगृहीते वस्तुनि तत्त्वावद्योतिशब्दनिमित्त आत्मनो ज्ञानव्यापारो नाहं कर्ता ब्रह्माहमिति ग्राहयति । नेदं रजतं शुक्तिकेयमिति यथा । तस्माच्छुक्तिकेयमित्येव निराकाङ्क्षं वाक्यं नेदं रजतमित्यनुवादः । अत एवाख्यातपदस्य वाक्यत्वे क्रियाज्ञानादेव तत्साधनमात्रे ऽपि प्रतीतिसिद्धिः । पदान्तराणि नियमायानुवादाय वेति न्यायविदः । तथाचाहु**-र्यजतिचोदना द्रव्यदेवताक्रियासमुदाये कृतार्थत्वादिति ।

---

* ब्रह्मात्मतास्वरूपादिति ३ पु० ।
† न तर्हीति ३ पु० ।
‡ समस्तेति नास्ति १, २ पु० ।
§ निरस्यदुच्यते–इति १ पु० ।
‖ इवावनमनेति ३ पु० ।
¶ तुलेति २ पु० न दृश्यते ।
** यजतिचोदना द्रव्यं देवताक्रियासमुदाय इति ३ पु० ।

अपरे तु यज्ञं व्याख्यास्यामो द्रव्यं देवता त्याग इति । कथं क्रियामात्रवाचिनो द्रव्यदेवताभिधानं नान्तरीयकं तद्विषयज्ञाननिमित्तत्वं विहाय प्रत्यक्षबाधस्याप्ययमेव प्रकारोऽसंप्रयुक्तविषयत्वाद्बाधस्य । तदेवमशाब्दमविद्याविलयं मन्वानः श्रुतिन्यायकोविदो भगवान् भाष्यकारो विषयात्पृथङ् निर्दिशत्यस्यानर्थहेतोः प्रहाणायेति चतुर्थीप्रयोगो ऽपि विद्यासामर्थ्यसिद्धिमभिप्रेत्य न तदर्थमुपादनं प्रयोजनत्वं च पुरुषाकाङ्क्षया एवास्तु । न हि विद्या गवादिवत्तटस्था सिध्यति येनाप्तिः पृथगुपादीयेत । सा हि * वेदित्राश्रया वेद्यं तस्मै प्रकाशयन्त्येवोदेति । सत्यमेवमन्यच । प्रकृते पुनर्विषये विद्योदितापि न प्रतिष्ठां लभते असम्भावना † विपरीतभावनाभिभूतविषयत्वात् । तथा च लोके यस्मिन् देशे काले चेदं वस्तु स्वरूपत एव न सम्भवतीति दृढभावितम् यदि ‡ तत्कथंचिद्दैववशादुपलभ्येत तदा स्वयमीक्षमाणो ऽपि तावन्नाध्यवस्यति यावत् तत्सम्भवं नानुसरति । तेन सम्यग्ज्ञानमपि स्वविषयेऽप्रतिष्ठितमनवाप्तमिव भवति । § तेन तत्स्वरूपप्रतिष्ठायै तर्कं सहायीकरोति । अत एव प्रमाणानामनुग्राहकस्तर्क इति तर्कविदः ।

अथ कोऽयं तर्को नाम । युक्तिः । ननु पर्याय एषः । स्वरूपमभिधीयताम् । इदमुच्यते । प्रमाणशक्तिविषयतत्सम्भवासम्भवपरिच्छेदात्मा प्रत्ययः । नन्वेवं तर्कसापेक्षं स्वमर्थं साधयतो ऽनपेक्षत्वहानेरप्रामाण्यं स्यात् । न स्यात्स्वमहिम्नैव विषयाध्यवसायहेतुत्वात् । क्व तर्हि तर्कस्योपयोगः । विषयासम्भवाशङ्कायां ‖ तथानुभवफलानुत्पत्तौ तत्सम्भवप्रदर्शनमुखेन फलप्रतिबन्धविगमे । तथा च तत्त्वमसिवाक्ये त्वंपदार्थो जीवस्तत्पदार्थब्रह्मस्वरूपतामात्मनो ऽसम्भावयन् विपरीतं च रूपं मन्वानः समुत्पन्ने ऽपि ज्ञाने तावन्नाध्यवस्यति यावत्तर्केण विरोधमपनीय तद्रूपतामात्मनो न सम्भावयति । ततः प्राग् विद्योदितापि वाक्यादनवाप्तेव भवति । अवाप्तिप्रकारश्च वेदान्तेष्वेव निर्दिष्टः । साक्षादनुभवफलोद्देशेन तेनोच्यते विद्याप्रतिपत्तये इति ।

नन्वात्मैकत्वविद्याप्रतिपत्तिर्नानर्थहेतुप्रहाणाय ¶ प्रभवति । तथाहि ।

---

* वेदित्रा श्रुत्येति १, २ पु० ।
† विपरीतसंभावनेति क्वचित् ।
‡ तदिति नास्ति ३ पु० ।
§ तेन स्वप्रतिष्ठायै-इति ३ पु० ।
‖ शङ्कयेति २ पु० ।
¶ प्रहाणाय भवतीति २ पु० ।

जीवस्य कार्य*कारणसंघातादन्यत्वप्रतिपत्तेर्ब्रह्मस्वरूपताप्रतिपत्तिर्न विशिष्यते उभयत्राप्यहङ्कारग्रन्थेर्मनुष्याभिमानपर्यन्तस्याविकलमनुवर्तमानत्वात् । उच्यते । भवतु तत्राविद्याया अनिवर्तितत्वात्तदिह पुनरपसारिताऽविद्यादोषं ब्रह्मात्मज्ञानमुदयमासादयत्कथं तन्निमित्तं भोक्त्रादिग्रन्थिप्रवाहं नापनयति । नहि जीवस्य ब्रह्मात्मावगमस्तद्विषयानवगममऽबाधमान उदेति ॥

ननु ब्रह्मज्ञानादग्रहणापाये तन्निमित्तस्याहङ्कारग्रन्थेस्तत्कालमेवाभावः प्रसज्येत । न । संस्कारादप्यग्रहणानुवृत्तेः सम्भवाद् भयानुवृत्तिवत् । तथाहि । सम्यग्ज्ञानान्निवृत्तमपि भयं स्वसंस्कारादनुवर्तते कम्पादिनिमित्तं च भवति । तथा ऽग्रहणमपि स्वसंस्कारादनुवर्तते ऽहङ्कारग्रन्थेश्च निमित्तं भवतीति न किञ्चिदनुपपन्नमस्ति ।

ननु न सर्वे वेदान्ता विद्यार्थमेवारभ्यन्ते तदेकदेशः क्रममुक्तिफलायैश्वर्यायाभ्युदयार्थं कर्मसमृद्धये चोपासनानि विविधान्युपदिशन्नुपलभ्यते । सत्यम् । उपासनाकर्म तु ब्रह्म तच्चापावृताशेषप्रपञ्चं जीवस्य निजं रूपमिति निरूपयितुमखिलप्रपञ्चजन्मादिहेतुतया प्रथमं सर्वात्मकं सर्वज्ञं सर्वशक्ति च ब्रह्म लक्षितमस्यां चावस्थायामनपाकृत्यैव ब्रह्मणि प्रपञ्चं तेनतेन प्रपञ्चेनोपधीयमानं ब्रह्म तस्मै तस्मै फलायो†पास्यत्वेन विधीयते दर्शपूर्णमासार्थापप्रणयनमिव गोदोहनोपरक्तं पशुभ्यस्तस्मात्तदर्थोपजीवित्वादितरस्यात्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्त इति न विरुध्यते ।

नन्वब्रह्मोपासनान्यपि वेदान्तेषु दृश्यन्ते प्राणादिविषयाणि । सत्यम् । तान्यपि कार्यब्रह्मावाप्तिक्रमेण मुक्तिफलान्येव । वक्ष्यत्येतत्सूत्रकारः कार्यात्यये तदध्यक्षेण सहातः परमभिधानादिति । यथा चायमर्थः सर्वेषां वेदान्तानाम् तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्याम इति प्रतिज्ञातेऽर्थे वेदान्तानां तात्पर्यमुपदर्शयितुं समन्वयसूत्रप्रमुखैः सूत्रवाक्यैर्ग्रथिता न्याय इति दर्शयति । शरीरमेव शरीरकं शरीरके भवः शारीरको जीवः । तमधिकृत्य कृतो ग्रन्थः शारीरकः । तदिह वेदान्तानां जीवस्य सत्त्वमधिकृत्य प्रवृत्तानां ब्रह्मरूपतायां पर्यवसानमिति कथयितुं प्रणीतानां शारीरकं‡जीवतत्त्वमधिकृत्य कृतत्वमस्तीति शारीरकाभिधानम् । मुमुक्षुत्वे सत्यनन्तरं ब्रह्म-

---

* करणेति ३ पु॰ । † उपास्यमानत्वेनेति १ पु॰ । ‡ जीवसतत्त्वमिति ३ पु॰ ।

अविद्यात्मकबन्धनिवृत्तिस्तत्त्वज्ञानाद्भवतीत्ययमर्थः प्रथमसूत्रेण सूच्यते । ४१
ज्ञानं कर्तव्यमिति यद्यप्येतावान्सूत्रस्य श्रौतो ऽर्थस्तथा ऽप्या * र्थाद् ब्रह्मज्ञानस्य मोक्षः प्रयोजनं निर्दिष्टं भवति । तथाहि । पुरुषार्थवस्तुकामनानन्तरं यत्र प्रवृत्तिरुपदिश्यते तस्य तत्साधनत्वमप्यर्थान्निर्दिष्टं प्रतीयते । तथा सति कुतस्तन्मोक्षसाधनं ब्रह्मज्ञानं भवतीत्यपेक्षायामर्थादस्माच्छास्त्राद्भवतीति शास्त्रस्य ब्रह्मज्ञानं विषयो निर्दिष्टः । तदेवं मुमुक्षुत्वानन्तरं ब्रह्मज्ञानकर्त्तव्यतोपदेशमुखेन वेदान्तानां विषयप्रयोजननिर्देशे † ऽप्यार्थे सूत्रस्य व्यापारं दर्शयित्वा तदपेक्षितमप्यर्थात् ‡ सूचितमविद्यात्मकबन्धमुपवर्ण्य प्रतिज्ञातार्थसिद्धये हेत्वाकाङ्क्षाया § मस्मिन्नेव तं प्रदर्शयिष्याम इति व्याख्येयत्व ‖ मुपक्षिप्य व्याख्यातुकामः प्रथमं तावत्प्रयोजनविषययोरुपादाने निमित्तमाह वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येद ¶ मादिमसूत्रम् अथातो ब्रह्मजिज्ञासेति । अयमस्यार्थः । शास्त्रस्यादिरयम् । आदौ च प्रवृत्त्यङ्गतया प्रयोजनं विषयश्च ** दर्शनीयः । सूत्रं चैतत् अतो यः कश्चिदर्थः शब्दसामर्थ्येनार्थबलाद्वा †† उत्प्रेक्षितः ‡‡ स सर्वस्तदर्थ एवेति भवत्ययमर्थकलापः तन्महिमाधिगतः । एवं सूत्रस्यादित्वेन कारणेन सूत्रतया च विषयप्रयोजनं तत्सिद्धिकरं चा §§ विद्याख्यं बन्धं तत्सामर्थ्यावगतमापाद्य तत्र सूत्रसामर्थ्यं दर्शयितुं प्रतिपदं व्याख्यामारभते ॥

॥ इति प्रथमवर्णकम् ॥

---

* अर्थादिति क्वचित् । † अर्थात् सूत्रस्येति १, ३ पु॰ । ‡ सूचितमिति २ पु॰ ।
§ अस्मिन्नेव शास्त्रे इति २, ३ पु॰ । ‖ उत्क्षिप्येति १, ३ पु॰ । ¶ आदिमं सूत्रमिति ३ पु॰ ।
** प्रदर्शनीय इति ३ पु॰ । †† उत्प्रेक्ष्यत इति ३ पु॰ ।
‡‡ सशब्दोऽत्र पुस्तकत्रयेऽपि नोपलभ्यते । §§ अविद्यात्मकं बन्धमिति ३ पु॰ ।

सिद्धैव ननु ब्रह्मजिज्ञासा अथातो धर्मजिज्ञासेति सकलवेदार्थविचारस्योदितत्वात् ब्रह्मज्ञानस्य च चोदनालक्षणत्वेन धर्मस्वरूपत्वात् । अतः सिद्धैव ब्रह्मजिज्ञासापि अभ्यधिकाशङ्काभावादिति । अथ केचिदभ्यधिकाशङ्कां दर्शयन्तो ब्रह्मजिज्ञासां पृथगारभन्ते । केयमत्राभ्यधिका शङ्का । चोदनालक्षणोर्थो धर्म इति ब्रुवता विधेः प्रामाण्यं दर्शितम् । अथ केषुचिद्वाक्येषु विधिरेव न श्रूयते सदेव * सोम्येदमग्र आसीदित्येवमादिषु । यत्रापि विधिः श्रूयते आत्मा वा अरे द्रष्टव्यः तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति । तत्र यद्यपि कृत्या अविशेषेण विधौ स्मर्यन्ते तथापि यो भावाभिधायी † तव्यप्रत्ययः स क्रियाप्रधानत्वात् क्रियायां पुरुषं नियोक्तुं शक्नोति । यत्र पुनः कर्मप्राधान्येनोच्यते तत्र द्रव्ये गुणभूतां क्रियां ‡ कार्यान्तरसम्बन्धित्वेन विधातुं न शक्नोति । द्रव्यपरत्वे चानुत्पाद्यत्वादविकार्यत्वादनाप्यत्वादसंस्कार्यत्वात् संस्कृतस्य च कार्यान्तरे उपयोगाभावादसंस्कार्यत्वम् । अत आत्मानमुपासीतेत्यात्मन ईप्सिततमत्वं न सम्भवति । अथ पुनर्विपरीतो गुणप्रधानभावः सक्तुन्यायेन § कल्प्येत । तथापि न ज्ञायते किं तदुपासनं कथं चात्मना तत्क्रियत इति । अथ ज्ञायते ज्ञानमुपासनम् आत्मा च विषयभावेन त‖ न्निर्वर्तयतीति । एवं तर्हि तदेवायातं ज्ञानेना ¶ त्माप्यत इति । तच्च कृतकरणमनर्थकम् नित्याप्तत्वादात्मनः । संस्कार्य्यत्वे चोपयोगाभाव उक्तः । अतो विध्यभावादविवक्षितार्था वेदान्ता इति धर्मजिज्ञासानन्तरं स्नाने प्राप्ते इदमारभ्यते अथातो ब्रह्मजिज्ञासेति । अनन्तरं ब्रह्म जिज्ञासितव्यं न स्नातव्यमित्यभिप्रायः । कर्माभिधायिनोऽपि **कृत्यप्रत्ययान्नियोगसंप्रत्ययान्न नियोक्तृत्वं निराकर्तुं शक्यते कटस्त्वया कर्तव्यो ग्रामस्त्वया गन्तव्य इतिवत् । यत्तूक्तम् । द्रव्यपरत्वे प्रयोजनाभावादानर्थक्यं नियोगस्येति । तदसत् । अविद्योच्छेदस्योपलभ्यमानत्वादविद्या च संसारहेतुभूता ।

अपरे पुनरेवमारभन्ते । ब्रह्मणि †† प्रत्यक्षादिप्रत्ययान्तराणामसंभवात्परिनिष्पन्ने वस्तुनि प्रतिपत्तिहेतुतया सम्भावितसामर्थ्यानामप्याम्नायस्य पुनः

---

* सोम्येदमित्येवं सर्वत्र पाठसत्त्वेऽपि सोम्येदमिति श्रौतः पाठः ।

† तव्येति नास्ति ३ पु॰ । ‡ क्रियां नेत्येवमयिमो नकारः पूर्वमस्ति ३ पु॰ । § कल्प्येतेति १, २ पु॰ ।

‖ निवर्त्तयतीति १ पु॰ । ¶ आत्मा प्राप्यत इति २ पु॰ ।

** तव्यप्रत्ययादिति २ पु॰ । †† प्रत्यक्षादीति २, ३ पु॰ नास्ति ।

कार्यविषयतया सुतरामसंभवं मन्वानस्य भवति संकर्षपर्यन्ते वेदार्थविचारावसानमिति बुद्धिस्तन्निरासार्थं पुनः प्रतिज्ञातमिहापि सर्वेष्वेवात्मज्ञानविधानेषु कार्यनिष्ठतां वर्णयन्ति समाम् । तत्त्वावबोधश्च * कार्यमधिकारिनियोगविषयतयाऽवगमादिति । ततस्तद्विचारार्थं शास्त्रमारब्धव्यमिति ।

अत्रोच्यते । नारब्धव्यम् गतार्थत्वात् । कथम् । यस्तावत्प्रथम आरम्भप्रकारः कर्मणि † कृत्यप्रत्ययेन नियोगसंप्रत्यय इति तत्स्वयमेव विधायकत्वं दर्शितम् प्रसिद्धं चैतत् स्वाध्यायोऽध्येतव्य इत्येवमादीनां विधायकत्वम् । ‡ नचाशङ्काकारणं किञ्चित् । ननु चतुर्विधस्यापि क्रियाफलस्यात्मन्यसंभव उक्तः । यद्येवं सक्तुन्यायो भविष्यति । तदपि न । § आत्मविषयज्ञानस्य नित्यसिद्धत्वादित्युक्तम् । सिद्धस्यैव पुनरभ्यासो विधिनिमित्त उपासनाख्यो भविष्यति अभ्युदयफले हिरण्यधारणवत् । ननु न विधानतोऽप्यात्मविषयज्ञानसन्तानः कर्त्तव्यः । स तु नित्यमात्मनि जायतः सिद्धः । एवं तर्ह्य ‖ र्थाविरुद्धेषु कालेष्वात्मन्येव चेतःसमाधानं भविष्यति । यत्पुनरात्मज्ञानादविद्योच्छेदस्तदुच्छेदात्संसारनिवृत्तिः फलमित्युपन्यस्तम् । तदसत् । अहमित्यात्मानं नित्यमेव जानाति सर्वो लोकः न च संसारो निवृत्तः । अथ पुनरहंप्रत्ययावसेयादन्यदेवात्मरूपं पराकृतभोक्तृभोक्तव्यभोगग्रन्थि ज्ञेयत्वेनात्मज्ञानविधिना ज्ञाप्यत इति । तदसत् । विधिर्हि सामान्यतःसिद्धस्य क्रियात्मनो विशेषसिद्धौ प्रभवति नात्यन्तमसिद्धसद्भावे । तद्यदि नाम ज्ञानं लोके ¶ सिद्धं तथापि निरस्तप्रपञ्चात्म ** विषयमसिद्धम् आकाशमुष्टिहननवन्न विधातुं शक्यम् । अथ तादृगात्मज्ञानं सिद्धं किं विधिना । यदपि मतान्तरं प्रत्यक्षादेरगोचरत्वाच्छास्त्रस्य च कार्यार्थत्वात्संकर्षपर्यन्त एव विचारे वेदार्थपरिसमाप्तौ प्राप्तायां वेदान्तेष्वपि कार्यनिष्ठता समाना । ब्रह्मतत्त्वावबोधश्च कार्यम् अधिकारिनियोगविषयतयाऽवगमात् । अतस्तद्विचाराय शारीरकारम्भ इति । तदप्युक्तेन न्यायेन ब्रह्मावगमस्य सिद्धत्वेऽसिद्धत्वे च कार्यत्वासंभवेन प्रत्यु-

---

* कार्योऽधिकारीति ३ पु० ।
† कृत्प्रत्ययेनेति १ पु०, कृत्यप्रत्ययेन न नियोगेति ३ पु० शोधितमस्ति ।
‡ नात्र शङ्काकारणमिति २ पु० ।
§ आत्मन्यविषय ज्ञानस्येति १ पु०, आत्मविषयस्य ज्ञानस्येति ३ पु० ।
‖ अर्थाविरोधिष्विति ३ पु० । ¶ लोकप्रसिद्धमिति २ पु०, लोके प्रसिद्धमिति ३ पु० ।
** आत्मविषयकमिति ३ पु० ।

त्कम् । अपरं मतम् । सत्यं कार्यविषयो वेदो न तु तावन्मात्रे । तस्मिन् सति योयो ऽर्थो ऽवगम्यते सस वेदार्थः यथा रूपे सति चक्षुषः प्रवृत्तिः न च रूपमात्रं चक्षुषो विषयः किंतु तस्मिन्सति द्रव्यमपि । एवमिहापि वस्तुतत्त्वमपि * विषयः । † कथम् । तदुच्यते । इदं सर्वं यदयमात्मेति न तावत्सर्वात्मरूपतात्मन उपदिश्यते यदि सर्वरूपता ऽऽत्मन उपदिश्येत ततः सर्वस्याचेतनत्वात् तद्रूपत्वे बोद्धृत्वहानौ बोधकत्वं शब्दस्य हीयेत । अतः सर्वस्यात्मस्वभावता विधीयते ऽनात्मस्वभावविलयेन हि वस्तुनो ऽवगतिर्दृष्टा । नन्वत्र विधिर्न श्रूयते । एवं तर्हि कल्प्यतां विधिः । किं प्रतीते विध्यर्थे विधिः कल्प्यते उताऽप्रतीत इति । यदि प्रतीते कल्प्यते कल्पनावैयर्थ्यम् । अर्थप्रतीत्यर्थं हि शब्दोऽमृग्यते प्रतीते ऽर्थे शब्दं कल्पयता किं कृतं स्यात् । अथाप्रतीत एव विध्यर्थे विधिं कल्पयित्वा ततो ऽर्थः प्रतिपत्तव्य इत्यपूर्वं प्रमाणकौशलम् । नन्वश्रूयमाणविधि ‡ ष्वपि तस्मात्पूषा प्रपिष्टभागो ऽदन्तको हीत्यादिषु विधिः कल्पितः । सत्यम् । युक्तं तत्र पूष्णः पिष्टद्रव्यसम्बन्धः समासाभिहितो न सिद्धो न वर्तते नापि कुतश्चिद्भविष्यतीति प्रमाणाभावात् । नाऽपि विधिना केनचित्पदैकवाक्यता येन वर्योत्खननादिवत्कथंचिदालम्बनं कल्प्येत । अतो निरालम्बनत्वपरिहाराय § कार्यपरता कल्प्यत इति ।

न ‖ न्वत्राप्यात्मपदं चेतनस्य भोक्तुर्वाचकम् सच नियोज्यत्वान्नियोगमाक्षिपति । नैतत्सारम् । नियोगो हि पुरुषविशेषमनाश्रित्यानुपलब्धो लोके तमाक्षिपेत् विश्वजिदादिषु । पुरुषः ¶ पुनः किं नियोगमन्तरेण नोपलब्धो लोके येन विधिकल्पना भवेत् । अथापि भवतु नाम विधिः नासौ धातुना विना केवलो लभ्यते । धातुनैव सह ** कल्प्यते । कोसौ धातुः । यदि तावत्कर्तव्यमिति तत्रानात्मस्वभावता न निवृत्ता प्रपञ्चस्य । यथा ऽमी पिष्टपिण्डाः सिंहाः क्रियन्तामिति पिष्टस्वभावता †† न निवृत्ता । इतिकर्तव्यता चानिर्दिष्टा तत्र साकाङ्क्षं वचनमनर्थकं स्यात् । अथ ज्ञातव्य इत्यध्याह्रियेत । एवमपि स एव दोषः अनात्मस्वभावता न निवृत्तेति अशक्यार्थोपदेशश्च ।

---

* तत्त्वमपि वेदस्य विषय इति पाठो २ पुस्तके । † कथं तत् उच्यते–इति १, २ पु० ।
‡ विधिकेष्वप्रीति ३ पु० । § कार्यता कल्प्यत इति २, ३ पु० । ‖ नन्विहापोति ३ पु० ।
¶ पुनरिति नास्ति ३ पु० । ** कल्प्यतामिति ३ पु० । †† न निवृत्तेति पुनर्नास्ति ३ पु० ।

नहि वस्तु वस्त्वन्तरात्मना ज्ञातुं शक्यते । एवं तर्हि ज्ञातव्य इत्य * ध्याह्रियेत । तत्र † धात्वर्थानुवादः प्रत्ययो विधायकः । कुतःप्राप्तेरनुवादः । अभिधानत ‡ इति ब्रूमः । एवं तर्हि विधानमनर्थकं स्वाध्यायकाल एव निष्पन्नत्वाज्ज्ञानस्य पुनः कर्तव्यतया चोद्यते यथा मन्त्रेषु प्रयोगवचनस्तत्र विधायक इतीहापि प्रयोगवचनो विधायकः ।

ननु मन्त्रेषु स्वार्थस्यान्यतःसिद्धत्वात्प्रत्ययपरत्वं युज्यते इह तु स्वार्थविधिपराणां शब्दानां प्रत्ययपरत्वं विरुध्यते । नैष दोषः । अन्यार्थमपि कृतमन्यार्थं भवति । तद्यथा शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यते च । एवमिहापि । यथा § पदार्थानां विधायकः शब्दः क्रमस्यापि ‖ विधायकः । एवं स्वार्थस्य विधायकः शब्दः प्रत्ययस्यापि वि ¶ धायको भविष्यति । तदेतदनिरूपितमिव दृश्यते । कथम् । मन्त्राः ** स्वाध्यायविधिनोपादापिताश्चार्थस्यान्यतःसिद्धत्वात् तं प्रमातुमशक्नुवन्तः प्रमाणत्वात् प्रच्युताः व्रीह्यादिवत्प्रमेयतामापन्नाः श्रुत्यादिप्रमाणैर्युक्तम् यद्विनियुज्येरन् । विनियुक्ताश्चाऽनुष्ठेयस्यानुष्ठानकाले स्मृत्यपेक्षस्य स्मारकतया गृह्येरन्निति । इह त्विदं सर्वं यदयमात्मेति यत्पदसमन्वयनिमित्तं सर्वस्यात्मस्वभावताग्राहिविज्ञानं तत्स्वविषयस्यान्यतो ऽसिद्धत्वात्प्रमेयप †† रत्वान्न विधेर्विषयः । अथ विधेर्विषयो न प्रमेयमवगमयितु ‡‡ मलम् । न §§ च युगपदुभयं सम्भवति वैरूप्यप्रसङ्गात् ।

नन्वेवं सति गुणकर्मणां सर्वत्र विधानं निराकृतं स्यात् । न निराकृतं स्यात् । यत्र प्रमाणान्तरसिद्धं गुणकर्मणः कर्मकारकं तत्र तस्योत्पत्त्याद्य ‖‖ न्यतमफलं तद्विधीयते । यत्र पुनः ¶¶ प्रमाणान्तरादसिद्धो ज्ञानस्य कर्मभूतो विषयः स तेनैव प्रमीयमाणो न सिद्धवदुद्देश्यः येन तदुद्देशेन तत्रातिशयाधानाय ज्ञानं विधीयते । तस्माद्त्र युगपदुभयासम्भवाद्भवत्येव वैरूप्यप्रसङ्गः । न च स एव समन्वयः स्वावयवाद्विधेर्विभक्तः कार्यक्षमः अवान्तर-

* अध्याह्रियते–इति ३ पु० ।
† धात्वर्थोऽनुवाद इति ३ पु० ।
‡ इतिस्थाने एवशब्दः १, २ पु० ।
§ अत्र 'वा' शब्दोऽधिकः ३ पु० ।
‖ विधायकइति पुनर्नास्ति ३ पु० ।
¶ विधायकइति २, ३ पु० नास्ति ।
** स्वाध्यायाध्ययनविधीति २, ३ पु० ।
†† प्रमेयपरं न विधिविषय इति २, ३ पु० ।
‡‡ अलंस्थाने क्षममस्ति ३ ।
§§ चो नास्ति ३ पु० ।
‖‖ अन्यतमत् फलमिति ३ पु० पाठस्तु न युक्तः ।
¶¶ प्रमाणान्तरासिद्ध इति ३ पु० ।

वाक्यस्य प्रमाणत्वायोगात् । अथार्थवादपदानामिव परस्परतः संसृज्य कञ्चिदर्थमवबोध्य विधिसम्बन्धमनुभवेदित्यभिप्रायः । तदसत् । युक्तमर्थवादपदानि स्वार्थफलरहितानि तत्र पर्यवसानाभावात्फलवदङ्गतामश्नुवीरन्निति । इह पुनरपरामृष्टविधिः पदसमन्वयः स्वार्थमवगमयन्निरस्तनिखिलप्रपञ्चावग्रहमपास्तातिशया * नन्दनित्यानुभवैकरसं शिवमद्वैतमात्मतत्त्वमवगमयेत्तत्र कुतो विधिशेषताकृतं कृत्यं प्राप्तं प्रापणीयम् । आत्मलाभान्न परं † विधीयत इति स्मृतेः । अथ पुनः शाब्दज्ञानान्न तथा ऽनुभवः । तेन साक्षात्करणाय विधिरिति । किं तज्ज्ञानमनुभवाय विधीयते प्रत्यक्षादीनां तावदगोचरः न चक्षुषा गृह्यत इत्यादिमन्त्रवर्णात् । शाब्दं च नेष्यते भवता । सत्यम् । न ‡ शाब्दज्ञानं विधिविकलमनुभवायालम् विहितं त्वनुभवहेतुरिति । तदयुक्तम् । यत्तावत्स्वाध्यायाध्ययनविधिग्राहितात्पदसमन्वयात्स्वभावतःसमुत्पन्नं तत्तावन्न विधीयते प्रमेयपरतया विधिविषयत्वानुपपत्तेरित्युक्तम् । अथ पुनस्तदेव ज्ञानं सन्तनुयादिति विधीयते । तत्कथं लभ्यते उपास्तिध्यायत्योर्ज्ञानसन्तानवाचिनोरन्यतरस्याप्युपादानमन्तरेण । नापि ज्ञानेनैव स्वसन्तानो लक्ष्यते । साहचर्याद्यव्यभिचरितसम्बन्धाभावात् । नाप्यभ्यासात् साक्षाद्भावः सिद्धः । नापि श्रूयते येन तदुद्देशेन ज्ञानसन्तानो विधीयेत । ननु किमत्र श्रवणेन स्वयमेव § साक्षात्कारकरणाय पुरुषार्थत्वादभिमुखः पुरुषः सिद्धश्च ज्ञानाभ्यासः शास्त्रश्रवणादैा साक्षात्करणे ‖ हेतुः । यद्येवं किं विधिना । स्वयमेव पुरुषार्थे निर्ज्ञाते हेतैा प्रवर्तते । यत् पुनर्निदर्शनम् शाल्यर्थं कुल्याः प्रणीयन्ते इति । युक्तम् तत्र प्रत्यक्षत उभयार्थताया उपलभ्यमानत्वात् । इह पुनर्न्यायतः प्रतिपत्तव्यम् । स च न्यायो ¶ युगपन्न सम्भवतीत्युक्तम् । यदपीदमुक्तम् ** पदार्थानां विधायकः शब्दः क्रमस्यापि विधायकः । एवमैकात्म्यस्य प्रतिपादकः समन्वयो विधिविषयमपि ज्ञापयिष्यतीति । तदप्यपेशलम् । यत्तावत्प्रत्येकं प्रयाजादिविषयस्तैः पुनर्न तेषामेव विधानम् । नाऽपि ते क्रमशब्दाभिधेयाः । प्रयोगवचनो ऽपि

* आनन्दानन्यानुभवेति ३ पु· । † विद्यते इति २ पु· । ‡ शाब्दं ज्ञानमिति ३ पु· ।
§ साक्षात्करणायेति ३ पु· । ‖ साक्षात्कारणे इति १ पु· ।
¶ न युगपदिति ३ पु· ।
** अत्र यथाशब्दोऽधिकः क्रतोऽस्ति ३ पु· ।

प्रयुञ्जानस्तानेव प्रयुङ्क्ते *न क्रम इत्युक्तम् । नच क्रमो नामैकान्ततो नास्त्येव । तद्बुद्धिशब्दयोर्निरालम्बनत्वप्रसङ्गात् । तत्र क्रमो नाम वस्तुभूतो धर्मो विद्यत एव † त एव केनचिदुपाधिना वनवत्क्रमबुद्धिशब्दालम्बनं भवेयुः । स्मृति ‡ विज्ञानमेव वा ऽनुष्ठानकाले यथोपलब्धि पदार्थान् परामृशेत् सर्वथास्ति तावदेकैकपदार्थालम्बनज्ञानातिरिक्तं ज्ञानान्तरम् । तच्चैकत्वात् कर्त्तुरनेकत्वाच्च पदार्थानां युगपदनुष्ठानासम्भवादपेक्षितं सन्निहितं च प्रयोगवचनेन गृह्यत इति युक्तम् । न तथेह ज्ञानद्वयमस्ति । यदैकात्म्ये विधिविषयत्वे च वर्त्तेत । तस्मादिह विधेयाभावाद्विधानाश्रवणादध्याहारे च प्रमाणाभावान्न प्रयोगवचनोस्ति यो मन्त्राणामिव ज्ञानस्यापि पुनः प्रयोगं § विधास्यते । तस्मादसदेतत् कार्यविषयोऽपि वेदो वस्तुतत्त्वमवबोधयतीति । यत् पुनर्निदर्शनं चक्षू रूपे सति द्रव्यमपि बोधयत्येवं कार्ये सति तत्त्वमपि वेदो ‖ ऽवगमयतीति । युक्तं तत्र यद्यदवबोधयति चक्षुस्तत्र स्वतन्त्रमेव प्रमाणम् इह पुनर्यत्र तात्पर्यं तस्य प्रमेयता न यद्यत्प्रतीयते तस्य तस्येति वैषम्यम् । आह । मा भूज्ज्ञानद्वयम् योयमाभिधानिकः प्रत्ययः स विधिविषय एव ¶ भवतु तस्मिन् विहितेऽर्थात्सर्वस्यात्मस्वभावता सिध्यति सविषयत्वादवगमस्य । एवमप्यऽविवक्षितो ऽर्थः शब्दाद्विवक्षितस्त्वर्थादिति शोभतेतरां वाक्यार्थ ** वित्ता । नच नियोगतः प्रतिपत्तिविधिर्वास्तवं संसर्ग †† गमयति भवन्ति हि परिकल्पितविषया अपि प्रतिपत्तयश्चोदनालक्षणाः फलवत्यो वाचं धेनुमुपासीतेत्येवमाद्याः । एतद्देवाच युक्तम् अतत्परस्य प्रत्यक्षादिविरोधे ‡‡ तथाध्यवसायहेतुत्वायोगात् । तस्मात्कार्यनिष्ठे वेदे वस्तुतत्त्वसिद्धिर्मनोरथ एव । अतो ऽहंप्रत्ययावसेय एवात्मा न तस्य शब्दावसेयमतीन्द्रियं रूपान्तरमस्ति शब्दस्य तत्र सामर्थ्याभावात् । एवं च सत्ययमात्मा ब्रह्म एष त आत्मान्तर्याम्यमृत इति ब्रह्मान्तर्याम्यादिशब्दा अहंप्रत्ययावसेय एवात्मनि कथंचिद्वर्त्तन्ते । तेन स आत्मा तत्त्वमसीति विद्यमानैरारोपितैश्च गुणैरात्मोपासनं मोक्षफलं च विधीयत इति युक्तम् । अतः कार्यानुरक्तस्य वेदार्थस्य सम्भवात्तस्य च सर्वा-

---

* न ते क्रमइति ३ पु॰ । † त एव वेति । ‡ विशब्दो नास्ति ३ पु॰ ।
§ परस्मैपदं ३ पु॰ । ‖ अवशब्दो नास्ति ३ पु॰ । ¶ भवतीति ३ पु॰ ।
** चिन्त्तेति २ पु॰ । †† अवशब्दोऽधिकः ३ पु॰ । ‡‡ तथाविधाध्यवसायेतिपश्चात्कृतम् ३ पु॰ ।

त्मना विचारितत्वात् किमपरमवशिष्टं यद् ब्रह्म जिज्ञासारम्भं प्रयुञ्जीत ।

उच्यते । स्यादेतदेवम् यदि सर्व एव वेदार्थो विचार्यत्वेनायाती धर्मजिज्ञासेति उपक्रान्तो विचारितश्च स्यात् यावता कार्यनिष्ठ एव वेद-भागो विचारितो न वस्तुतत्त्वनिष्ठः । तथा हि । शास्त्रारम्भो व्याख्यातृभि-रेवं निरूपितः । कथम् । धर्मो नाम कश्चित्साधयितुः कालान्तरे श्रेयःसाधनो लोकाख्यप्रमाणाभासोत्थेन ज्ञानेन सामान्यतो विषयीकृतः तद्विशेषं प्रति विप्रतिपन्नाः परीक्षकाः । केचिदग्निहोत्रादिकं धर्ममाचक्षते केचिच्चैत्यवन्दना-दिकम् । तत्र अग्निहोत्रादिलक्षण एव धर्मोऽभिप्रेतो न तत्प्रतिपादकानां वेद-वाक्यानां विचारावसरो नापि विवक्षितार्थत्वम् । अतश्चैत्यवन्दनादीनामेवान्य-तमो धर्मस्तत्प्रतिपादकानां बुद्धादिवाक्यानामेवा * न्यतमद्विचार्यं न वा तदपि । नहि पौरुषेये वाक्ये शब्दशक्त्यनुसारेणार्थोऽपि तु तेन विवक्षित इत्येवमाश-ङ्किते धर्माय वेदवाक्यानि विचारयिष्यँस्तदर्थविवक्षाविचारावसरप्रदर्शनार्थ-मथातोधर्मजिज्ञासेति सूत्रयामास जैमिनिः । वेदमधीत्यानन्तरं धर्मजिज्ञासा कर्तव्या न स्नानं गुरुकुलनिवृत्तिरूपमिति दर्शयितुमिति । एवं स्थिते शास्त्रा-रम्भे न सर्ववेदार्थविषयं शास्त्रमिति प्रतीतिः किन्तु धर्मातिरिक्तो ऽपि सिद्धरूपो वेदार्थो ऽस्ति स च पर्युदस्तो जैमिनिना । न्यायान्तरविषयत्वा-दिति गम्यते । तत्कथं यत्तावदिदम् उच्यते धर्मो नाम लोकप्रवादात्सा-मान्यतः सिद्धस्तस्य स्वरूपप्रमाणयोर्विप्रतिपत्तावग्निहोत्रादिरपि वेदार्थो धर्मतया विचारपदवीमुपारोहति यतस्तस्यापि विचारावसरो विद्यते तेन विवक्षितो ऽसौ न चाध्ययनमात्रात् कृतकृत्यता अतोऽध्ययनानन्तरं न गुरुकुलान्निवर्तितव्यम् किन्तु † वेदार्थो धर्मः किं वान्य एवेति जिज्ञासा-मर्हतीति वदितुं धर्मग्रहणं युक्तम् । अथातो धर्मजिज्ञासेति न वेदार्थजि-ज्ञासेति यतो न वेदार्थतया ‡ ज्ञाने प्रवृत्तिर्यत्पुनर्धर्मस्य स्वरूपप्रमाण-कथनाय द्वितीयं सूत्रं तद्वेदप्रामाणको धर्म इति स्यात् । किमिदं चोदना-लक्षण इति तन्नूनं § न सर्वो वेदो धर्म एव कार्यात्मके पर्यवस्यति कश्चि-दस्य भागः कार्यता ‖ शून्ये वस्तुतत्त्वेपि वर्तत इति मन्यते ।

---

* अन्यतमद्विचार्यमिति त्रिष्वपि पुस्तकेष्वस्ति· अन्यतमं विचार्यमिति तु न्याय्यम् ।

† तदयो धर्म इति ३ पु· ।

‡ धर्मज्ञाने इति पश्चात्कृतम् ३ पु· ।

§ नशब्दोऽत्र नास्ति १ पु· ।

‖ शून्य एव वस्तुनि–इति ३ पु· ।

ननु चोदनाग्रहणस्यान्यदेव प्रयोजनम् चुद प्रेरणे इति * प्रेरणाकर्मणश्चोदनेति रूपम् । ततः प्रेरणात्मको विधिरपुरुषार्थे प्रेरयितुमशक्नुवन् पदान्तराभिहितमपि स्वर्गादिकं भावनाकर्मतामापादयति एकपदोपादानात्संनिहित † तरं धात्वर्थं विहायेति कथयितु ‡ मिति । नैतत्सारम् । अध्ययनविधिरध्ययने माणवकं प्रेरयन्नध्यनयस्य पुरुषार्थरूपार्थावबोधकत्वमनापाद्य न शक्नोति प्रेरयितुम् पारम्पर्येणाप्य ऽपुरुषार्थे विधेरपर्यवसानात् । अतस्तदर्थं न चोदनाग्रहणम् वेदग्रहणेनापि तत्सिद्धेः । अपि च वेदग्रहणमेव युक्तम् असन्देहाच्चोदनाग्रहणे § हि सन्देहः स्यात् लोकेऽपि विद्यमानत्वात् । अथ वेदाधिकरणे ‖ वेदाँश्चैके सन्निकर्षमिति विशेषाभिधानाद् वैदिकत्वसिद्धिरिति । सोऽयमाऽऽभाणको लोके पिण्डमुत्सृज्य करं लेढीति सूत्रकारस्याप्यकौशलं ¶ प्रदर्शितं स्यात् । अतश्चोदनाग्रहणादऽचोदनात्मकोऽपि वेदभागोऽभिप्रेत इति गम्यते येन वेदार्थमात्रस्य धर्मत्वं मा भूदिति चोदनेत्यवोचत् । तदेवं सूत्रकार एव स्वशास्त्रविषयातिरिक्तं वेदभागमविचारितमसूसुचत् । ननु दृष्टो हि तस्यार्थः कर्मावबोधनं** तद्भूतानां †† क्रियार्थेन समाम्नायः आम्नायस्य क्रियार्थत्वादिति च सर्वस्य कार्यार्थत्वं दर्शितम् । सत्यम् । तत्प्रक्रमबलात्तन्निष्ठो वेदभाग इति गम्यते न सर्वत्र । अपिच । ‡‡ दृष्टो हि तस्यार्थः कर्मावबोधनमिति न सर्वस्य कर्मावबोधनमर्थ उच्यते । कथम् । वेदाध्ययनानन्तरं स्नानविधायकमाम्नायमुपलभ्य वेदस्यानर्थकत्व आशङ्किते अतिक्रमिष्याम इममाम्नायम् अनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम दृष्टो हि तस्यार्थः कर्मावबोधनमित्यर्थसद्भावः प्रदर्शितो नार्थान्तरासद्भावः । सोयमयोगव्यवच्छेदो नान्ययोगव्यवच्छेदः । कर्मशब्देन §§ धर्म एव कार्यत्वादभिहितः । यतस्तदवबोधप्रवृत्तौ वेदस्यार्थवत्त्वं मृगयते किं वेदस्यार्थो विद्यते न वा स च धर्मत्वेनावगन्तुं शक्यते ‖‖ न वेति । तस्मान्न कर्मावबोधनमेव ¶¶ वेदार्थोऽभिप्रेतो भाष्यकृतः । यत्पुनराम्ना-

---

* प्रेरणाकर्मणा इति ३ पु० । † तरपः स्थाने तमप् ३ पु० । ‡ इतिशब्दो नास्ति ३ पु० ।
§ अपिशब्दोऽधिकः १, २ पु० । ‖ वेदाश्चैके- इति १ पु० । ¶ प्रशब्दो नास्ति ३ पु० ।
** नामेति पश्चात्पूरितम् ३ पु० । †† क्रियार्थे-इति १ पु० । ‡‡ दृढो हि इति १ पु० ।
§§ चशब्दोऽत्राधिकः ३ पु० । ‖‖ नवेति नास्ति ३ पु० । ¶¶ वेदस्याभिप्रेतमिति ३ पु० ।

यस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति । तत्र यद्यानर्थक्यमर्थाभावः । तदसत् । यत एव * मेवम्भूता † र्थमनुवदन्तीति ‡ दर्शितो ऽर्थः । अथ निष्प्रयोजनत्वम् § । स्वाध्यायाध्ययनविधिर्निष्प्रयोजनमक्षरमात्रमपि ‖ न ग्राहयतीति भवतु सोरोदीदित्यादीनामपुरुषार्थप्रतिपादकत्वादेकवाक्यत्वात् पृथक्कार्यकल्पनानुपपत्तेः ¶ कल्पयितुं चाशक्यत्वात् । यानि पुनरपास्ताशेषाशिवमात्मानमनुभवपर्यन्तमवबोधयन्ति वाक्यानि तान्यऽनवद्यप्रयोजनत्वाद्भवन्ति ** तरामेव प्रयोजनवन्ति । अतः स्वयमपुरुषार्थत्वात्तदर्थोपकारितया कथञ्चित् †† पुरुषार्थस्तावकत्वेन प्रयोजनवत्त्वमुक्तम् न सर्वस्यैवाक्रियार्थत्वेनानर्थक्यमाशङ्क्य क्रियार्थत्वेनार्थवत्त्वमुक्तम् । तथा च तद्विधान्येव तत्र वाक्यान्युदाहृतानि । यदपि केचिच्छास्त्रप्रस्थानमन्यथा वर्णयन्ति । न हि किलैवं शास्त्रं प्रस्थितम् किं वेदलक्षणो धर्म उत बुद्धवाक्यादिलक्षण इति । किं तर्ह्यधीतवेदस्य यो ऽर्थो ‡‡ वगतस्तत्रैव विप्रतिपत्तयः सन्ति किमयमसावुतायमिति त §§ न्निराकरणार्थः शास्त्रारम्भ इति । तत्रापि न निखिलवेदार्थविचारप्रतीतिः । ‖‖ तत्कथम् । तथा सति अथातो वेदार्थजिज्ञासेति स्यात् । यतो न धर्म इति कृत्वा विचारः किन्तु वेदार्थ इति । सत्यम् । तथापि शास्त्रकाराणां पुरुषार्थसिद्ध्यर्थं शास्त्रप्रणयनम् ततश्च पुरुषार्थ ¶¶ कथनार्थं धर्मग्रहणमिति । एवम् तर्हि धर्म इत्येव कृत्वा विचारो भवतु तस्य पुरुषार्थत्वात्संदिग्धत्वाच्च । तथा चोत्तरमपि सूत्रमनुगुणं भवति चोदनालक्षणोऽर्थो धर्म इति धर्मस्वरूपविप्रतिपत्तिनिरासपरम् । इतरथा वेदार्थविप्रतिपत्तौ तन्निरासार्थं चोदनालक्षणो वेदार्थ इति स्यात् । यतो न धर्मग्रहणे सति वेदार्थविप्रतिपत्तिः शक्या निराकर्तुम् । कथम् । यत्तावच्चोदनालक्षणो यो ऽर्थः स धर्म इति धर्मत्वं ज्ञाप्येत *** तदा स एव वेदार्थो नान्य इति न लभ्यते । अथ पुनः स धर्म इति नामनामिसम्बन्धो विधीयते । तदप्रक्रान्तम् निष्प्रयोजनम् अति-

---

* एवंस्थाने एवशब्दः ३ पु० ।
† भूतमर्थमिति ३ पु० ।
‡ प्रदर्शित इति ३ पु० ।
§ निष्प्रयोजनत्वं व्याख्यायेतेति २ पु० ।
‖ नेत्यत्र नास्ति किन्तु पूर्वत्र ३ पु० ।
¶ कल्पयिमशक्यत्वादिति १, २ पु० ।
** अतितरामिति ३ पु० ।
†† पुरुषार्थेति नास्ति ३ पु० ।
‡‡ योऽर्थावगम इति ३ पु० ।
§§ तन्निरासार्थं इति ३ पु० ।
‖‖ तदिति नास्ति ३ पु० ।
¶¶ रूपार्थेति अधिकम् ३ पु० ।
*** तदानेति क्वचित् ।

प्रसङ्गश्चा * ऽऽपद्येत । अथापि कथंचिद्धर्मशब्देन वेदार्थ एवोच्यत इति कल्प्येत । तथा सति चोदनालक्षणो वेदार्थो नार्थवादादिलक्षण इति † सिद्ध-प्रमाणवेदार्थविचारो ऽयं स्यात् उत्तरलक्षणवत् । तचानन्तरं प्रामाण्यप्रति-पादनं न युज्येत । वृत्तं प्रमाणलक्षणमिति च मन्त्रार्थवादेषु ‡ कार्यार्थत्वे विप्रतिपत्तिर्न स्यात्सा चोत्तरत्रैव निरस्यते । अतः पूर्वोक्तेन न्यायेन कार्य-निष्ठ एव वेदभागो विचार्यतया प्रक्रान्तो विचारितश्च न वस्तुनिष्ठ इत्यतो वस्तुतत्त्वनिष्ठं वेदभागं विचारयितुमिदमारभ्यते अथातो ब्रह्मजिज्ञासेति ॥

॥ § इति द्वितीयवर्णकं समाप्तम् ॥

---

* चशब्दो नास्ति १ पु॰ । † सिद्धप्रमाणवेदेति १ पु॰ ।

‡ चशब्दः पुनः ३ पु॰ ।

§ इति पञ्चपादिकायां द्वितीयवर्णकम्–इति ३ पु॰ ।

तत्राथशब्द आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः । ब्रह्मजिज्ञासाया अनधिकार्यत्वादित्यादिभाष्यम् तज्जिज्ञासाशब्दस्यावयवार्थेनार्थवत्त्वे युज्यते । अधिक्रियायोग्यस्य ब्रह्मणस्तज्ज्ञानस्य * वा प्राधान्येनानिर्देशात् प्रधानस्य चे † च्छाया अनधिकार्यत्वात् । अयन्तु जिज्ञासाशब्दो विचारवचनो मीमांसापरपर्यायः प्रयुक्तो ऽभियुक्तैः इदमतो ‡ जिज्ञासन्ते किं क्रतुगुणकमुपासनं स्वामिकर्म उतर्त्विक्कर्मेति । इदन्तु जिज्ञास्यम् किं § नु खल्विमौ ‖ तप्यतापकावेकस्यात्मनो भेदावुत जात्यन्तरमिति । धर्ममीमांसाभाष्यकारो ऽपि संघातमेव प्रयुङ्क्ते धर्मं जिज्ञासितुमिच्छेदिति । संघातवाच्यत्वाद्विचारस्य अन्यथैवमवक्ष्यत् धर्मं ज्ञातुमिच्छेदिति । अत एव धर्माय जिज्ञासा धर्मजिज्ञासेति संघातस्यार्थवत्त्वमङ्गीकृत्य चतुर्थीसमासो दर्शितः ¶ तदनुसारेण चैतानि भाष्याणि एवं**वेदवाक्यान्येवैभिर्विचार्यन्ते वेदवाक्यानि विचारयितव्यानि कथं वेदवाक्यानि विचारयेदिति च । पुनश्च क्रत्वर्थपुरुषार्थयोर्जिज्ञासा क्रत्वर्थपुरुषार्थौ जिज्ञास्येते इति । इहापि भाष्यकारो वक्ष्यति तस्माद् ब्रह्म जिज्ञासितव्यमिति । पुनश्च वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना †† प्रस्तूयत इति । अतः संघातस्यार्थवत्त्वादधिकारार्थता युज्यते । शास्त्रवचनो हि जिज्ञासाशब्दः । तेन ब्रह्मजिज्ञासा ऽधिकृता वेदितव्येति ।

उच्यते । नायं जिज्ञासाशब्दः परित्यक्तावयवार्थः केवलमीमांसापर्यायः प्रयुज्यमानो दृश्यते । नापि स्मरणमस्ति । न चावयवार्थेनार्थवत्त्वे सम्भवति समुदायस्यार्थान्तरकल्पना युक्ता । ननु ‡‡ न वयं कल्पयामः दर्शितः शिष्टप्रयोगः । न । तस्यान्यथासिद्धत्वात् । कथमन्यथासिद्धत्वम् । अन्तर्णीतविचारार्थत्वाज्जिज्ञासाशब्दस्य । तथा हि । विचारपूर्वकसाध्यज्ञानविषयेच्छा जिज्ञासाशब्दात्प्रतीयते नोपदेशमात्रसाध्यज्ञानविषया । एवं प्रयोगप्रत्यययोर्दर्शनात् तेन जिज्ञासाशब्दस्यावयवार्थेनार्थवत्त्वाद्युक्तमुक्तम् ब्रह्मजिज्ञासाया अनधिकार्यत्वादिति ।

---

* वाशब्दो नास्ति १, २ पु· । † चशब्दो नास्ति १, २ पु· ।
‡ जिज्ञास्यत इति ३ पु· । § नुशब्दो नास्ति १, २ पु· ।
‖ तप्यतपकाविति १, २ पु· । ¶ समासो नास्ति १, २ पु· ।
** वाक्यान्येभिर्विचार्यन्ते इति २ पु· । †† प्रसूयत इति १ पु· । ‡‡ नशब्दो नास्ति १, २ पु· ।

नन्वेवमपि कुत एतत् । अन्तर्णीतं विचारमाश्रित्य शब्दतो गुणत्वे ऽप्यर्थलक्षणेन प्राधान्येन ब्रह्मतज्ज्ञानयोरधिकारयोग्यत्वाज्ज्ञाधिक्रियमाणत्वमङ्गीकृत्याधिकारार्थत्वं किमिति न गृह्यते येन शब्दलक्षणेन प्राधान्येनेच्छाया अनधिकार्यत्वादानन्तर्यार्थत्वमेव परिगृह्यत इति । उच्यते । शास्त्रस्यानारम्भप्रसङ्गादऽधिकारार्थत्वानुपपत्तेः । अधिकारार्थत्वे ह्यप्रयोजनं शास्त्रं काकदन्तपरीक्षावदनारभ्यं स्यात् । तत्र कस्याधिकार * उच्येत ।

ननु ब्रह्मज्ञानं प्रयोजनम् तदर्थः शास्त्रारम्भः । न । ब्रह्मज्ञाने ऽर्थित्वानुपपत्तेः । ब्रह्मज्ञानाद्धि मनसो ऽपि वियोगान्निखिलविषयानुषङ्गनिवृत्तिः श्रूयते । सा च सार्वभौमोपक्रमं ब्रह्मलोकावसानमुत्कृष्टोत्कृष्टसुखं श्रूयमाणं सोपायं निवर्तयति । अतो ब्रह्मज्ञानादुद्विजते लोकः कुत † स्तत्र प्रवृत्तिः । नन्वानन्दरूपतापि ब्रह्मज्ञानादाप्यते अतस्तदर्थी प्रवर्तते तत्र । मैवम् । न हि ब्रह्मानन्दो ऽननुभूतपूर्वो ऽनुभूतभोग्यसुखाभिलाषं मन्दीकर्तुमुत्सहते येन ‡ तदुज्झित्वा ब्रह्मज्ञाने प्रवर्तेत । ननु परितृप्त § रूपतापि ब्रह्मज्ञानात् । अतः परितृप्तः किं कामयते अतृप्तिनिमित्तकत्वात्कामस्य । तथा च श्रुतिः ‖ आप्तकामः आत्मकामः । स्मृतिरपि आत्मलाभान्नपरं विद्यते एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारतेति । ¶ न । तृप्तेरेवोद्वेगदर्शनाद्विषयविच्छेदात्मिकायाः । तथा च वक्तारो भवन्ति । अहो कष्टं किमिति सृष्टिरेवं न बभूव यत् सर्वदैव भोक्तुं सामर्थ्यमऽतृप्तिर्भोग्यानां चाक्षय इति । रागिगीतं श्लोकमप्युदाहरन्ति ** अपि वृन्दावने शून्ये शृगालत्वं स इच्छति । नतु निर्विषयं मोक्षं कदाचिदपि गौतमेति । मा भूद् ब्रह्मज्ञानार्थिता वेदार्थत्वादेव ब्रह्मज्ञानं कर्तव्यम् स्वाध्यायाध्ययनस्यार्थावबोधफलकत्वात् । स्यादेतदेवम् यद्यर्थावबोधफला ऽध्ययनक्रिया स्यात् । सा ह्यधीयमानाऽवाप्तिफलत्वादक्षरग्रहणान्ता । †† अथाक्षरग्रहणं

---

* उच्यते इति ३ पु० ।

† तत्रेति २ पु० नास्ति ।

‡ तद्धित्वेति १, २ पु० ।

§ रूपशब्दो नास्ति ३ पु० ।

‖ आत्मकाम आप्तकाम इतीति ३ पु० ।

¶ न शब्दः १, २ पु० ।

** वरं वृन्दावनेऽरण्ये शृगालत्वं व्रजाम्यहम् । न तु वैशेषिकीं मुक्तिं कदाचिदपि गौतमेति ग्रन्थान्तरेषूपलभ्यते पाठः ।

†† अथाक्षरग्रहणान्तेति १ पु०, पुनर्भवति ।

निष्प्रयोजनमिति न तत्र पर्यवसानं विधेः । भवतु तर्हि सक्तूनां गतिः । तदपि न । अक्षरेभ्यः प्रयोजनवदर्थावबोधदर्शनात् । न तर्हि निष्प्रयोजनान्यक्षराणि । अतस्तत्पर्यन्तमध्ययनं न निष्फलम् । अतो ऽक्षरग्रहणादेव नियोगसिद्धेः फलप्रयुक्त एवार्थावबोधः । अपिच । अक्षरग्रहणान्तो विधिर्निष्प्रयोजन इति न सर्वत्र प्रयोजनवदर्थावबोधपर्यन्तता कल्पयितुमपि शक्यते । तत्रावश्यं कल्पनीया ऽक्षरग्रहणान्तता । तद्यथा राजन्यस्य सत्रवैश्यस्तोमवृहस्पतिसवानामाम्नानं वैश्यस्य चाश्वमेधराजसूयसत्राणां पाठः । न च तेषामनध्ययनमेव । स्वाध्यायशब्देन सकलवेदवाचिना ऽध्ययनस्य विहितत्वात् । ननु चाश्रूयमाणाधिकारो ऽध्ययनविधिः दृष्टश्चाक्षरग्रहणे ऽर्थावबोधः स कल्पनामधिकारस्यं निरुन्धन् स्वयमधिकारस्य हेतुः संपद्यते । दृष्टाधिकारेषु प्रत्यक्षतस्तदुपलब्धावधिकारसिद्धिः । अतो ऽर्थावबोधपर्यन्तः स्वाध्यायाध्ययननियोगः । तेन नियोगसिद्ध्यर्थमेव सकलवेदार्थविचारः ।

अत्रोच्यते । भवेदध्ययनविधेरर्थावबोधः प्रयोजनम् । नाधिकारहेतुता अध्ययनात्प्रागसिद्धत्वात् । प्राक् चाधिकारज्ञानेन प्रयोजनम् । अतो न विधेर्दृष्टाधिकारत्वेनार्थावबोधसिद्धिः । यद्येवमधिकाराश्रवणादर्थावबोधे च प्रतिपक्षकल्पनानुपपत्तेः तस्य चाधिकारहेतुत्वानभ्युपगमादप्रवृत्तिरेवाध्ययने प्राप्ता ।

अत्र केचिदाहुः । आचार्यकरणविधिप्रयुक्तस्याध्ययनस्यानुष्ठानमाधानस्येव कामश्रुतिप्रयुक्तस्येति । तदयुक्तमित्यपरे । कथम् । अष्टवर्षं ब्राह्मणमुपनयीतेति यद्ययमाचार्यस्य नियोगः । माणवको न नियुक्तो भवति । अनियुक्तस्य च स्वाध्यायाध्ययने प्रवृत्तिर्न सम्भवति । किंचान्यत् । आचार्यकरणविधिरनित्यः ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहा इति वृत्त्यर्थो ऽधिकारः । अतः स्वेच्छातः प्रवृत्तिः । उपनयनाख्यस्तु संस्कारो नित्यः । अकरणे दोषश्रवणात् अत ऊर्ध्वं त्रयो ऽप्येते यथाकालमसंस्कृताः । सावित्रीपतिता ब्रात्या भवन्त्यार्यविगर्हिताः ॥ नैतैरपूतैर्विधिवदापद्यपि हि कर्हिचित् । ब्राह्मान् यौनांश्च संबन्धानाचरेद् ब्राह्मणः क्वचिदिति । संस्कारश्च स्वाध्यायाध्ययनार्थः एवं च स्वाध्यायाध्ययनमपि नित्यम् । तथा च निन्दाश्रवणम् अश्रोत्रिया अननुवाक्या अनग्नयः शूद्रसधर्माणो भवन्तीति । एवं चेत् कथं नित्यमनित्येन

प्रयुज्यत इति वाच्यम् । ननु कथमाचार्यकरणविधिरनित्यः । यावता वृत्त्यर्थो हि सः । नहि कश्चिद्विना धनेन जीविष्यति । तथाचोक्तम् । जीविष्यति विना धनेनेत्यनुपपन्नमिति । अतः सर्वेषां सर्वदा समीहितफलः सन् कथमनित्यः स्यात् । भवेदेवं नित्यता फलवशेन न शब्दात् । तथाहि । फलस्य नित्यसमीहितत्वादवश्यकर्त्तव्यता वास्तवी । तच्चासति शब्दव्यापारे इच्छातः कर्तव्यताप्रतिपत्तिः स्यान्न कर्तव्यताप्रतिपत्तेरिच्छा । शाब्द्यां हि नित्यकर्त्तव्यताप्रतिपत्तौ शब्दस्य सर्वदा सर्वान् प्रत्येकरूपत्वादिच्छापि तद्वशवर्तिनी तथैव स्यात् । औचित्यादिभावे ऽपि कस्यचित्कथंचित् क्वचित् कदाचिदिच्छायाः । प्रमाणतस्तावन्नित्यः । तेन नित्येन तथाविधमेव प्रयुज्यत इति न नित्यानित्यसंयोगविरोधः । फलवशात्तत्कर्तव्यताप्रतिपत्तौ यद्यपि नित्याभिलषितं फलम् तथाप्युपायान्तरादपि तत्सिद्धेः तदेकोपायत्वे ऽप्यालस्यादाऽऽयासासहिष्णुतया वा कामस्य कुण्ठीभावे न कर्तव्यतायाः प्रतिपत्तिरित्यनित्यत्वे सति न तेन नित्यस्य प्रयोज्यत्वमुपपद्यते ।

ननु पितुः पुत्त्रोत्पादनविधिरनुशासनपर्यन्तः श्रूयते तस्मात्पुत्त्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासतीति । अतः पुत्त्रोत्पादनस्य नित्यत्वात्तस्य चानुशासनपर्यन्तत्वात्तदाचिप्तत्वाच्चोपनयनाध्ययनयोः कथमाचार्यकरणविधिरनित्यः स्यात् । कथं वा ऽध्ययनस्यार्थावबोधपर्यन्तता न भवेत् । उच्यते । नानेन पुत्त्रानुशासनं विधीयते पुत्त्रोत्पादनविधिशेषत्वेन स्वतन्त्रमेव वा । किन्तु सम्पत्तिकर्मविधिशेषो ऽयमर्थवादः तेनैकवाक्यत्वात् । अतो यथाप्राप्तमनुशासनमनुवदति । किं तदनुशासनम् कथं वा तत्प्राप्तवदनूद्यते । उच्यते । नित्यस्य पुत्त्रोत्पादनविधेः प्रयोजनं यत् पितॄणां लुप्तपिण्डोदकक्रियाणां नरकपातश्रवणात् पितृपिण्डोदकक्रियाद्यनुष्ठानेन नरकपातत्राणम् । न च शास्त्रीयेण परिज्ञानेन विना तदनुष्ठानं सम्भवति । तेन पित्रा नित्यमात्मनः पुत्त्रोत्पादनाधिकारं परिसमापयितुं पुत्त्रस्यावश्यकर्तव्यार्थविषयं गर्भाष्टवर्षेण ब्राह्मणेन त्वयोपनयनाख्यः संस्कारः कारयितव्यो यः स्वाध्यायाध्ययनार्थो विहित इति यदनुशासनम् तदिहानूद्यते तस्मादेनमनुशासतीति । तथा च लिङ्गम् । श्वेतकेतुर्हा ऽऽरुणेय आस तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यं न वै * सो-

---

* सोम्येति ९, ३ पु०, श्रौतस्तु सोम्येत्येव पाठः ।

म्यास्मत्कुलीनो ऽननूच्य ब्रह्मबन्धुरिव भवतीति । तदेवमनित्येनाचार्यकरणविधिना कथं नित्यं प्रयुज्यत इति वाच्यम् । किंच । आचार्ये प्रेते आचार्यान्तरकरणं न प्राप्नोति । नह्यधिकारी प्रतिनिधीयते नाप्यधिकारः । अधिकारी स्वाधिकारसिद्ध्यर्थं साधनान्तर * भ्रेषे साधनान्तरं † प्रतिनिधाय स्वाधिकारं निर्वर्तयतीति युक्तम् । एवमेषा बहुदोषा कल्पना दृश्यते । तस्मान्माणवकस्यैष नियोगः । कथं गुणकर्तृव्यापारसंबद्धो विधिः प्रधानकर्तृस्थो भवति । यथैतया ग्रामकामं याजयेदिति ग्रामकामस्य यागो विधीयते गुणकर्तृव्यापारः प्राप्तो ऽनूद्यते तस्य याजनस्य वृत्त्यर्थत्वात् । एवमिहापि गुणकर्तृव्यापारो वृत्त्यर्थत्वेन प्राप्तो ऽनूद्यते ।

अत्रैके प्रत्यवतिष्ठन्ते । युक्तं याजयेदिति प्रधानकर्तृव्यापाराभिधायिनो यजतेः परस्य गुणकर्तृव्यापाराभिधायिनः शब्दान्तरस्य णिच उपादानात् तस्य चाविधेयत्वात् प्रधानकर्तृव्यापारस्याभिधानम् । इह पुनरेको नयतिर्माणवकस्य व्यापारं ब्रूयादाचार्यस्य वा । न ‡ तावन्माणवकस्य नयत्यर्थे कर्तृत्वम् । कर्मकारकत्वात्तस्य । अतो ऽनभिधेयव्यापारः § कथं ‖ नियुज्येत । न हि परव्यापारे परो नियोक्तुं शक्यते स्वव्यापारे हि पुरुषस्य नियोगः । तस्मान्नैष माणवकस्य नियोगः । तदेवमाचार्यकरणविधिप्रयुक्तत्वादध्ययनस्य नाचाधिकारचिन्तया मनः खेदयितव्यमिति । उच्यते । माणवकस्यैवायं नियोगः नाचार्यस्येह किञ्चिद्विधेयमस्ति । कथं यावत्तादुपनयीतेत्यस्याभिधानतो न्यायतश्च निरूप्यमाणोऽर्थ एतावान् प्रतीयते आत्मानमाचार्यं कर्तुं कञ्चिदात्मसमीपमानीयाध्यापयेदिति । एतच्च सर्वं वृत्त्यर्थत्वेन ब्राह्मणस्यान्यत एव प्राप्तम् नात्र विधातव्यम् । तत्र कमऽध्यापयेदिति विशेषाकाङ्क्षायां ब्राह्मणमष्टवर्षमिति विशेषस्य विधायकमेतत्स्यात् । तत्र च प्राप्ते व्यापारे ऽर्थद्वयविधानमेकस्मिन्वाक्ये न शक्यते वक्तुम् वाक्यभेदप्रसङ्गात् । अतो नाचार्यस्य किञ्चिद्विधेयमिहास्ति । ननु माणवकस्यापि न किंचिद्विधेयमस्ति । अस्तीति ब्रूमः । कथम् । यदैवोपनयीतेति शब्दतो न्यायतश्चात्मानमाचार्यं कर्तुमुपनयनेन संस्कृत्य ¶ कंचिदध्याप-

---

* भ्रेशे इति १ पु० । † प्रतिनिधीयेति २ पु० । ‡ नकारो नास्ति २ पु० ।
§ किंचिदिति २ पु० । ‖ नियुज्यते-इति २, ३ पु० ।

येदिति प्रतीयते तदेव यागश्रुतौ द्रव्यदेवतामात्रप्रतीतिवदऽध्ययनायोपनयनेन संस्कार्योऽपि समान्यतः प्रतीयते । तस्य च प्रेक्षावतो निष्प्रयोजने प्रवर्त्तयितुमशक्यत्वात् विद्यमानस्याप्यध्ययने ऽर्थावबोधस्य प्रागसिद्धिः प्रवृत्तिहेतुत्वासिद्धेः । विधितो ऽवश्यकर्तव्यतां प्रतिपद्य स्वयमेव प्रवर्तते । तेनाष्टवर्षं ब्राह्मणमुपनयीतेति अष्टवर्षो ब्राह्मण * उपसर्येदाचार्यमित्यर्थः ग्रामकामं याजयेद्ग्रामकामो यजेतेति यथा । नन्वेवमप्यधिकारो न लभ्यते । अस्त्यत्राधिकारहेतुर्नित्यं निमित्तम् वयोविशिष्टा जातिः जातिविशिष्टं वयो वा । ननु जातिवयसी विशेषणमुपादेयस्य अनुपादेयविशेषणमधिकारहेतुरिति स्थितिः । सत्यमस्तीयं स्थितिः किन्तु कर्तुरधिकारे इत्यपि स्थिता न्यायविदः । किंच । इह न माणवको जातिवयोविशिष्ट उपादेय उपनयने किं तूपनयनमेव † तदर्थं विधीयते संस्कारस्य संस्कार्योद्देशेन विधानात् । अतः संस्कार्यस्यावच्छेदकत्वं वयोजात्यवच्छिन्नं ‡ सद्भवति नित्यनिमित्तं माणवकस्य संस्कार्यत्व इति । तदेवमुपनयनस्याध्ययनार्थत्वात्तस्य च साधिकारत्वा§त्तेनचाधिकारेण साधिकारो ऽध्ययनविधिः । अक्षरग्रहणमात्रेण चाधिकारसिद्धिः अर्थावबोधस्तु कारणान्तरादिति ।

ननु चैवमधीतो वेदो ‖ धर्मजिज्ञासाया हेतुर्ज्ञातः अनन्तरं धर्मो जिज्ञासितव्य इति वेद एवाधीतो ऽन्यनिरपेक्षो धर्मजिज्ञासाया हेतुरिति वदन्ति । सत्यम् । तथैव तत् को वा ऽन्यथा वदति अधीतवेदो ह्यवश्यकरणीयानि नित्यनैमित्तिकान्यऽकरणे ¶ प्रत्यवायजनकानि कर्माणि प्रतिपद्यते । तान्यनन्तरमेवावश्यविचारणीयानि कथमेतान्यनुष्ठेयानीत्यतः प्रागध्ययनादप्रतिपत्तेरयोग्यत्वादधीतवेदत्वमेवान्यनिरपेक्षमर्थावबोधहेतुरिति गीयते । न तथा ब्रह्मज्ञानमवश्यकर्तव्यम् अकरणे प्रत्यवायहेतुरिति प्रमाणमस्ति । तस्मादधीतवेदेनावश्यकर्तव्या धर्मजिज्ञासा नैवं ब्रह्मजिज्ञासा । तदेवं ** ब्रह्मजिज्ञासाया अधिकारानर्हत्वादर्हयोश्च †† ब्रह्मतज्ज्ञानयोरनर्थ्यमान-

---

* उपसर्येरिति पाठः सर्वपुस्तकेषु लभ्यते ।

† तादर्थ्येन विधीयत इति २ पु॰ ।

‡ सदिति नास्ति ३ पु॰ ।

§ तेनैवाधिकारेणाधिकार इति १ पु॰ ।

‖ धर्मस्य जिज्ञासाया इति २ पु॰ ।

¶ प्रत्यवायनिमित्तानीति २ पु॰ ।

** ब्रह्मज्ञानेच्छाया इति २ पु॰ ।

†† चशब्दो नास्ति २ पु॰ ।

त्वात् * जिज्ञासा ऽनुपपन्ना । मङ्गलस्यापि वाक्यार्थे समन्वयाभावात् श्रुतिमा- त्रोपयोगाच्च साधूक्तम् अथशब्द आनन्तर्यार्थः परिगृह्यते † नाधिकारार्थ इति । ननु प्रक्रियमाणात्पूर्वप्रकृतमपि किञ्चिन्नियमेन प्रतीयते ऽथशब्दात् ततस्त- त्प्रतिपत्त्यर्थं किमिति न गृह्यते । उच्यते । नैतदानन्तर्याद्व्यतिरिच्यते । कथम् । एवम् । तत्प्रक्रियमाणस्य नियमेन पूर्ववृत्तं भवति । यदि तस्यान- न्तरं तन्मात्रापेक्षं तत्प्रक्रियेत एवं सति प्रक्रियमाणस्य हेतुभूतो ऽर्थः पूर्व- निर्वृत्तो भवति । अन्यथा यस्मिन् कस्मिंश्चित् पूर्ववृत्तापेक्षायामनुवादा- दृष्टार्थत्वयोरन्यतरत्वप्रसङ्गात् । अतो हेतुभूतोऽर्थो ऽपेक्षिततव्यः तदिदमाह पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकादिति । सति चानन्तर्यार्थत्वे यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यम् स्वाध्यायानन्तर्यन्तु समानमिति । येन विना नियमेनानन्तरस्य न प्रक्रिया स तादृशो हेतुः पूर्वनिर्वृत्तो वक्तव्यो यस्यानन्तरं ब्रह्मजिज्ञासा प्रक्रियते । स्वाध्यायाध्ययनन्तु समानं साधारणो हेतुर्धर्मब्रह्मजिज्ञासयोः । अतश्चाथातो ब्रह्मजिज्ञासेति पुनरथशब्देन त- न्मात्रापेक्षणं व्यर्थं स्यात् । अथवा । समानं नात्यन्तमपेक्षितम् न स्वयमेव सामर्थ्यं जनयितुं प्रयोक्तुं च शक्तम् । अतः समानो हेतुर्नावश्यं निष्पा- दक इत्यर्थः ।

नन्विह ‡ कर्मविधिबोधानन्तर्ये विशेषः । तथा च वृत्त्यन्तरे वर्णितम् । कर्मणामधिकारपरम्परया शब्दतो वा संस्कारतया वा यथाविभागन्तादर्थ्य- विगमान्निःश्रेयसप्रयोजनत्वाच्चानन्तर्यवचनो ऽथशब्दो ऽधिगतानन्तरमिति अन्यैरपि स्ववृत्तौ वर्णितम् तत्राथातःशब्दौ प्रथम एवाध्याये प्रथमसूत्रे वर्णितौ । अथेति पूर्वप्रकृतां धर्मजिज्ञासामपेक्ष्यानन्तरं ब्रह्मजिज्ञासाप्रारम्भार्थः । अत इति पूर्वनिर्दिष्टस्यैवार्थस्य हेतुतामाचष्टे ब्रह्मजिज्ञासां प्रतीति । अत्राह न धर्मजिज्ञायाः प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति । वेदान्ता- ध्ययनं यद्यपि केवलं न § पुष्कलं कारणम् तथापि न तेन विनोत्पद्यते ब्रह्म- जिज्ञासा उपपद्यते तु धर्मावबोधनं विनापीत्यभिप्रायः । कथम् । तत्र तावद्ध-

---

* जिज्ञासानुपपत्तेः २ पु० । † नाधिकारार्थ इति नास्ति २ पु० ।
‡ कर्मावबोधानन्तर्यं विशेष इति २ पु० । § पुष्टं कारणमिति २ पु० ।

र्मजिज्ञासायां त्रयं वृत्तं द्वादशलक्षणे प्रतिपादितन्यायसहस्रं तदनुग्रहोपजातश्च वाक्यार्थनिर्णयः वाक्यार्थश्चाग्निहोत्रादिकं कर्म । तत्र यः प्रथमसूत्रे ऽथशब्दापादानसूचितो न्यायः स्वाध्यायस्यार्थावबोधोपयोगप्रतिपत्तिहेतुः यदप्यौत्पत्तिकसूत्रे शब्दार्थयोः सम्बन्धनित्यत्वेन वेदान्तानां चापौरुषेयत्वेन कारणेनानपेक्षत्वं नाम प्रामाण्यकारणमुक्तम् । तदुभयमिहाप्युपयुज्यतामपेक्षितत्वात् । इतरस्य पुनर्न्यायकलापस्य न ब्रह्मजिज्ञासायामुपयोगो ऽस्ति । यतो निरस्ताशेषप्रपञ्चं ब्रह्मात्मैकत्वं प्रतिज्ञातम् तत्र न तत्प्रतिपादने तत्प्रतिपादनसामर्थ्ये वा शब्दानां कश्चिन्न्यायो ऽभिहितः । यत्पुनः प्रथमतन्त्रसिद्धन्यायोपजीवनम् अस्मिन्नपि तन्त्रे तत्सगुणविद्याविषयम् । तत्र च मानसी क्रियोपासना विधेया ऽनित्यफला धर्मविशेष एव । तदेवं न्यायकलापस्य न ब्रह्मजिज्ञासायामुपयोगः । अतो न तदपेक्षो ऽथशब्दः । यत्पुनः स्वाध्यायस्यार्थावबोधोपयोगे ऽनपेक्षत्वेन स्वतःप्रामाण्यसिद्धौ च न्यायद्वयम् तदपेक्षितमपि न केवलं ब्रह्मजिज्ञासाकारणम् *स्वाध्यायवदेव तेन न तदपेक्षो ऽथशब्दः । यः पुनर्वाक्यार्थनिर्णयः स न कथमपि ब्रह्मजिज्ञासायामुपयुज्यते । न ह्यन्यविषयं ज्ञानमन्यत्र प्रवृत्तौ हेतुः । प्रतिपत्तौ कदाचित् स्यादपि यथा ऽनुमानादौ । तदपीह नास्ति । धर्मब्रह्मणोः सम्बन्धानिरूपणात् । अतः कर्मणामुपयोगः परिशिष्यते । तथाच तैरप्युक्तम् । कर्मणामधिकारपरम्परया शब्दतो वा संस्कारतया वा यथाविभागं तादर्थ्यावगमादिति । अत्रेदं निरूप्यते । केयमधिकारपरम्परा कथं वा तादर्थ्यमिति । यथा तावत् प्रासादमारुरुक्षोः सोपानपरम्परा क्रमशः प्राप्यमाणा प्रासादारोहणहेतुर्न तथेह ब्रह्मजिज्ञासां चिकीर्षोः कर्माणि सहस्रसंवत्सरपर्यन्तानि तत्क्रियाहेतुतया स्थितानि प्रमाणाभावात् । अथ †कामोपहतमानसस्तदभिमुखो ब्रह्मजिज्ञासायां नावतरति । कर्मभिस्तु कामावाप्तौ तदुपशमाद् ब्रह्मजिज्ञासायामवतरति । तथा च सार्वभौमत्वाद्युत्तरोत्तरशतगुणोत्कर्षावस्थितान् ‡ब्रह्मलोकावाप्तिपर्यन्तान् कामानवापयन्ति अधिकारपरम्परया कर्माणि ब्रह्मलोकात्परं कामयितव्याभावान्निर्विषयस्य च कामस्यानुपपत्तेः दग्धेन्ध-

---

* स्वाध्यायदेवेति न न तदेपक्षोऽप्यथशब्दः ३ पु० ।

† कामोपहतमनाः—इति ३ पु० ।

‡ ब्रह्मणो लोकावाप्तीति १ पु० ।

नाग्निवत्कामोपशमे ब्रह्मजिज्ञासां करोति । कर्मानुष्ठानान्तर्यं तर्हि वक्तव्यम् न *धर्मावबोधानन्तर्यम् । कथं वा† कामाग्निः कामोपशमहेतुः । दृष्टान्तसामर्थ्यात् । यथा हविषा कृष्णवर्त्मा वर्द्धमानोपि सर्वहविःप्रक्षेपे सर्वं दग्ध्वा स्वयं शाम्यति । एवं विषयेन्धनः कामो यावद्विषयं ‡ वर्द्धमानो ऽपि तत्क्षये क्षीणेन्धनाग्निवत्स्वयं शाम्यतीति युक्तम् । सत्यं युक्तम् यदि §हिरण्यगर्भोपभोगो न क्षीयेत । क्षीयते तु कृतकत्वात्परिच्छिन्नविषयत्वाच्च । तत्क्षये पूर्ववद्॥दनवाप्तो ऽवाप्तव्य इति कामः समुल्लसत्येव । अतो विषयस्य क्षयादिदोषदर्शना¶त्कामोपशमो हिरण्यगर्भस्यापि । तथा चोक्तम् ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः । ऐश्वर्यं चैव धर्मश्च सह सिद्धं चतुष्टयम् इति । तस्मात्सर्वत्र कामस्य विषयदोषदर्शनमेवोच्छेदकारणं नित्यवस्तुदर्शनं च रसवर्जं रसो ऽप्यस्य परं दृष्ट्वा निवर्त्तत इति स्मृतेः । न चैवंलक्षण आगमो ऽस्ति **हिरण्यगर्भनिखिलविषयावाप्तौ कामोच्छेदो भवतीति । ननु कामावाप्तौ स्वस्थहृदयः कार्यान्तरक्षमो भवतीति सर्वेषां स्वसंवेद्यमेतत् । सत्यम् तदुत्कलिकोपशमात् । तदुत्कलिकोपशमश्च तदा सामर्थ्यहानेः । सति च सामर्थ्ये †† स्वच्छन्दोपभोगसम्भवात् । यदि पुनरेकान्ततो निवृत्तकामो भवेत् न तं विषयं पुनः सङ्गापयेत् । तस्मान्न कर्मणां कामनिबर्हणद्वारेण ब्रह्मजिज्ञासायोग्यतापादनम् अतो न कर्मावबोधापेक्षो ऽप्यथशब्दः ।

भवतु तर्हि संस्कारद्वारेण कर्मणां पूर्ववृत्तत्वम् यस्यैते ऽष्टाचत्वारिंशत्संस्कारा ‡‡ अष्टौ चात्मगुणाः स ब्रह्मणः सायुज्यं गच्छतीति महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुरिति ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः । यथा §§ऽऽदर्शतलप्रख्ये पश्यन्त्यात्मानमात्मनीति च स्मृतेः विविदिषन्ति यज्ञेन दानेन तपसा ऽनाशकेनेति येन केनचन यजेतापि |||| दर्विहोमेनानुपहतमना एव भवतीति च श्रुतेः । वक्ष्यति च सूत्रकारः ¶¶ अत एवाश्रमकर्मा-

---

* कर्मावबोधेति ३ पु० । † कामावाप्तिरिति ३ पु० । ‡ वर्त्तमानोऽपीति १ पु० ।
§ हैरण्येति ३ पु० । || अनाप्त इति ३ पु० । ¶ कामापगम इति २ पु० ।
** हिरण्यगर्भोपभोगान्निखिलेति ३ पु० । †† स्वच्छन्दोपगमसम्भवादिति २ पु० ।
‡‡ अष्टावात्मेति १ पु० । §§ आदर्शतले प्रख्ये पश्यत्यात्मानम् इति ३ पु० ।
|||| दर्विहोमेणेति ३ पु० । ¶¶ अत एवात्र कर्मेति क्वचित् ।

पेक्षा सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति च । सत्यमेवम् यदि समानजन्मानुष्ठितमेव कर्म * संस्कुर्वद् ब्रह्मजिज्ञासायोग्यत्वहेतु: स्यात् । न च नैयोगिके† फले कालनियमो ऽस्ति । तेन पूर्वजन्मानुष्ठितकर्मसंस्कृतो धर्मजिज्ञासां तदनुष्ठानं चाप्रतिपद्यमान एव ब्रह्मजिज्ञासायां प्रवर्तत इति न नियमेन तदपेक्षो ऽथशब्दो युज्यते । एतेन ऋणापाकरणद्वारेणापि नियमेन पूर्ववृत्तत्वं ‡ प्रत्युक्तम् । तथा च श्रुतिस्मृती । यदि वेतरया ब्रह्मचर्यादेव प्रव्रजेत् तस्याश्रमविकल्पमेके ब्रुवत इति । तस्मात्साधूक्तम् धर्मजिज्ञासाया: प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेरिति ।

अथापि स्यान्न हेतुत्वेनाऽनन्तरवृत्तकर्मावबोधापेक्षमथशब्दं ब्रूम: अपि तु क्रमप्रतिपत्त्यर्थम् यथा हृदयस्याग्रे ऽवद्यति अथ जिह्वाया अथ वक्षस इति । तदप्ययुक्तम् । न्यायसूत्रे ऽपि चैककर्तृकाणां बहूनां युगपदनुष्ठानासम्भवादवश्यम्भाविनि क्रमे ब्रूयादपि तन्नियममथशब्द: । एककर्तृकत्वं च शेषशेषिणो: शेषाणां च बहूनामेकशेषिसम्बद्धानामधिकारान्तरप्रयुक्त्युपजीविनां च भवति नेतरथा । न हि धर्मब्रह्मजिज्ञासयोरेतेषामन्यतमत्वे प्रमाणमस्ति तदिदमाह यथा च हृदयाद्यवदानानामानन्तर्यनियम: क्रमस्य विवक्षितत्वान्न तथेह क्रमो विवक्षित: शेषशेषित्वे ऽधिकृताधिकारे वा प्रमाणाभावाद्धर्मब्रह्मजिज्ञासयोरिति । अथापि स्याद्यथा ऽऽग्नेयादीनां षण्णां यागानामेकं फलं स्वर्गविशेष: एवं धर्मब्रह्मजिज्ञासयोरप्येकं फलं स्वर्गस्तत: क्रमापेक्षायां तन्नियमार्थो ऽथशब्द इति । यथा वा द्वादशभिरपि लक्षणैर्धर्म एको जिज्ञास्य: प्रतिलक्षणमंशान्तरपरिशोधनया । यथा वा ऽस्मिन्नपि तन्त्रे चतुर्भिरपि लक्षणैरेकं ब्रह्म जिज्ञास्यम् तत्र चांशान्तरपरिशोधनेन लक्षणानां क्रमनियम: । एवं तन्त्रद्वयेनैकं ब्रह्म जिज्ञास्यम् तत्र क्रमनियमार्थो ऽथशब्द इत्याशङ्क्याह फलजिज्ञास्यभेदाच्च धर्मब्रह्मजिज्ञासयोरिति सम्बन्ध: । तमेव भेदं कथयति अभ्युदयफलं धर्मज्ञानं तच्चानुष्ठानापेक्षम् । अभ्युदय: फलं धर्मज्ञानस्येति प्रसिद्धमेव न‖ कस्यचिद्विसंवाद: । तदपि न ज्ञानस्य फलमपि तु ज्ञेयस्य । तस्यापि न ज्ञेयत्वादेव फलम्

---

* संस्कुर्यादिति ३ पु॰ । † योगिके-इति १ पु॰ । ‡ प्रयुक्तमिति १ पु॰ ।
§ अनन्तरपूर्ववृत्तेति ३ पु॰ । ‖ कश्चिद्विसंवाद इति २ पु॰ ।

किं त्वनुष्ठीयमानत्वात् । निश्रेयसफलन्तु ज्ञानं * न चानुष्ठानान्तरापेक्षमिति ब्रह्मज्ञानस्य फलमपवर्गः । स च नित्यसिद्धो ऽव्यवहितः स्वसंविद्यः यतो ऽविद्या संसारहेतुः । नचाविद्यामनिवर्तयन्ती विद्योदेति । तदेवमत्यन्तविलक्षणत्वात्प्रस्थानभेदाच्च न †फलद्वारेणाप्येकोपनिपातः । तेन न क्रमाकाङ्क्षा तन्त्रद्वयस्य । जिज्ञास्यं पुनरत्यन्तविलक्षणम् । यतः कार्यो धर्मः पुरुषव्यापारतन्त्रः स्वज्ञानकाले ऽसिद्धसत्ताकः प्रथमे तन्त्रे जिज्ञास्यः । इह तु नित्यनिर्वृत्तं पुरुषव्यापारानपेक्षं ब्रह्म जिज्ञास्यम् । किं च चोदनाप्रवृत्तिभेदाच्च । इदमपरं प्रमाणोपाधिप्रमेयवैलक्षण्यं धर्मचोदना हि प्रेरयन्ती पुरुषमसति विषये प्रेरयितुमसमर्था सती विषयमप्यवबोधयति । ब्रह्म प्रमाणं पुनर्बोधयत्येव केवलं नावबोधे पुरुषः प्रेर्यते । अवबोधो हि यथावस्तु यथाप्रमाणं चोदेति न पुरुषस्येच्छा‡मप्यनुवर्तते तत्र कुतः §प्रेर्येत यथा ऽक्षार्थयोः सन्निकर्षे सति तेन सन्निकर्षेणाक्षावगम्यार्थज्ञाने पुरुषो न नियुज्यते तद्वत् अनिच्छतो ऽपि स्वयमुत्पत्तेर्ब्रह्मणि तु नित्यसिद्धत्वान्न प्रेरणा सम्भवति । ब्रह्मचोदनेति चोदनाशब्दो भाष्ये प्रमाणविवक्षाप्रयुक्तो न प्रेरणाविवक्षया तदाह या हि चोदना धर्मस्य लक्षणं सा स्वविषये ‖विनियुञ्जानैव पुरुषमवबोधयति ब्रह्मचोदना ¶पुनः पुरुषमवबोधयत्येव केवलमवबोधस्य चोदनाजन्यत्वान्न पुरुषो ऽवबोधे नियुज्यते । यथाऽक्षार्थसन्निकर्षेणार्थावबोधे तद्वत् । तदेवं जिज्ञास्यैक्यनिबन्धना ऽपि न क्रमापेक्षा तन्त्रद्वयस्य । येन तदपेक्षा ऽथशब्दो व्याख्यायेत । अत उपसंहरति तस्मात् किमपि वक्तव्यं यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति ।

उच्यते । नित्यानित्यवस्तुविवेक इहामुत्रार्थ ** फलभोगविरागः शमदमादिसाधनसपन्मुमुक्षुत्वं चोक्तम् पुरस्तात् अधिकारार्थत्वे अथशब्दस्य शास्त्रारम्भवैयर्थ्यं प्रवृत्त्यभावादिति । प्रवृत्त्यभावे च कारणमुक्तम् । अखिलसुखभोगाद्धिरण्यगर्भावाप्तिपर्यन्तान्निवर्तयति ब्रह्मजिज्ञासा क्रियमाणा तेन ††तत उद्वेगो लोकस्य कुतस्तत्र प्रवृत्तिरिति । तस्माद्यावदस्य ‡‡ हि-

---

* ब्रह्मज्ञानमिति ३ पु० । † नकारो नास्ति १ पु० । ‡ अपिशब्दोनास्ति १ पु० ।
§ प्रेरणा—इति ३ पु० । ‖ विशब्दो नास्ति ३ पु० । ¶ पुनःस्थाने तुशब्दः ३ पु० ।
** फलेति नास्ति १ पु० । †† तत्रोद्वेगो ३ पु० । ‡‡ हिरण्यगर्भावाप्तिरिति २ पु० ।

रण्यगर्भावाप्तिपर्यन्तस्य भोगस्योत्पादपरिच्छेदाभ्यां विनाशित्वादनित्यत्वं जानीते विनश्यदपीदं कूटस्थनित्यवस्तुपर्यन्तमेव विनश्यति । अन्यथा निरुपादानस्य पुनरुत्पत्त्यसम्भव इति वर्त्तमानस्याप्यसम्भवादभावो ऽभविष्यदिति निरूपणात् । नित्यानित्यवस्तुविवेको यावन्न जायते तावद्विरक्तो न जायत *इत्यध्याहारः । यावच्चाभिमुखं विनाशदर्शनाद्बुभुक्षुज्ञानस्यापि भोगान् स्रक्चन्दनवस्त्रालङ्कारभोगानिवाग्निप्रवेशार्थं भोगार्थव्यापारजनितदुःखानुभवाच्च तन्निमित्तां †निर्वृतिमप्यलभमानो भोगाद्विरक्तस्ततो मुमुक्षुत्वं तत्साधनशमदमोपरमतितिक्षासमाधानसम्पन्नो भूत्वा यावन्नालम्बते तावद् ब्रह्मजिज्ञासाङ्कः प्रतिपद्येत कथंचित् वा दैववशात्कुतूहलाद्वा बहुश्रुतत्वबुद्ध्या वा प्रवृत्तो ऽपि न निर्विचिकित्सं ब्रह्मात्मत्वेनावगन्तुं शक्नोति यथोक्तसाधनसम्पत्तिविरहात् अनन्तर्मुखचेता बहिरेवाभिनिविशमानः । तस्माद्गुणितवस्तुकलापादानन्तर्यमभिप्रेत्याथशब्दं प्रयुक्तवानाचार्यः । तदाह भाष्यकारस्तेषु हि सत्सु प्रागपि धर्मजिज्ञासाया ऊर्द्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च न विपर्यये तस्मादथशब्देन यथोक्तसाधनसम्पत्त्यानन्तर्यमुपदिश्यत इति ।

अतः शब्दो हेत्वर्थ इति । स्यादेतत् । कृतकत्वपरिच्छेदौ नैकान्ततः क्षयिष्णुतां गमयतः परमाणुषु पाकज‡लोहितस्य कृतकस्य तेषां च परिच्छिन्नानां नित्यत्वाभ्युपगमात् । वेदे ऽप्यक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति अपाम सोमममृता अभूमेत्यादिपुण्यफलस्याक्षय§त्वश्रवणात् । अतो न विषयभोगान्नियमेन विरागो विवेकिनामपि । नापि कूटस्थनित्यवस्त्ववष्टम्भेन मुमुक्षुत्वम् ततश्च न शमदमादिपरिग्रहः । यतो न तादात्म्यं भोक्तुः सम्भाव्यते । नापि तदवाप्तिः दुःखाभावे ऽपि सुखभोगाभावान्नानवद्यः पुरुषार्थः । अतो ऽजीर्णभयान्नाहारपरित्यागो ‖ भिक्षुभयान्न स्थाल्या अनधिश्रयणम् दोषेषु प्रतिविधातव्यमिति न्यायः । अतो न तस्य ब्रह्मजिज्ञासायां हेतुत्वमित्यतस्तस्य हेतुत्वप्रदर्शनार्थो ऽतःशब्दः । कथम् । यस्माद्वेद एवाग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति तद्यथेह ¶ कर्मजितो लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयत इत्यादिना ।

---

* इत्यध्याहार इति २, ३ पु॰ नास्ति । † निर्वृत्तिमिति ३ पु॰ ।
‡ लोहित्यस्येति २, ३ पु॰ । § त्वशब्दो नास्ति १, २ पु॰ । ‖ भिक्षुकभयादिति ३ पु॰ ।
¶ कर्मचित इति प्रायो बहुत्र भवति तथापि कर्मजित इति श्रौतो न्याय्यः पाठः ।

ननु * पुण्यस्याप्यक्षयफलत्वं वेद एवाहेत्युक्तम् । न । तस्य वस्तुबल- प्रवृत्तानुमानविरोधे ऽर्थवादस्य नित्यत्वप्रतिपादनाऽसामर्थ्यात् । परमाणूनां पाकजस्य च तद्गुणस्यानित्यत्वात्। अतो भवत्य†नित्यत्वदर्शनं विषयभोगानां मुमुक्षुत्वे हेतुः । यत्पुनर्मुमुक्षुत्वाभावे निमित्तमुक्तम् तत्राह तथा ब्रह्मज्ञाना- दपि परं पुरुषार्थं दर्शयति ब्रह्मविदाप्नोति परमित्यादि । अत उपसंहरति तस्माद्यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्येति । ‡ यतः परि- पूर्णो हेतुरनन्तरमवश्यं कार्यमारभते अतः कर्तव्येत्यावश्यकतामाह भाष्य- कारः । यतो द्वैतानुषङ्गादतितरामुद्विजमानेन ब्रह्मात्मत्वं च हस्तप्राप्तमिव मन्यमानेन प्रवर्तितव्यमेव ब्रह्मजिज्ञासायां प्रदीप्तशिरस्केव जलराशौ §स्पृशतेव च सुस्वादु फलमङ्गुल्यग्रेणाग्रपादस्थेन । एवं सत्यर्थाद्धर्मजिज्ञासाया नियमेन पूर्ववृत्तत्वमथशब्देन पूर्वोक्तेन न्यायेन निराक्रियते ‖ब्रह्मणो जिज्ञासा ब्रह्म- जिज्ञासेति । अन्तर्णीतविचारान्वये हि चतुर्थीसमासः स्यात् न शब्दाभि- धेय इत्यवयवार्थमङ्गीकृत्य षष्ठीसमासो दर्शितः । ब्रह्मशब्दस्यार्थनिर्देशावसरे प्राप्ते सूत्रकार एव निर्देक्ष्यतीति कथयति ब्रह्म च वक्ष्यमाणलक्षणं जन्मा- द्यस्ययत इति । तत्र यदन्यैर्वृत्तिकारैः ब्रह्मशब्दस्यार्थान्तरमाशङ्क्य निर- स्यते न खलु ¶ब्राह्मणंजातिरिह गृह्यते प्रत्यक्षसिद्धत्वाज्जिज्ञास्यत्वाभावात् । नापि तत्कर्तृका जिज्ञासा त्रैवर्णिकाधिकारात् । नापि जीवपरिग्रहस्तत्कर्तृ- त्वे विशेषणानर्थक्यात्कर्मत्वे नित्यसिद्धत्वात् । न शब्दराशेर्ग्रहणम् तस्य धर्म- जिज्ञासौत्पत्तिकसूत्राभ्यामर्थवत्त्वप्रमाणत्वयोर्निरूपितत्वात् । नापि हिरण्य- गर्भस्य । तदवाप्तेरपि विरक्तस्य ब्रह्मजिज्ञासोपदेशात् । नापि तत्कर्तृकताज्ञा- नवैराग्ययोः सहसिद्धत्वादिति । तदपि न कर्तव्यमित्याह अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यमिति ।

ब्रह्मण इति कर्मणि षष्ठी । वृत्त्यन्तरे तु शेषलक्षणा व्याख्याता तां निरस्यति न शेष इति । तत्र हेतुमाह जिज्ञास्यापेक्षत्वाज्जिज्ञासा- या इति । अथापि स्यादन्यज्जिज्ञास्यमिति तदर्थमाह जिज्ञास्यान्तरा-

---

* पुण्यस्याक्षयहेतुत्वमिति २ पु॰ ।
‡ अत इति १ पु॰ ।
‖ ब्रह्मणो जिज्ञासेति नास्ति २, ३ पु॰ ।
† अनित्यदर्शनमिति २ पु॰ ।
§ स्पृशते न च सुस्वाद्विति ३ पु॰ ।
¶ ब्राह्मणत्वादीति २, ३ पु॰ ।

निर्देशाच्चेति । पुनः शेषषष्ठीवाद्याऽऽह ननु शेषषष्ठीपरिग्रहे ऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते सम्बन्धसामान्यस्य विशेषनिष्ठत्वादिति । यद्यपि शेषे षष्ठीति सम्बन्धमात्रे षष्ठी विहिता तथापि व्यवहारो विशेषमवलम्बते । बहवश्च सम्बन्धविशेषास्तत्रावश्यमन्यतमः प्रतिपत्तव्यः अन्यथा व्यवहारानुपपत्तेः । तत्र प्रकरणोपपदयोर्विशेषहेत्वोरभावादर्थाद्विशेषक्रियोपादानात् कारकत्वेनैव सम्बन्धः तत्रापि सकर्मिकायाः कर्मकारकमभ्यर्हितमिति कर्मत्वं ब्रह्मणो न विरुध्यते । एवमपि साधारणे शब्दे ऽभिप्रेतमर्थं विहायार्थान्तरं परिगृह्य पुनस्तद्द्वारेणाभिप्रेतमर्थं * प्रतिपद्यमानस्य व्यर्थः प्रयासः स्यात् । तदाह एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यादिति ।

ननु किमिति व्यर्थः शेषषष्ठीपरिग्रहे सामान्येन यत् किञ्चिद् ब्रह्मसम्बन्धि † येनयेन जिज्ञासितेन विना ब्रह्म जिज्ञासितं न भवति तत्सर्वं जिज्ञास्यत्वेन प्रतिज्ञातं स्यात् । अतो न ‡ विशिष्टसम्बन्धो विवक्ष्यते सामान्ये तस्याप्यन्तर्भावादिति यदुच्यते तदाह न व्यर्थो ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेदिति । स्वयमेव परोक्तमाशङ्क्योत्तरमाह न प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वादिति संक्षेपतो वस्तुसङ्ग्रहवाक्यम् । एतदेव प्रपञ्चयति ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात् प्रधानम् तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति तान्यर्थाक्षिप्तान्येवेति न पृथक् सूचयितव्यानि यथा राजासौ गच्छतीत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति तद्वदिति । यस्माद् ब्रह्मावाप्तिः पुरुषार्थः तेन तज्ज्ञानेनाप्तुमिष्टतमम् अतस्तदर्थत्वात्प्रवृत्तेः प्रधानं तत् तस्मिन् प्रधाने जिज्ञास्यमाने येन जिज्ञासितेन विना न सम्पूर्णा जिज्ञासा तत्सामर्थ्यादेव तादर्थ्येन जिज्ञास्यते न पृथगभिधानेन § कृत्यमस्ति । यथा राजासौ गच्छतीत्युक्ते यावता परिवारेण विना राज्ञो गमनं न सम्पद्यते तावतो गमनमर्थाक्षिप्तमिति न पृथगभिधीयते लोके तद्वदिहापि स्वरूपप्रमाणयुक्तिसाधनप्रयोजनानि ब्रह्मज्ञानपरिपूर्णतार्थमर्थादेव जिज्ञास्यत्वान्न पृथक् सूचयितव्यानि । किंच । शास्त्रप्र-

---

* प्रतिपाद्यमानस्येति १ पु॰ ।
† येनेति सकृदेव १ पु॰ ।
‡ विशिष्टएवेति २, ३ पु॰ ।
§ कृत्यमस्तीत्यस्य स्थाने समस्तीति ३ पु॰ ।

श्रुतिरेव कर्मणि षष्ठीं गमयति । कथम् । एवं हि शास्त्रमारब्धव्यम् पुण्यचितो लोकः क्षीयत इत्यादिश्रुतेर्न्यायतश्च पुण्यस्य क्षयदर्शनाद्विरक्तस्य ब्रह्मविदाऽऽप्नोति परमित्यादिश्रुतेर्ब्रह्मज्ञानात्पुरुषार्थसिद्धिः परेति । अतस्तज्ज्ञातुमिच्छतः श्रुत्या यतो वा इमानि भूतानि जायन्त इत्येवमाद्यया तत्प्रतिपादनपूर्वकं तद्विजिज्ञासस्वेति साक्षादेव कर्मतया ज्ञेयत्वेनानुशासनं यत् तदिदमथातो ब्रह्मजिज्ञासेति सूचितम् । तेन कर्मषष्ठीपरिग्रहे श्रुतिन्यायसूचनपरं सूत्रं तदनुगतं भवति । अन्यथा लक्ष्यानुगतमसम्बद्धं स्यात् । तदाह श्रुत्यनुगमाच्चेति वस्तुसङ्ग्रहवाक्यम् । * तत्प्रपञ्चः यतो वा इमानि भूतानि जायन्त इत्यद्याश्च श्रुतयस्तद्विजिज्ञासस्व तद् ब्रह्मेति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति तच्च कर्मणि षष्ठीपरिग्रहे सूत्रेणानुगतं भवति तस्माद् ब्रह्मण इति कर्मणि षष्ठी ॥

ज्ञातुमिच्छा जिज्ञासेति । जिज्ञासापदस्यावयवार्थं कथयति इच्छाप्रदर्शनार्थं ततश्चेच्छायाः † फलविषयत्वात्तज्ज्ञानस्यापवर्गपर्यन्तता सूचिता भवति तदाह ‡ अपवर्गपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म फलविषयत्वादिच्छाया इति । अवगतिरिति साक्षादनुभव उच्यते ज्ञानन्तु परोक्षेऽनुभवानारूढेपि § सम्भवति संनिहितेप्यसम्भावितविषयेऽनवसितरूपमित्युक्तं पुरस्तात् तदाह ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म ब्रह्मावगतिर्हि पुरुषार्थः । ब्रह्मरूपतासाक्षात्करणमित्यर्थः । तदेतच्छास्त्रान्तर्भूतं सूत्रम् अनेन च प्रयोज्यसम्बन्धिन्योर्जिज्ञासामुमुक्षाक्रिययोरेकस्याः कारणान्तरसिद्धायाः पूर्ववृत्ततया हेतुत्वमर्थादुपात्तमितरस्यास्तदनन्तरं तत्प्रयुक्तायाः कर्तव्यता श्रुत्याऽभिहिता तत्र जानात्येवासौ मयैतत्कर्तव्यमिति उपायन्तु न वेद ततः तस्योपायः कथनीयः शास्त्रस्य च सम्बन्धाभिधेयप्रयोजनानि वक्तव्यानि । इतरथा प्रेक्षारहितमिव सर्वमापद्येत । अतो ‖ ऽनेनैव सूत्रेणेदमपि सर्वं सूचितमिति कथयितुमाह तस्माद् ब्रह्मजिज्ञासितव्यमिति । अन्तर्णीतविचारार्थविधेयत्वाङ्गीकारेण मीमांसितव्यमित्यर्थः । एतदुक्तं भवति ¶ ब्रह्मज्ञानकामेनेदं

* अस्यैव प्रपञ्च इति ३ पु॰ ।

† फलविषयत्वाज् ज्ञानस्याऽवगतिफलपर्यन्तता सूचितेति ३ पु॰ ।

‡ अवगतिपर्यन्तमिति २, ३ पु॰ एवमेव भाष्येऽप्युपलभ्यते ।

§ भवतीत्येव १ पु॰ । ‖ तत्रानेनैव सूत्रेणेति २, ३ पु॰ । ¶ ब्रह्म ज्ञातुकामेनेति ३ पु॰ ।

शास्त्रं श्रोतव्यम्* यस्माद् ब्रह्मज्ञानमनेन शास्त्रेण निरूप्यते तेन प्रयोज्यस्याभिमतोपायः शास्त्रमित्यर्थाच्छास्त्रस्य सम्बन्धाभिधेयप्रयोजनं कथितं भवति ॥

॥ † इति तृतीयवर्णकं समाप्तम् ॥

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात्। यदि प्रसिद्धम् न जिज्ञासितव्यम्। अथाप्रसिद्धम् नैव शक्यं जिज्ञासितुमिति प्रयोजनविषयसम्बन्धानाक्षिपति। कथम्। प्रसिद्धशब्देन प्रतिपन्नमुच्यते तद्यदि प्रतिपन्नमन्येन केनचित् तदाऽस्य शास्त्रस्य न विषयः। कस्मात् प्रतिपाद्यत्वेन हि विषयता प्रतिपन्ने च तस्मिन् अकिञ्चित्करं शास्त्रमिति नास्य विषयः स्यात्। ततश्चानेनानवगमान्नास्य प्रयोजनं ब्रह्मावगतिः स्यात्। अतः प्रयोजनमप्याक्षिप्तम्। अथाप्रसिद्धं‡ न शक्यं जिज्ञासितुम्। कथम्। यन्न कदाचिदपि बुद्धौ समारूढविशेषम् कथं तत्प्रपाद्येत। अतः प्रतिपादनाशक्तेर्न तत्स्पृशत्यपि शास्त्रम्। प्रसिद्धं पुनर्यदि नामानेन प्रतिपाद्यते प्रसिद्धत्वादेव तथापि न तेनार्थेन निरालम्बनम्। अप्रसिद्धं पुनरालम्बनमपि न स्यात्। अतो न केनचिदर्थेन सम्बद्धं शास्त्रमिति सम्बन्ध आक्षिप्तः।

अस्ति तावद् ब्रह्मेत्यादिना चितयमपि समाधत्ते श्रोतृप्रवृत्त्यर्थम्। ननु प्रेक्षावता अविसंवादकेन प्रणीतं शास्त्रम् नेदृशो निष्प्रयोजनं निर्विषय§मसंबद्धं चारभत इति तद्गौरवादेव प्रवर्त्तन्ते श्रोतारः किमनेन प्रयासेन। सत्यम् भवति सामान्येन प्रयोजनवत्त्वप्रतीतिः प्रणेतृगौरवात् न तु तावन्मात्रेण प्रवृत्तिः। अभिप्रेत‖ प्रयोजनाय हि प्रवर्त्तन्ते न तन्निर्देशादृते शक्यतेऽवगन्तुम्। एवमपि प्रयोजनविशेष एव निर्दिश्यताम्। न च विषयभावमनापन्नमशक्यप्रतिपादनं च प्रयोजनं भवति छिदिक्रियाविषय एव वृक्षश्छिन्नः प्रयोजनमित्युच्यते। दण्डादेरपि मृद्विषयस्य मृदेव घटावस्था प्रयोजनम्। सत्यम् तथापि यथा चिकित्साज्ञाने चरकसुश्रुताचेयप्रभृतीनि बहूनि यथा वा तण्डुलनिष्पत्ति¶ प्रयोजना अवघातनखनिर्भेददलनक्रिया बह्व्यः। तत्र

---

* यद् ब्रह्मेति १ पु०।
† इति पञ्चपाद्यां तृतीयवर्णकं समाप्तमिति ३ पु०।
‡ नैव शक्यमिति २ पु०।
§ असम्बन्धमिति १ पु०।
‖ प्रयोजने इति २ पु०।
¶ प्रयोजनावघातेति १ पु०।

* नावश्यमेकत्रैव प्रवृत्तिः तथेहाप्यन्यस्मादपि कथंचिद्ब्रह्मावगतिसिद्धौ नावश्यमत्रैव प्रवृत्तिः । अतो ऽनन्यसाधारणो विषयो वक्तव्यः यथा ऽर्जुनस्यायं विषय इत्यनन्यसाधारणता प्रतीयते । तेनानन्यसाधारणत्वाय विषयो निर्देश्यः प्रवृत्त्यङ्गत्वेन । सम्बन्धोपि वक्तव्यः प्रवृत्त्यङ्गत्वेनैव । यथा साधुशब्दपरिज्ञानं व्याकरणारम्भात्प्राङ् न केनचित्साध्यते तेन न केनचित् सम्बद्धम् अतस्तदर्थो न क्वचित् प्रवर्त्तते † यथा वोदननिष्पत्तिरेकक्रिया नियतापि न गमनाद्येकक्रियासाध्या तेन न तया सम्बन्धः ततश्च न गमनादिक्रियायामोदनार्थी प्रवर्तते । तेन पुरुषार्थरूपता ऽनन्यसिद्धता तत्प्रतिपाद्यता चेति भिद्यन्ते विषयसम्बन्धप्रयोजनानि तानि च त्रीण्यपि प्रवृत्त्यङ्गम् । नाऽपुरुषार्थे काकदन्तपरीक्षायां ‡ तुषकण्डने वा प्रवर्तते प्रेक्षावान् । नापि पुरुषार्थे चिकित्साज्ञाने सुश्रुतादिसिद्धे चरके नियमेन प्रवर्त्तते । नापि तण्डुलेषु दलनसिद्धेष्ववघाते । नाप्यनन्यसिद्धे ऽपि साधुशब्दपरिज्ञाने पुरुषार्थे अतत्साधने वैद्यकादौ कश्चित्प्रवर्तते गमने वा ऽनोदनसाधने । तत्र विप्रतिपत्त्यैकान्ततःप्रसिद्धतामप्रसिद्धतां च निरस्य शक्यप्रतिपाद्यमानतामनन्यसिद्धतां च दर्शयन् विषयसम्बन्धौ समर्थितवान् निःश्रेयसप्रयोजना प्रस्तूयत इति § च प्रयोजनम् ।

ननु ब्रह्म वेदान्तानां विषयः शास्त्रं च तेषां ब्रह्मप्रतिपादनानुसरणोपायन्यायविषयम् तत्कथं शास्त्रस्य विषयसम्बन्धौ भवतः । प्रयोजनन्तु कदाचित्स्यादपि प्रणाड्या धर्मार्थविषययोरिव शास्त्रयोः कामावाप्तिः । नन्वाग्नेयादीनां स्वर्गफलानां प्रयाजादीतिकर्तव्यतावद्वेदान्तानामप्यर्थमवबोधयता ‖ मितिकर्तव्यतामीमांसा तेनार्थावबोधे वेदान्तानामुपकारकत्वाद्वर्तति शास्त्रमपि तद्विषयम् । नहि शालिबीजस्याङ्कुरं जनयतः सहकारिणो जलादेरङ्कुरो न कार्यम् । तेन यद्यपि वेदान्ता एव ब्रह्मावबोधे कारणं मीमांसा चेतिकर्तव्यताभागं पूरयति तथापि ब्रह्मविषयैव । न हि च्छेतुरुद्यमननिपातनलक्षणो व्यापारः परशुविषयो न वृक्षविषयस्तदर्थत्वात् करणस्य ¶ च द्वारत्वात् । अन्यथा ऽन्यच्च कर्तृव्यापारो ऽन्यच्च फलमिति वैयधिकरण्यं स्यात् ।

---

* नाऽवश्यकमेकत्रेति १ पु० ।
† यथा चौदननिष्पत्तिरिति २ पु० ।
‡ तुषखण्डने–इत्युपकल्पितं २ पु० ।
§ चकारो नास्ति २ पु० ।
‖ इतिकर्तव्यमीमांसेति १, ३ पु० ।
¶ करणस्य तद्द्वारत्वादिति २ पु० ।

उच्यते । विषम उपन्यासः । युक्तं यत्र यदुपकारमन्तरेण फलोत्पत्तिरेव न सिध्यति तस्यापि तद्विषयत्वम् इह पुनर्विनापि मीमांसया सम्बन्धग्रहणात्तदनुस्मरणबुद्धिसन्निधानमात्रोपकृतं वाक्यमर्थमवगमयति नापरमपेक्षते । ननु संशयविपर्यासनिरासद्वारेण निर्णयहेतुत्वान्निर्णयस्य च निर्णयप्रधानत्वाद्भवति निर्णेयं वस्तु निर्णयहेतोर्विषयः । नैतत्सारम् । यत्र ह्यनेकं विज्ञानं वाक्यश्रवणे * सति जायते मीमांसानिरपेक्षमेव । तत्रैकं वाक्यजन्यमेकार्थनियतत्वादेकस्मिन्प्रयोगे वाक्यस्य इतराणि पुनः सामान्यतोदृष्टनिबन्धनानि । तत्र मीमांसया लोकप्रसिद्धशब्दशक्त्यनुसारिणेदं † शब्दजनितं ज्ञानमिति तदालम्बनं वेदार्थ इति ज्ञात्वान्यदुपेक्षते न पुनर्निर्णयज्ञानोत्पत्तौ व्यापारः शास्त्रस्य । यथा चक्षुः कुतश्चिन्निमित्तात्संप्रयुक्ते ऽपि स्थाणुः ‡ पुरुषो वेति संशयात्मकं पुरुष एवेति वा विपर्ययस्वरूपं ज्ञानमुत्पाद्य पुनर्निमित्तान्तरानुगृहीतं सन्निर्णयात्मकं सम्यग्रूपं § ज्ञानमुत्पादयति नैवं शब्दो मीमांसायाः प्राक् संशयितं विपर्यस्तं वा ज्ञानमुत्पाद्य पुनस्तदनुग्रहान्निर्णयात्मकं सम्यग्ज्ञानं वा जनयति किन्तु प्रागेव मीमांसानुग्रहात् स्वसामर्थ्यजन्यं ज्ञानमजीजनदेव । तस्मान्न ब्रह्मविषयं शास्त्रम् ।

अत्रोच्यते । यद्यपि वाक्यार्थज्ञानं शास्त्रानुग्रहा ‖ त्प्रागेवोदेति तथापि ¶ स्वोत्पत्तिसमकालसमुत्थेन सामान्यतोदृष्टनिबन्धनेनार्थान्तरनिवेशिना समकक्षाभिमतेन ज्ञानेन विरोधादुन्मज्जननिमज्जनमिवानुभवदस्यामवस्थायां संशयज्ञानकोटिनिक्षिप्तं सन् मीमांसया शब्दशक्त्यनुसरणे सति प्रतिपक्षतानस्यानुत्पत्तौ निमज्जनाभावान्निश्चलं निर्णयज्ञानमिव जातमिति लक्षणया मीमांसया निर्णयः क्रियत इत्युच्यते न पुनः साक्षान्निर्णयज्ञानहेतुत्वात् । तदेवं लक्षणया वेदान्तानां ब्रह्मविषयाणां सहकारिकारणं मीमांसेति ब्रह्मज्ञानविषयं शास्त्रमभिधीयते । तत्त्रेदं त्रयमप्यवश्यं वक्तव्यम् प्रयोजनं विषयः सम्बन्धश्च शास्त्रादौ श्रोतुः प्रवृत्त्यङ्गत्वेन । यद्यपि प्रणेतृगौरवादेव सप्रयोजनत्वं शास्त्रस्य तथापि न प्रयोजनविशेषसिद्धिस्तत्प्रत्ययमात्रेण निर्देशा-

---

* सति मीमांसानिरपेक्षमेवोत्पद्यते–इति २ पु· ।

† शब्दजनितमिति १ पु· ।

‡ स्थाणौ स्थाणुरिति २ पु· ।

§ अत्र 'वा' शब्दोऽधिकः २ पु· ।

‖ प्रागेवोदपादीति २ पु· ।

¶ तदित्यधिकमत्र २ पु· ।

दृते । तस्मात्तन्निर्देश्यम् । निर्दिष्टे ऽपि तस्मिंस्तस्याशक्यप्रतिपादनतां मन्वानो विहतश्रद्धत्वान्न प्रवर्त्ततेति साध्यो निर्देश्यः । शक्यप्रतिपादनप्रतिपत्तावप्यन्यतःसिद्धेऽर्थे निर्दिष्टः नैव प्रवृत्तिरित्यनन्यसाध्योऽपि निर्देश्यः तदेतत्त्रयमेकत्र समवेतं विभक्तं चोपलभ्यत इत्यलमतिविस्तरेण ॥

अस्ति तावद् ब्रह्मेत्यादिना प्रसिद्धत्वप्रदर्शनेनाप्रसिद्धतां निराकुर्वञ्छक्यप्रतिपाद्यतया सम्बन्धं समर्थितवान् । कथम् । ब्रह्मशब्दस्तावज्जातिजीवकमलासनशब्दराशीनां नान्यतमाभिप्रायेण सूत्रे प्रयुक्तः अनुपपत्तेरित्युक्तम् । अतो नूनमन्यदेव किंचिदभिधेयमभिप्रेत्यायं प्रयुक्त इति गम्यते । तेन स्वर्गापूर्वदेवताद्यर्थवत्पदप्रयोगादेव कश्चिदर्थो ऽस्तीत्यवसीयते । नैतत्सारम् । नहि पदं चक्षुरादिवदप्रतीतपूर्व एवार्थे झटिति विज्ञानं जनयति येनापूर्वमन्यतो ऽसिद्धमर्थं पदप्रयोगादेव प्रतीमः । स्वर्गाद्यर्थो ऽपि नैव पदप्रयोगादेव सिद्धः । अत्रोच्यते । यस्मिन् वाक्ये एकं पदं मुक्त्वेतरेषां पदानामर्थः सिद्धः स किमेकपदार्थानवगमापराधेन त्यज्यताम् उत बहुपदार्थप्रसिद्धिबलेना ऽप्रसिद्धोऽपि कथंचिदवगम्येतेति । तत्र निगमनिरुक्तव्याकरणानामेवंरूपपदार्थानुगमहेतूनां विद्यमानत्वात्तद्बलेनार्थमनुगम्य वाक्यार्थावगतिर्युक्ता न पुनरेकाप्रसिद्ध्या प्रसिद्धपदार्थसंसर्गस्त्यक्तुं युक्तः । न हि प्रसिद्धिरप्रसिद्ध्या त्यज्यते प्रसिद्धिबलेना ऽप्रसिद्धमपि कल्प्यत इतिन्यायात् ।

ननु निगमादिवशेनार्थानुगमे सर्वत्रैव कथंचिदर्थान्वयस्यावगन्तुं शक्यत्वादव्यवस्थितः पदार्थः स्यात् ततश्च वाक्यार्थो नावधार्येत न तर्हि निगमादीनामर्थवत्ता । भवत्यर्थवत्ता यत्र स्वार्थादन्यत्रापि विनियोगात्प्रयोगः तत्र कथमभिदध्यादित्यपेक्षायां तद्गतस्यैवावयवार्थान्वयलेशस्यानुगमात् । एवं तर्हि एकार्थनियमाय प्रयोगपरतन्त्रता मृग्यते तदन्तरेणापि प्रयोगमेकार्थनियम एव कथंचि* न्निगमादि व्याप्रियेतेति न कश्चिद्दोषः । तदत्र ब्रह्मशब्दे व्युत्पाद्यमाने बृंहतेर्धातोर्वृद्धिकर्मणो ऽर्थानुगमात् प्रयोगानुगमेवा ऽसति विशिष्टार्थविषयस्यापेक्षिकमहत्त्वस्यापरिग्रहात्सर्वतोनिरवग्रहमहत्त्वसम्पन्नं वस्तु वाक्यार्थान्वयि ब्रह्मपदादनुगम्यते । ततश्च कालकृतावच्छेदनिमित्तस्याल्पत्वस्या-

---

* निगमादि व्याप्रियते इतीति २ पु० ।

भावात् सदासत्त्वान्नित्यं किंचिद्वस्तु ब्रह्मपदात्प्रतीयते । तथा रूपान्तरसद्भावे तद्रूपविकलत्वात्तदवच्छेदकृतमल्पत्वं स्यात् तच्च ब्रह्मपदादेवा ऽपास्यते। तस्मादेकरसमद्वैतं वस्तु ब्रह्मपदात्प्रतीयते । एतेन देशकृतो ऽपि परिच्छेदो निराकृतो वेदितव्यः । वस्त्वन्तरसद्भावे हि तदपेक्षयैतावति सद्भावो नातः परमस्तीति स्यादेतस्माद्व्यावृत्त इति तदभावे न परिच्छिन्नबुद्धिर्भवति । बुद्धत्वं च बृहत्यर्थान्वयादेव। कथम्। अबोधात्मकं हि वस्तु भोग्यम् । अतो भोक्तारं प्रति शेषत्वान्निकृष्टम् । चेतनः पुनर्न कस्यचिद्गुणभावमेति । तेनोत्कृष्टं सर्वस्मात् बुद्धस्वरूपं किंचिदिति बृहत्यर्थान्वयमेवानुसृत्य गम्यते। मुक्तमिति चाविद्याकामकर्मपरतन्त्रस्तैरितश्चामुतश्च पशुवन्नीयमानो निकृष्टो भवति ब्रह्मशब्दस्तु स्वार्थप्रक्षेपेण वाच्यं किंचिद्गमयन् सदैवाविद्यादिसंसारबीजानाकलिततया तस्योत्कृष्टमहत्त्वमावेदयति । सर्वज्ञं सर्वशक्तिसमन्वितं च तदिति ब्रह्मशब्दादेवावगम्यते । कथम् । यदि किंचिदविदितं तेन कुतश्चिद्वा कार्याद्व्यावर्तते शक्तिः आपेक्षिकस्तदोत्कर्षः स्यात् न तद्युक्तम् अन्यतो ऽसिद्धस्य वस्तुनः पदप्रयोगादेव प्रतिपत्तौ सिद्धे हि वस्तुनि प्रयोगे तस्य यथासिद्धमेव महत्त्वं *निरुच्यते शब्दादेव तदर्थान्वयप्रतीतौ निरङ्कुश एवार्थो ऽभ्युपेतव्यः । एवं च बृंहतेरर्थः परिपूर्णो भवति यदि सर्वमस्य साक्षादेव संविद्गोचरे वशे च वर्तेत तदेतदाह अस्तितावद् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम् ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य † नित्यशुद्धादयोऽर्थाः प्रतीयन्ते बृंहतेर्धातोरर्थानुगमादिति ।

नन्वेवमपि व्युत्पत्त्यनुसरणेन भवत्येवमात्मके वस्तुनि प्रतीतिर्न पुनरेतावता तस्य सिद्धिः पदमात्रस्याप्रमाणत्वात् । सत्यमेवम् अत एव जिज्ञासा धर्मस्येव ‡ लोकाख्यप्रमाणाभाससिद्धस्य इदमपरं ब्रह्मशब्दार्थस्य सिद्धौ कारणमुच्यते साध्यत्वसिद्ध्यर्थम् सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिरिति । तदेव दर्शयति सर्वो ह्यात्मास्तित्वं प्रत्येति न नाहमस्मीति । यदि नात्मास्तित्वप्रसिद्धिः स्यात्सर्वो लोको नाहमस्मीति प्रतीयात् । आत्मा च ब्रह्मेति । कथं पुनरात्मा ब्रह्म । वेदान्तेष्वात्मनि ब्रह्मशब्दप्रयोगादात्मानमेव च

---

* निरुच्येत-इति २ पु॰ । † शुद्धत्वादय इति २ पु॰ ।
‡ लोकादिप्रमाणेति २ पु॰ ।

लोकोऽहमिति व्यपदिशति तदेवमहंप्रत्यय एव ब्रह्मणः * प्रसिद्धत्वान्ना-प्रसिद्धशङ्का । यदि तर्हि लोके ब्रह्मात्मत्वेन प्रसिद्धमस्ति ततो ज्ञातमेवेत्य-जिज्ञास्यत्वं पुनरापन्नमिति विषयमाक्षिपति असिद्धं हि वस्तु साध्यमानं विषयः सिद्धं तु न पुनः साध्यत इति नास्य शास्त्रस्य विषयः । न तद्विशेषं प्रति विप्रतिपत्तेरिति विषयसम्बन्धौ समर्थ्येते । सत्यम् अहमित्यात्मनि प्रत्ययः आत्मा च ब्रह्म किन्तु तस्मिन्नेव विप्रतिपत्तयोऽयमसावयमसाविति । ताश्च वस्तुतो ब्रह्मपदार्थविषया एव तदेकार्थत्वाद् ब्रह्मशब्दस्य । ततः † सामा-न्यतःसिद्धमपि विशेषतो ऽसिद्धेरसिद्धकल्पमेवेति भवत्यस्य विशेषसिद्धिहेतो र्विषयसामान्यतः सिद्धत्वाच्छक्ष्यते विशेषतः प्रतिपादयितुमिति भवति तस्य शास्त्रं साधनमिति सम्बन्धोपि समर्थितः । विप्रतिपत्तिं दर्शयति देहमा-त्रमित्यादि । तद्यथा गोशब्दस्य व्यक्त्याकृतिजातिक्रियागुणसास्नाद्यनेकार्थसं-निधौ प्रयुज्यमानस्य कैश्चिज्जातिरन्यैर्व्यक्तिरित्याद्यभिधेयं प्रतिपन्नम् एवं सचैत-न्य‡कार्यकारणसंघातसन्निधावहंप्रत्ययस्योत्पद्यमानस्य कैश्चित् किंचिदालम्बनं प्रतिपन्नम् तदाह देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लौकाय-तिकाश्च प्रतिपन्ना इति । तथाहि । मनुष्योऽहमित्यात्मनि मनुष्यत्वाभिमानो गच्छामीति च गन्तृत्वाभिमानो देहविषयत्व उपपद्यते । देहमात्रमिति सशिरस्कपिण्डाभिप्रायं द्रष्टव्यम् । मात्रशब्देन न देहातिरिक्तं स्वतन्त्रं चैतन्य-मन्यविशेषणं वा किन्तु देहाकारपरिणतभूतचतुष्टयान्तर्भूतमेवेति दर्शय-ति । आत्मेति अहंप्रत्ययालम्बनमित्यर्थः । प्राकृता इति । शास्त्रोपदेशासंस्कृत-मतयो दृष्टमात्राविकल्पितव्यवहारिण इत्यर्थः । लौकायतिका इति भूत-चतुष्टयतत्त्ववादिनः प्रसिद्धाः । एवमिन्द्रियाण्येव चेतनानि आत्मेत्यपरे । इन्द्रियाणां चक्षुरादिमनःपर्यन्तानामेकैकस्मिन्न § सत्यपि शरीरे रूपादिज्ञा-नानामभावात् तेषामेव व्यस्तानां चेतनत्वमहंप्रत्ययविषयत्वं च मन्यन्ते क्रमेण च वरगोष्ठीवदितरेतरगुणभावं च । तथाचेन्द्रियधर्मसामानाधिकर-ण्यमहंप्रत्ययस्य दृश्यते काणोऽहं मूकोऽहमित्यादि । मन एव चेतनमहंप्रत्य-यस्य विषयमन्ये मन्यन्ते । दृश्यते हि स्वप्न इन्द्रियदशकोपरमे ऽपि मनस एवा-

* सिद्धत्वादिति २ पु० । † सामान्यतःप्रसिद्धमपि इति २ पु० ।
‡ कार्यकरणसंनिधाविति २ पु० । § अति सत्यपीति २ पु० ।

हमिति* सर्वव्यवहारास्पदत्वमिति वदन्तः । विज्ञानमात्रं क्षणिकमित्येक इति । मात्रग्रहणेन नाहमित्यकारादिवर्णत्रयातिरिक्तं किंचिदवभासते यदहंप्रत्ययस्य विषयः कल्प्येत । तेन विज्ञानमेव स्वरसभङ्गुरमविरतोदयमखिललोकयात्रानिलयमनुभवभागनपक्षान्तरमहमित्युत्पद्यत इत्यन्ये मन्यन्ते । शून्यमित्यपर इति । सुषुप्ते विज्ञानलेशस्याप्यभावादकस्मादेवाहमितिसमुदयदर्शनादकारणस्य कादाचित्कस्य परमार्थवस्तुत्वाभावादसदऽवभास एवाहङ्कार इत्यपरे सङ्गिरन्ते । अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपर † इति । अहमुल्लेखशून्यस्य भोक्तृत्वस्यादर्शनात्तस्य च प्रत्यभिज्ञानात् स्थिरत्वसिद्धेः स्थिरस्य चा‡वधिहेत्वनुपलब्धे§र्नित्यत्वम् । निर्विकारस्य च भोगासम्भवाद्विकारस्य च क्रियाफलत्वात् क्रियावेशात्मकत्वाच्च कर्तृत्वस्यैवमात्मकत्वाच्च संसारित्वस्य देहादेश्च बुद्धिपर्यन्तस्य भोक्तृत्वानुपपत्तेस्तद्व्यतिरिक्तः संसारी कर्ता भोक्ताहंप्रत्ययविषय इत्यपरे प्रतिजानते ।

कथं पुनस्तद्व्यतिरिक्तत्वं मन्यन्ते । तस्य भोक्तृत्वानुपपत्तेरित्युक्तम् । कथं तस्य भोक्तृत्वानुपपत्तिरिति । उच्यते ।|| भूतसंघातस्तावच्छरीरम् । तत्र व्यस्तानां समस्तानां वा युगपत्क्रमेण वा भोगः परिकल्प्येत । सर्वथाप्यसम्भवः । यदि तावद्व्यस्तानां युगपत्परिकल्प्येत ततः स्वार्थप्रयुक्तत्वात् प्रवृत्तेरङ्गाङ्गिभावो ¶ नावकल्पेत । न चाङ्गाङ्गिभावमन्तरेण संघात** उपपद्यते । तस्मान्न व्यस्तेषु युगपद्भोगः । अस्तु तर्हि क्रमेण विरोधाद्वरगोष्ठीवदिति । नैतदेवं युक्तम् । तत्र योग्यस्यासाधारणत्वात् असाधारणत्वं च प्रतिपुरुषनियमात् । इह पुनर्विपरीतम् बहूनां सन्निधौ साधारणे च भोग्ये प्रतिनियतभोगव्यवस्था-††हेत्वऽसम्भवात् । अस्तु तर्हि समूहस्य तिलज्वालावच्चेतनासमन्वयोपपत्तेः । मा भूत् प्रत्येकं युगपत्क्रमेण वा । नैतदेवम् । भोगेषु समूहासम्भवात् । कथमसम्भवः । भोक्तुर्भोगं प्रति प्राधान्यात् । ननु भोगेऽपि समूहो दृष्टो यथा स्त्रीपुंसयोः । नैतत्सारम् । संदिग्धत्वात् समूहस्योत तद्व्यतिरिक्तस्येति । तिलज्वालायान्तु विपरीतम् समूहकार्ये समूहिनां गुणभावोपपत्तेः । अस्त्वेकस्य

* मन एवाहमिति सर्वव्यवहारास्पदमिति २ पु० । † इतिशब्दो नास्ति १, २ पु० ।
‡ अवधिहेतुत्वानुपलब्धेरिति तु त्रिष्वपि पुस्तकेषु भवति । § नित्यत्वादिति ३ पु० ।
|| भूतचतुष्टयं तावच्छरीरमिति १ पु०, भूतसंघातः शरीरमिति २ पु० ।
¶ नावकल्प्येतेति १, ३ पु० । ** उत्पद्येतेति १, २ पु० । †† हेतुत्वाऽसंभवादिति १ पु० ।

तर्हि नियतो भोगः । न । तत्रापि कस्यैकस्येत्यनवधारणात् । किमवधारणेन विनापि तेन विवक्षितार्थोपपत्तेः । यद्येवं समेषु केषांचिद् गुणभावानुपपत्ते * र-युक्तः कार्यात्मकेषु । † एवं कारणात्मकेष्वपि समानश्चर्चः भूतस्वाभाव्याविशे-षात् । तथोभयात्मके समूहे । तस्माद्देहादिव्यतिरिक्तमहंप्रत्ययविषयं मन्यन्ते ।

भोक्तैव केवलं न कर्तेत्येक इति । पूर्वोक्तस्यैव देहादिव्यतिरिक्तस्य कर्तृ-त्वमतत्स्वभावं मन्वाना भोक्तैव केवलो ऽहंप्रत्ययविषय इत्येके प्रस्थिताः । करोमि जानामि भुञ्जे चेति न सर्वदाहंप्रत्ययेनानुषङ्गः । तेन नायं तद्विषयः । यदि स्यात् न तदुल्लेखविकल ‡ उदियात् । ननु भोक्तापि तर्हि नासौ । तदुल्ले-खाभावात् । नैतदेवम् । अहमिति चेतनत्वसमुल्लेखात् तदर्थत्वात्सर्वस्य तदात्मकमेव भोक्तृत्वमिति भोक्तैव केवलमिति युक्तं मन्यन्ते ।

अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचिदिति । तस्मा-दपि देहादिव्यतिरिक्तादहंप्रत्ययविषयादन्यः सर्वस्येशिता ततश्चेशितव्यस्य सर्वात्मना वेत्ता नियमनशक्तिसम्पन्नश्च । शरीरिणां मनसा ऽप्यचिन्त्यरूपात्तनु-भुवनविरचनकार्यात्प्रेक्षावत् § कर्तृकत्वमन्तरेणासम्भाव्यमानात् कुलालादिरिव घटादिकार्यात्प्रतिपन्नः सातिशयानां काष्ठाप्राप्तिः ‖ परिणामानामुपलब्धा । साति-शयं च ज्ञानम् अतः क्वचित्काष्ठां प्राप्तं सर्वविषयमिति ¶ सर्ववित्सर्वदासिद्ध ईश्वरः प्रतिपन्नो ब्रह्मशब्दार्थ इति केचित्प्रतिपेदिरे ।

नन्वहमिति सर्वो लोक आत्मानं प्रत्येति आत्मा च ब्रह्म इत्यहंप्रत्य-यविषयस्यात्मनो ब्रह्मत्वेन तद्विप्रतिपत्तौ ब्रह्मविप्रतिपत्तिं दर्शयितुं प्रक्रान्तम् तत्कथ ** मनहंप्रत्ययविषये ऽनात्मनीश्वरे ब्रह्मत्वविप्रतिपत्तिः †† प्रदर्श्यते । उच्यते । ब्रह्मणि विप्रतिपत्तिप्रदर्शनस्य प्रक्रान्तत्वादहंप्रत्ययविषयविप्रतिपत्त्यापि प्रणाड्या ब्रह्मविप्रतिपत्ति ‡‡ रेव निर्दिश्यते । यतो नाऽऽहं विषयविप्रतिप-त्तिप्रदर्शनेन किञ्चित्कृत्यमस्ति । तस्मात्साध्वेतत् ।

---

* रयुक्तमिति ३ पु॰ ।
† एवं कारणात्मकेषु तेष्वपि समानचर्चा भूतभाव्याविशेषादिति १ पु॰ ।
‡ उदीयादिति १ पु॰ । § कर्तृत्वमिति १ पु॰ ।
‖ परिमाणानामिति ३ पु॰ । ¶ वाशब्दोऽत्राधिकः ३ पु॰ ।
** अनहंप्रत्ययविषयविषये-इति ३ पु॰ । †† निर्दिश्यत इति ३ पु॰ ।
‡‡ ब्रह्मविप्रतिपत्तिरित्येवेति २ पु॰ । §§ अहंप्रत्ययविषये विप्रतिपत्तीति २ पु॰ ।

आत्मा स भोक्तुरित्यपर इति । योयमहमित्युल्लिख्यमानश्चेतनो भोक्ता स ब्रह्मेति केश्चित्प्रतिपन्नस्तस्याहंप्रत्ययसिद्धो भोक्तृत्वावभासः स मिथ्यैवानिर्वचनीयानाद्यविद्याविलसितः । परमार्थतस्तु यः सर्वज्ञ ईश्वरो ऽहंप्रत्यये ऽनन्तर्भूतः प्रमाणान्तरानवसितः सोस्यात्मा स्वरूपम् । एवमसौ बृहत्यर्थान्वयाद् * ब्रह्मशब्दाभिधानीयतां लभते । इतरथा तद्रूपविकलस्य न निरङ्कुशं बृहत्त्वमिति न † ब्रह्मशब्दाभिधेयः स्यात् । एवं बहवो विप्रतिपन्नाः युक्तिवाक्यतदाभाससमाश्रयाः सन्त इत्युपसंहरति ।

एवमुक्तेन प्रकारेण केचित् किञ्चिद् ब्रह्मेति प्रतिपन्नाः । किमेवमेव मनोरथमात्रेण नेत्याह युक्तिं प्रमाणानां स्वविषयनिश्चयेनुग्राहिकां तर्कशब्दपर्यायां वाक्यं च प्रतिवेदान्तं यथावद्ब्रह्मस्वरूपप्रतिपादनपरमालोचयन्तः । आत्मा स भोक्तुरिति ‡ युक्तिवाक्याभ्यामन्त्यं पक्षं निश्चितवन्तः सम्यग्दर्शिनः । इतरे तु युक्तय इवावभासन्त इति युक्त्याभासाः न परमार्थतो युक्तयः ताः समाश्रित्य वाक्यानीवावभासन्ते न तानि वाक्यान्यऽतत्परत्वात् तानि वाक्याभासानि परिगृह्य पक्षान्तरेषु विप्रतिपन्नाः । युक्त्याभासत्वं लेशतो दर्शितमेव देहादिव्यतिरिक्तात्मपक्षं दर्शयद्भिः । इतरेषां च युक्त्याभाससिद्धत्वं स्वावसरे दर्शयिष्यामः । दर्शितं च लेशत उत्तरोत्तरपक्षग्रहणकारणप्रदर्शनेन । वाक्याभासतां तु तत्र तत्राधिकरणे सिद्धान्तयिष्यन्तः प्रदर्शयिष्यामः । तत्राऽविचार्य § यत् किञ्चित्प्रतिपद्यमानो निश्श्रेयसात् प्रतिहन्येता ‖ नर्थं चेयादिति । तत्रैवं स्थिते मुमुक्षुर्ब्रह्मज्ञानेन परं निश्श्रेयसमाप्तुकामो ऽविचार्यैतच्छास्त्रमश्रुत्वा प्रवर्तमानो ¶ ऽन्त्यपक्षादर्वाचीनं कञ्चित्पक्षं परिगृह्णीयात् तदा मोक्षस्य सम्यग्ज्ञानफलत्वात्तस्य चातथाभावान्निश्श्रेयसात्प्रतिहन्येत मोक्षफलं न प्राप्नुया**दनर्थं च प्रतिपद्येत । अन्धन्तमः प्रविशन्ति ये केचात्महनो जना इतिश्रुतेः । अनात्मदर्शनेनात्मनो ऽस †† त्कल्पत्वापादनमात्महननम् । एवंरूपस्यात्महननस्य कृतत्वात् अन्यथा ऽऽत्मनो हननासम्भवात् प्राणत्यागस्य प्रकृतानुपयोगादिति ।

* ब्रह्मशब्दाभिधानीयकं लभत इति ३ पु· । † ब्रह्मशब्दाभिधेयत्वं स्यादिति ३ पु· ।
‡ युक्तिवाक्याभ्यामिति नास्ति २ पु· । § यत्किञ्चित्प्रतिपाद्यमाने-इति १ पु· ।
‖ अनर्थं चर्च्छेदिति कुत्रचिद्भवति, अनर्थं वेयादिति २ पु· ।
¶ अत्यन्तपक्षादर्वाचीनं किञ्चित्पक्षमिति १ पु· । ** अनर्थं वा प्रतिपद्येतेति ३ पु· ।
†† कल्पापादनमिति २ पु· ।

तस्माद् ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयत इति । ब्रह्मजिज्ञासोपन्यासव्याजेन जिज्ञासापदेना * न्तर्णीतमीमांसा वेदान्तवाक्यानामारभ्यते । अथवा ब्रह्मज्ञाने कर्तव्यतयोपदिष्टे तज्ज्ञानाय प्रवृत्तेभ्योऽर्थादेव तत्प्रतिपादनं प्रतिज्ञातमिति तदर्थं वेदान्तमीमांसारभ्यते । किंप्रयोजना किमुपकरणा चेति । उच्यते । तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना चेति । तैर्वेदान्तैरविरोधी तर्को युक्तिरुपकरणमितिकर्तव्यता सहकारिकारणमिति यावत् । अथवा । तर्कोऽनुमानं वेदान्तैरविरुद्धम् तदऽर्थप्रतीतेरेव दृढत्वहेतुतयोपकरणमस्या इत्यर्थः ॥

॥ † इति पञ्चपादिकायां चतुर्थं वर्णकम् ॥

॥ इति प्रथमसूत्रं परिसमाप्तम् ॥

———०———

ब्रह्म जिज्ञासितव्यमित्युक्तमिति । ‡ ब्रह्मज्ञानकामेनेदं शास्त्रं श्रोतव्यमित्युक्तमित्यर्थः । यदैवेदमित्युक्तम् तदैव ब्रह्मणो लक्षणं प्रमाणं युक्तिः साधनं प्रयोजनमिति सर्वं व्याख्येयत्वेन प्रतिज्ञातम् । तत्र स्वरूपस्याभ्यर्हितत्वात्तत्प्रथमं निर्देष्टव्यं किंलक्षणं पुनस्तद् ब्रह्मेत्यत आह भगवान् सूत्रकारः जन्माद्यस्य यत इति । युक्तिरपि लक्षणनिर्णये ऽर्थात् सूचितैव । जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिरिति परिच्छेदः पदार्थः पदविग्रह इत्येतत् त्रितयमपि व्याख्यानाङ्गं सम्पादयति । तद्गुणसंविज्ञाने प्रयोजनमाह जन्मस्थितिभङ्गं समासार्थं इति । तृतीयलिङ्गनिर्देशा § त्संहतिप्रधानं समासार्थः । नन्वादिः पूर्वकालकोटिमतो भवति तदभावे प्रपञ्चस्य को नामादिरित्याशङ्क्याह जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं चेति । यदनेन सूत्रेण लक्षितं ब्रह्म तत्स्वरूपकथनपरं वाक्यम् । तत्रादौ जन्म निर्दिष्टमिति तस्यादित्वं वस्तुस्वभावापेक्षमपि न हि वस्तु प्रलीय तिष्ठति स्थित्वा वा जायते नापि जनित्वैव ‖ प्रलीयते क्षणिकत्वनिराकरणात् । अतो जनित्वा स्थित्वा प्रलीयते एवमनादिरयं प्रपञ्चः । अस्येत्यादिभाष्येण पदभागस्ये-

* अन्तर्णीता मीमांसेति ३ पु० ।

† इति पञ्चपादिकायां प्रथमसूत्रं समाप्तमित्येतावदेवास्ति ३ पु० ।

‡ ब्रह्म ज्ञातुकामेनेति ३ पु० । § संहतिप्रधानं धर्मजातं समासार्थ इति ३ पु० ।

‖ नश्यतीति २, ३ पु० ।

दमः प्रातिपदिकमात्रस्यार्थनिर्देशः। तथाहि। सर्वत्र सर्वनाम प्रक्रमादिकारणान्तरबलेन कतिपयाभिधेयपरम् तदभावे स्वमहिम्ना प्रमाणविषयमात्राभिधायकम् तेनाह प्रत्यक्षादिसन्निधापितस्य धर्मिण इदमा निर्देश इति। षष्ठी जन्मादिधर्मसम्बन्धार्थेति सर्व एवेह सम्बन्धः सम्भवति न तद्विशेष आदरणीय इति कथयति। यत इति कारणनिर्देश इति। प्रकृतित्वनिबन्धना * हि पञ्चमी नान्यनिबन्धनेति दर्शयति।

अस्य जगत इत्यादिना भाष्येण लक्ष्यस्य ब्रह्मणः स्वरूपलक्षणं कथयितुमुपचक्रमते। द्विविधं हि लक्षणमुपलक्षणं विशेषलक्षणं च। तत्रेदं लक्षणं प्रपञ्चधर्मत्वात्पृथग्भूतमेव कारणमुपलक्षयति न विशेषणत्वेन अतः पृथक्स्वलक्षणकथनम्। † नामस्वरूपाभ्यां व्याकृतस्येति। कार्यप्रपञ्चं केचित्कथंचित्स्वप्रक्रियानुसारेण विभजन्ति तद्व्युदासाय प्रसिद्धार्थानुवादश्रुतिबलेन द्वैराश्यं कृत्वा ऽऽह नामरूपाभ्यामिति। इत्थंभावे तृतीया। व्याक्रियमाणं हि वस्त्व ‡ भिधेयस्वरूपं स्वनामगर्भं विकल्पपूर्वमेव व्याक्रियत इति स्वसंवेद्यमेतत्। अनेन कर्तृभोक्तृसंयुक्तस्येति। कर्तृत्वभोक्तृत्वमपि नामरूपात्मकत्वात्प्रपञ्चानुयायीति दर्शयति प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्येति प्रतिकर्मफलोपभोगे नियतो देशः स्वर्गफलस्य मेरुपृष्ठं ग्रामादिफलस्य भूमण्डलम्। कालो ऽपि स्वर्गफलस्य देहपातादूर्ध्वं पुत्रफलस्य § बालभावान्निमित्तमपि ‖ उत्तरायणादि ¶ मरणस्य। मनसा ऽप्यचिन्त्यरचनारूपस्येति। न ह्यर्वाग्दर्शी ** क्वचिद्बहिर्लोकसन्निवेशप्रकारमध्यात्मं च प्रतिनियतार्थक्रियासमर्थावयवशिराजालसन्निवेशं निरूपयितुमपि समर्थः किं पुन††र्वि रचयितुम्। जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद् भवति तद् ब्रह्मेति वाक्यशेष इति साकाङ्क्षस्य सूत्रवाक्यस्याकाङ्क्षितपदपूरणमुपलक्षितब्रह्मस्वरूपं लक्षणं च दर्शयति।

नन्वन्ये ऽपि परिणामादयो भावविकाराः सन्ति ते किमिति न संगृह्यन्त इत्याशङ्क्याह अन्येषामपीति। न क्वचिद्वस्तुनो व्यवस्थाविशेषो

---

* हिशब्दो नास्ति १, २ पु॰।
† नामरूपाभ्यामिति ३ पु॰।
‡ अभिधेयरूपमिति ३ पु॰।
§ बालभावादूर्ध्वमिति ३ पु॰।
‖ अपीति २ पु॰ नास्ति।
¶ मरणमित्येव तु त्रिष्वपि पुस्तकेष्वस्ति।
** क्वचिदिति नास्ति ३ पु॰।
†† किं पुनर्विचारयितुमिति १ पु॰।

विनाशरहितो नाप्यनिर्वृत्तजन्मनो ऽस्थितस्वभावस्य विनाशः । अतस्त्रिष्वेवान्तर्भावान्न पृथगुपन्यासस्तेषाम् । ननु * षड् भावविकारा इति नैरुक्ताः तेषां ग्रहणे ऽन्तर्भावोक्तिप्रयासो ऽपि परिहृतः स्यादित्याशङ्क्याह यास्कपरिपठितानां तु जायतेऽस्ती † त्यादि । पृथिव्यप्तेजःसु जगद्रचनारूपस्थितेषु तन्मयानां भावानां सम्भाव्यन्ते ततस्तद्ग्रहणे तेषामेव ब्रह्मत्वेन लक्षितत्वाशङ्का स्यात् न च तद्युक्तम् । अतः सूत्रार्थवत्त्वाय श्रुतिनिर्दिष्टा एवोत्पत्त्यादयो गृह्यन्ते तदर्थनिर्णयार्थत्वात्सूत्राणाम् । अतो यदवष्टम्भो विश्वो विवर्तते प्रपञ्चः तदेव मूलकारणं ब्रह्मेति सूत्रार्थः ।

ननु श्रुतिनिर्दिष्टग्रहणे सूत्रमर्थशून्यं स्यात् । न हीमां पृथिवीं जायमानां पश्यामः नाऽपो न तेजः कथं सिद्धवल्लक्षणत्वेनोपादीयत इति । उच्यते । तेजसस्तावदरणिनिर्मथनादिषु दृश्यते जन्म इन्धनक्षये विनाशः । अपामपि चन्द्रकान्तादिषु जन्म क्रमेण च शोषः । पृथिव्या अप्यवयवसंयोगविभागदर्शनात् तन्निमित्तौ जन्मविनाशावनुमीयेते दृश्येते चाद्याप्यवयवसंयोगविभागकृतौ पृथिव्येकदेशस्य जन्मविनाशौ । वाय्वाकाशकालदिशामपि यावद्विकारं तु विभागो लोकवदिति वक्ष्यमाणेन न्यायेन स्त एव जन्मविनाशौ । न यथोक्तविशेषणस्येत्यादिना भाष्येण युक्तिरपि ब्रह्मस्वरूपनिर्णयायानेनैव सूत्रेण तन्त्रेणावृत्त्या वा जन्माद्यस्य यतः सम्भवति इति सूचितेति दर्शयति । अस्य जगतो नामरूपाभ्यां व्याकृतस्येत्याद्यभिहितविशेषणचतुष्टयस्य यथोक्तविशेषणमीश्वरं मुक्त्वेति सर्वज्ञं सर्वशक्तिं विहाय नान्यतः परपरिकल्पितात्प्रधानादचेतनाच्चेतनादपि परिच्छिन्नज्ञानक्रियाशक्तेः संसारिणो हिरण्यगर्भादुत्पत्त्यादि सम्भावयितुमपि शक्यम् । अचेतनात्तावदचेतनात्वादेवानुपपन्नम् । चेतनादपि परिच्छिन्नज्ञानक्रियाशक्तित्वात् । अभावात्पुनर्नोचेतनत्वादेव केवलादनुपपत्तिरपि तु निरुपाख्यत्वादतीतकल्पसंस्काराभावात् पूर्वकल्पैकरूपो वर्तमानो ऽपि कल्प इति प्रमाणाभावात् सर्व एव व्यवहारो यादृच्छिक इति न क्वचि‡त्कश्चिन्नियमो ऽभविष्यत् । न च स्वभावतः विशिष्टदेशकालनिमित्तोपादानादिति । स्वभावो नामान्यानपेक्षः तेनापेक्षैवानुपपन्ना

---

* षड् भावविकारा नैरुक्ता इति १ पु०, षड्भावविकारास्तैरुक्ता इति तु कश्चित् ।

† इत्यादीनामितीति क्वचित् ।

‡ कश्चिदिति नास्ति १ पु० ।

कुतो नियमसम्भवः । अतो युक्त्या ऽपि वस्त्वन्तरस्य कारणत्वसम्भावना-निराकरणेन पारिशेष्यात्पूर्वोक्तविशेषण ईश्वर एव कारणमिति सिद्धम् ।

एतदेवानुमानमिति । येयं युक्तिरभिहिता यथोक्तविशेषणमीश्वरं मुक्त्वा नान्यतो जगतो जन्मादि सम्भवतीति एतदेव स्वतन्त्रमनुमानमीश्वर-सिद्धौ सर्वज्ञत्वसर्वशक्तित्वसिद्धौ च तस्य प्रमाणं किं वेदवाक्यैरितीश्वरकार-णिनः कणादप्रभृतयो मन्यन्ते जन्मादिसूत्रलक्षितान्यपि वाक्यानि यतो वा इमानि भूतानि जायन्त इत्यादीनि परार्थानुमानवाक्यसमानि दृश्यन्त इति वदन्तः । नन्विहापि तदेवोपन्यस्तमिति । यथा धूमविशेषस्यागुरुसम्भवत्वं तथा प्रपञ्चसन्निवेशविशेषस्य सर्वज्ञत्वादिगुणकारणत्वमिति । न वेदान्तवा-क्यार्थग्रथनार्थत्वात् सूत्राणामिति । सत्यम् तदेवोपन्यस्तमुपकरणत्वेन न तत्र तात्पर्यं तात्पर्यन्तु वेद*वाक्यग्रथने तदेव प्रपञ्चयति वेदान्तवाक्यानीति । समन्वयसूत्रप्रमुखोपात्तैः शब्दशक्त्यनुसारिभि†र्न्यायैर्वाक्यानां ब्रह्मणि तात्प-र्याध्यवसाननिवृत्ता ब्रह्मावगतिर्नानुमानादिप्रमाणान्तरनिर्वृत्ता । सत्सु तु वेदा-न्तवाक्येषु तदविरोध्यनुमानमपि भवन्न निवार्यते श्रुत्यैव सहायत्वेन तर्कस्या-‡प्यभ्युपेयत्वात् । तथाहि । श्रोतव्यो मन्तव्य इति श्रुत्या यथा श्रवणं ब्रह्माव-गतिहेतुरनूद्यते तथा मननस्यापि सिद्धवदनूद्यमानत्वात् । तथा ऽपरा श्रुतिः पण्डितो मेधावीत्यादिराचार्यवान् पुरुषो वेदेति पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति यदाचार्येण श्रुत्यनुसारिणा स्फटिकादिनिदर्शनेन शिष्येभ्यः प्रत्ययदा-र्ढ्योपादनं तदा ऽऽचार्यवान् पुरुषो वेदेत्यनूद्यते । न धर्मजिज्ञासायामिवेत्या-दिना । युक्तिसाहाय्यापेक्षणे कारणमाह श्रुत्यादय इति । श्रुतिः पदान्तर-निरपेक्षः शब्दः । आदिशब्देन लिङ्गवाक्यादयः शब्दप्रकारा गृह्यन्ते ।

न त एव ब्रह्मणि प्रमाणं किन्त्वनुभवादयो ऽपि । तत्र हेतुमाह अनु-भवावसानत्वाद् § भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्येति । सिद्धे वस्तुनि सम्भ-वत्यनुभवस्तदवसाना आकाङ्क्षानिवृत्तिर्यतः । ननु धर्मजिज्ञासायां विना ऽप्य-नुभवेन शब्दशक्त्यनुसरणमात्रेणैव निराकाङ्क्षं फलपर्यन्तं ज्ञानं भवति न तर्क-गन्धमप्यपेक्षते तथेहापि स्यात् प्रमाणत्वाविशेषाद्वेदान्तवाक्यानामित्याशङ्क्य

---

* वेदान्तवाक्येति २ पु० ।

† न्यायैरिति नास्ति १ पु० ।

‡ अपिकारश्छिन्नः ३ पु० ।

§ स्वरूपवस्त्विति ३ पु० ।

विशेषमाह कर्तव्ये हि विषय इत्यादिना । ब्रह्मज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वादित्यन्तेन भाष्येण । कथम् । कर्तव्यं हि कर्तव्यत्वादेवासिद्धस्वभावं नानुभवितुं * शक्यमिति न तदाकाङ्क्षा । इह तु सिद्धस्य साक्षाद्रूपेण विपर्यासगृहीतस्य † सम्यग्ज्ञानेन साक्षात्करणमन्तरेण न मिथ्याज्ञानोदयनिवृत्तिः । द्विचन्द्रादिषु तथादर्शनात् । नहि कर्तव्यसिद्धार्थनिष्ठयोः प्रमाणत्वसाम्यादवबोधनप्रकारेऽपि साम्यम् । यदि स्यात् ‡ पुरुषेच्छावशनिष्पाद्यत्वमपि स्यात् । ततो विधिप्रतिषेधविकल्पसमुच्चयोत्सर्गापवादबाधाभ्युच्चयव्यवस्थितविकल्पादयो ऽपि प्रसज्येरन् । न च वस्तुनि युक्तमेतत् निःस्वभावत्वप्रसङ्गात् । तथा चैकस्मिन् वस्तुनि स्थाणुः पुरुषो वेति विकल्पो न § वैकल्पिकद्रव्यत्यागज्ञानवत्सम्यग्ज्ञानं भवति स्थाणुरेवेति निश्चितैकार्थतापरमार्थं यतो वस्तुस्वभावपरतन्त्रं सिद्धवस्तुज्ञानं न ज्ञानपरतन्त्रं वस्तु यदि स्यात् शुक्तिरजतमपि तथा स्यात्कर्तव्यज्ञानं पुनर्वैपरीत्ये ऽपि सम्यगेव योषा वाव गौतम अग्निरित्यादिषु दर्शनात् । तच्चैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव भूतवस्तुविषयत्वात् । अतो युक्तो युक्ते ‖ रनुप्रवेशः अनुभवापेक्षा च नेतरच्च ।

¶ अपरः परिचोदयति ननु भूतवस्तुविषयत्व इत्यादिना । अयमभिप्रायः । भूतत्वाद्युक्तेरपि चेदनुप्रवेशस्तथा सति किं वेदवाक्यैर्विचारितैः यथाहुरीश्वरकारणिनस्तथा भवतु पूर्वसूत्रेण प्रतिज्ञानिर्देशो ऽनेन च ** हेत्वभिधानमित्युत्तरमाह नेन्द्रियादिविषयत्वे सम्बन्धाग्रहणादित्यादिना । इन्द्रियाणि प्रपञ्चमात्रं गृह्णन्ति न तत्कारणम् । यदि तद्ग्रहणमपि स्यान्नानुमानोपन्यासेन कृत्यमस्ति । सामान्यतोदृष्टमपि न प्रमाणमतीन्द्रिये ब्रह्मण्यत उपसंहरति तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थं †† किं तर्हि वेदवाक्यप्रदर्शनार्थमिति युक्तिमपि तदुपकरणान्तदर्थानुभवप्रयोजनां ‡‡ सूचयतीत्युक्तम् ।

---

* शक्यत इति ३ पु॰ ।
† अग्रिमो नञत्रास्ति ३ पु॰ ।
‡ पुरुषस्येच्छावशाच्चिरिति ३ पु॰ ।
§ वैकल्पिकद्रव्यजन्ययागज्ञानवदिति २ पु॰, वैकल्पिक द्रव्ययागज्ञानवदिति ३ पु॰ ।
‖ अपिशब्दोऽत्राधिकः ३ पु॰ ।
¶ पर इति १ पु॰ ।
** हेतुत्वाभिधानमिति ३ पु॰ ।
†† किंत्विति ३ पु॰ पाठो भाष्यशैलीविरुद्धः ।
‡‡ सूत्रयतीति ३ पु॰ ।

नन्वेवं सति कथं युक्तिरब्रह्मविषया * सती तद्विषयाणां वाक्यानामुपकरणं भवति। उच्यते। ब्रह्मपरेषु वाक्येषु मृदादिदृष्टान्तैर्युक्तय उपन्यस्यन्ते ताश्च विधिप्रतिषेधवाक्ययोः प्रवर्तकत्वनिवर्तकत्वाकाङ्क्षितस्तुतिनिन्दार्थवादवत् स्वरूप † वाक्यस्य फलपर्यन्तापेक्षितसम्भावनार्थवादतां प्रतिपद्यमानास्तत्र ‡ श्रुतिसाहाय्ये वर्तन्त इत्युच्यते। किं पुनस्त § द्वेदवाक्यं सूत्रेणेह लिलक्षयिषितमिति। ‖ सर्वस्मिन्नेव वेदान्तवाक्ये ब्रह्मपदस्याप्रसिद्धत्वान्न स्वार्थं विशेष्यत्वेन विशेषणत्वेन वा वाक्यार्थे समर्पयितुमलमित्याक्षिपति येषां वेदान्तवाक्यानां येन संनिवेशक्रमेण ब्रह्मप्रतिपादने समन्वयः स्वाध्यायपाठे स्थितस्तल्लक्षणार्थं सूत्रद्वयमिति तत्रैवोदाहरणमाह भृगुर्वै वारुणिरिति। अथशब्दोपात्तन्यायेन प्रथमसूत्रस्योदाहरणं यतो वा इमानि भूतानीति जन्मादिसूत्रस्य कथम्। पूर्वोक्तेन न्यायेन पृथिव्यादीनां जन्मादिदर्शनात्तत्कारण एकत्वनानात्वयोरन्यतरावगमे प्रमाणाभावाद् बुद्धिमत्कारणपूर्वे ¶ तामात्रे प्रतिपन्ने यतो वा इमानीति कारणस्यैकवचननिर्देशात्तदर्थमात्रस्यैव विधित्सितत्वादर्थात्सर्वज्ञं सर्वशक्ति जगत्कारणमिति कारणविशेषो वाक्यादवगम्यते। पुनस्तद्विजिज्ञासस्वेत्यनूद्य तद् ब्रह्मेति तत्र ब्रह्मशब्दप्रयोगाद् ** बृंहत्यर्थान्वयेन सर्वतोऽनवच्छिन्नस्वभावं जगत्कारणं ब्रह्मपदस्यार्थ इति गम्यते। †† तस्य च निर्णये वाक्यमप्यानन्दाद्ध्येव खल्विति प्रसिद्धावद्योतकेन हिशब्देन संयुक्तमानन्दावद्योतकमुपपद्यते। अनानन्दात्मके हि जगत्कारणे ब्रह्मशब्द ‡‡ प्रयोगो न युज्यते। न हि तस्योपेक्षणीये विषये स्वार्थप्रक्षेपेण वृत्तिः समञ्जसा। तस्माद् ब्रह्मपरे वाक्ये जन्मादिधर्मजातस्योपलक्षणत्वाद् ब्रह्मसंस्पर्शाभावात्सर्वज्ञं सर्वशक्ति §§ समन्वितं परमानन्दं ब्रह्मेति जन्मादिसूत्रेण ब्रह्मस्वरूपं लक्षितमिति सिद्धम्॥

॥ ‖‖ इति पञ्चपादिकायां पञ्चमं वर्णकम्

द्वितीयसूत्रञ्च समाप्तम्॥

---

* सतीति नास्ति ३ पु०। † वाक्यस्यापि फलपर्यन्ततोऽपेक्षितेति ३ पु०।
‡ श्रुतीति नास्ति ३ पु०। § वेदान्तवाक्यमिति २ पु०।
‖ भाष्यमिति अत्राधिकं ३ पु०। ¶ तत्तत्र नास्ति ३ पु०। ** बृहत्यर्थेति १, ३ पु०।
†† ततोऽस्य निर्णयवाक्यमानन्दाद्धि खल्विति सिद्धावेति ३ पु०।
‡‡ प्रयोगस्तत्र न युज्यत इति ३ पु०। §§ समन्वितमिति नास्ति ३ पु०।
‖‖ इति पञ्चपादिकायां पञ्चमं समाप्तम्० इति द्वितीयं सूत्रमिति ३ पु०।

शास्त्रयोनित्वात् । अयमपरः प्रपञ्चकारणस्य ब्रह्मणः सर्वज्ञत्वे हेतुः । अनेकनानाविधविषयविद्यास्थानोपबृंहितस्य वेदाख्यस्यापि शास्त्रस्य प्रपञ्चान्तःपातित्वात्तत एव जन्म । न च तेनाविषयीकृतस्य सद्भावे प्रमाणमस्ति । अतः सर्वविषयत्वात्सर्वज्ञं तत् । कल्पम् प्रत्ययप्रयोगो भाष्ये बोद्धृत्वाभावादीषदऽपरिसमाप्त्या । ततश्च कारणं तद्विषयादप्यधिकतरग्रहणसमर्थं गम्यते । दृश्यते ह्यद्यापि शास्त्रकाराणां तथाभावः ।

नन्वेवं सति बुद्धिपूर्वत्वात्सापेक्षं स्यात् । न स्यात् ब्रह्मवदऽनादित्वात् । कूटस्थनित्यत्वाच्च कथं पुनस्ततो जन्म । तत्परतन्त्रत्वाद्रज्जुसर्पवत् । तथा च श्रुतिः निश्वसितमेतदिति । यथा ऽपेक्षारहितैव लोके * निश्वासप्रवृत्तिस्तथाऽस्यापीति न सापेक्षता दोषः ।

नन्वेवं सति कथं सर्वज्ञता । तस्यैव ज्ञानशक्तिविवर्त्तात्मकत्वात् । नाम † विकल्पप्रपञ्चस्य रूपप्रपञ्चस्यापि तदाश्रित्य विवर्त्तनात्तज्जन्मता नासतः प्रादुर्भावात् ॥

॥ ‡ इति पञ्चपादिकायां षष्ठं वर्णकम् ॥

———o———

अथवा यथोक्तमृग्वेदादीत्यादिना सूत्रस्य प्रमाणप्रतिज्ञामर्थान्तरमाह अपेक्षितत्वात् । कथं पुनरेकस्य सूत्रस्यार्थद्वयम् । सूत्रत्वादेव । तथा च पौराणिकाः अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुरिति । विश्वतोमुखमिति नानार्थतामाह । अतोऽलङ्कार एव सूत्राणां यदनेकार्थता नाम ।

ननु पूर्वसूत्रे शास्त्रमुदाहरता ब्रह्मावगमे शास्त्रं प्रमाणं प्रतिज्ञातमेव । सत्यमेतत्सूत्रबलेन तदादुहृतम् । अन्यथा § सूत्रे शास्त्रोपादानाभावादनुमानाशङ्कायां यतः सर्वज्ञात्सर्वशक्तेः कारणा ‖ ज्जगतो जन्मादि भवति तद् ब्रह्मेति वाक्यशेष इत्यस्यो ¶ पस्कारस्याप्रमाणत्वप्रसङ्गः । प्रतिप्रपञ्चं पृथक्कारणजन्यतायाः अपि सम्भवात्सर्वज्ञत्व ** सर्वशक्तित्वासिद्धेर्लोके च

---

* निश्वासस्य प्रवृत्तिरिति ३ पु० ।
† विकल्पेति नास्ति ३ पु० ।
‡ इति षष्ठवर्णकमिति १, २ पु० ।
§ पूर्वसूत्रे इति २ पु० ।
‖ जगतो नास्ति ३ पु० ।
¶ उपकारेति ३ पु० ।
** सर्वेति पुनर्नास्ति ३ पु० ।

जगत्कारणे ब्रह्मशब्दप्रयोगादर्शनात् । अतो जन्माद्यस्य यतः शास्त्रप्रमाणकमित्येतावदिदं सूत्रं सदऽसंदिग्धमनुमानशङ्कानिवृत्तेः पृथक्करणं * प्रपञ्चान्तःपातिनः शास्त्रस्यापि हेतुत्वेन सर्वज्ञत्वं सुसम्पादमिति व्याख्यानान्तरेण † कथयितुम् ॥

॥ इति पञ्चपादिकायां सप्तमं वर्णकम्
तृतीयसूत्रञ्च परिसमाप्तम् ॥

———o———

कथं पुनर्ब्रह्मणः शास्त्र ‡ प्रमाणकत्वमुच्यते यावता ऽऽम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति क्रियापरत्वं शास्त्रस्य प्रदर्शितम् । अतो वेदान्तानामानर्थक्यमक्रियार्थत्वात् । यद्यपि प्रदर्शितानि वाक्यानि सर्वज्ञत्वादिगुणकं ब्रह्म जगत्कारणं प्रतिपादयन्ति तथापि तत्र परिनिष्ठिते वस्तुनि प्रत्यक्षादीनामपि प्रवृत्तिसम्भवात्तैरऽसंवादे न प्रामाण्यं प्रतिलभन्ते ।

नन्वपौरुषेयत्वात्तज्जन्यं स्वार्थपरिच्छेदे ऽनपेक्षं कथमप्रमाणम् । सत्यम् । तथापि यथा चाक्षुषं § स्पर्शनगोचरचित्रनिम्नोन्नतज्ञानं तेनासंवादादप्रमाणम् तथेहापि स्यात् । किंच । पुरुषार्थशून्यत्वादप्यप्रामाण्यम् । पुरुषार्थौ हि नाम सुखावाप्तिर्दुःखपरिहारश्च । तौ सिद्धत्वाद्धानोपादानविषयौ न सिद्धवस्तुन्य ऽक्रियाशेषे सम्भवतः । ततो न क्वचिद्वेदवाक्यानां विधिस्पर्शमन्तरेणार्थवत्ता दृष्टोपपन्ना वा । किंच । प्रत्यक्षाद्यविषये न शब्दमात्रस्य प्रामाण्यम् शास्त्रस्यैष स्वभावो यदनवगतार्थबोधकत्वम् । शब्दमात्रस्य पुनः प्रमाणान्तरगृहीतार्थप्रकाशन एव सामर्थ्यं दृष्टम् नानवगतार्थप्रकाशने । तस्मादनर्थका वेदान्ता न तेषां ब्रह्मणि प्रामाण्यम् । इत्येत एव वेदोषरा वेदान्ता इति केषांचिदुद्गारः । यत्पुनर्भाष्यकारेण कर्तृ ‖ देवता ¶ स्वरूपप्रकाशनेन क्रियाविधिशेषत्वं वेदान्तानां प्रकरणान्तरभयादनभ्युपगम्य स्ववाक्यगतोपासनाकर्मपरत्वमुक्तम् । तदयुक्तम् । उपासनावि ** धिशेषत्वेऽपि संवादाभावाज्जगत्कारणे न सर्वज्ञत्वादिसिद्धिः । †† सत्यम् अनुमानतो ऽनिर्दिष्टविशेषे

* तुशब्दोऽत्राधिकः ३ पु॰ ।
† कथयितुमितीति ३ पु॰ ।
‡ प्रमाणत्वमिति ३ पु॰ ।
§ स्पर्शगोचरेति ३ पु॰ ।
‖ देवतेति २, ३ पु॰ नास्ति ।
¶ स्वरूपादीति ३ पु॰ ।
** विधीति २, ३ नास्ति ।
†† यतःशब्दोऽत्राधिकः १ पु॰ ।

तस्मिन्नवगते समारोपितैर्धर्मैरुपासनानियोगः सेत्स्यति । एवं चाध्ययनविधिग्राहितानां वेदान्तानामेकान्ततो नानर्थक्यं * भविष्यतीत्यभिप्रायः ।

तत्तु समन्वयात् । तद् ब्रह्म सर्वज्ञत्वादिगुणकं वेदान्तशास्त्रात्प्रतीयत इति प्रतिजानीते हेतुं चाचष्टे समन्वयादिति । तत्र तात्पर्येण वेदान्तवाक्यानां समन्वयादित्यर्थः । सम्यगन्वयः समन्वयः । अथ केयं सम्यक्ता ऽन्वयस्य । पदानां परस्परानवच्छिन्नार्थानामनन्याकाङ्क्षाणामव्यतिरिक्तैकरसप्रातिपदिकार्थमात्रान्वयः । सोयमित्यादिवाक्यस्यपदानामिव प्रकृष्टप्रकाशशब्दयोरिव चन्द्रपदाभिधेयार्†थैकथनेन । तथाच व्यक्तिविशेषः कश्चिच्चन्द्रप्रातिपदिकाभिधेयः केनचित् पृष्टो ऽस्मिञ् ज्योतिर्मण्डले कश्चन्द्रो नामेति तस्य प्रतिवचनम् प्रकृष्टप्रकाशश्चन्द्र इति । ‡ तदेवं प्रतिवचनं भवति यदि यथा चन्द्रपदेनोक्तम् तथा ऽऽभ्यामपि पदाभ्यामुच्येत । एवं च सति नीलोत्पलवदऽयुतसिद्धपरस्परावच्छिन्नविशेषणविशेष्यभावेनाप्यन्वयो दुर्लभः कुतः पृथक्सिद्धः क्रियाकारकलक्षणः सम्बन्धः । तथाविधान्युदाहरति सदेव § सोम्येदमग्र इत्यादीनि ॥

ननु जन्मादिसूत्रोदाहरणेष्वेव प्रामाण्यं दर्शनीयम् किमुदाहरणान्तरेण । बाढम् अस्त्यत्राभिप्रायो भाष्यकारस्य । तत्र ब्रह्मणो लक्षणं वक्तव्यमिति तटस्थस्यैव ब्रह्मणो निरूपकाणि वाक्यान्युदाहृतानि । इह तु तत्त्वमसीति जीवस्य ब्रह्मात्मतावगतिपर्यन्तानि वेदान्तवाक्यानि न तटस्थमेव जगत्कारणं प्रतिपाद्य पर्यवस्यन्तीत्यतस्तथाभूतान्येव वाक्यान्युदाहृतानि सदेव सोम्येदमग्र आसीदित्येवमादीनि । यत्पुनः सिद्धे वस्तुनि प्रत्यक्षादिसम्भवात्तदभावे मिथ्यात्वाशङ्कायामप्रामाण्यमिति । तद्रूपाद्यभावान्नेन्द्रियगोचर इति प्रत्युक्तम् । ननु इन्द्रियागोचरत्वादेव प्रत्यक्षाद्यविषयत्वान्न शब्दमात्रस्य तत्र प्रामाण्यमित्युक्तम् । उच्यते । यद्यपि शब्दमात्रस्य प्रत्यक्षादिविषय एव प्रयोगो दृष्टः । व्युत्पत्ता तु कथं व्युत्पद्यते इति वाच्यम् । श्रोतृव्यवहारो हि मूलं बालानां व्युत्पत्तेः । स च श्रोतुर्ज्ञानान्तरानिमित्ततापरिशुद्धः शब्दसामर्थ्याव-

---

* भविष्यति फलं च तत्र रात्रिसत्रवाक्यानामिवार्थवादसमर्पितं भविष्यतीत्यभिप्राय इति ३ पु॰ ।

† र्थैकथने तथेति ३ पु॰ । ‡ तदेवं हीति ३ पु॰ । § सोम्येदमित्यादीनीति ३ पु॰ ।

गमहेतुः । अतो न प्रतिपत्तुर्ज्ञानान्तरा * सिद्धार्थावबोधकत्वं सामर्थ्यावगमकाले ऽवगतम् । तेनानवगम्यैव तद्विषयं ज्ञानं सामर्थ्यावगमः यथावगमं च विज्ञानोत्पत्तिः । यदा पुनर्व्युत्पन्नः स स्वयं † प्रयुयुक्षते ‡ परप्रतिपत्तये तदा ज्ञानान्तरसन्निधापितं स्वसाक्षिकं विवक्षन् सामर्थ्यावगमकाले ऽपि तयोः सत्तां प्रतिपद्यते केवलं न ज्ञानोत्पत्तौ तयो§रुपयोगम् । तस्मान्न शब्दस्य प्रमाणान्तरगृहीतार्थप्रकाशने सामर्थ्यं व्युत्पत्ति ‖ काले ऽवगतम् किन्तु चक्षुरादिवदन्य ¶ निरपेक्षो यथावगत**सामर्थ्यंच शब्दो विज्ञानं जनयति । तस्मान्न प्रमेयस्य प्रत्यक्षादिविषयत्वं शब्दस्य विज्ञानजनन उपयुज्यते । अपि च । अपौरुषेये शब्दे चक्षुषीव †† विज्ञानोत्पत्तावनपेक्षे कथमप्रामाण्यमाशङ्क्येत ।

ननूक्तमाशङ्काकारणं ‡‡ स्पर्शनगोचरचित्रनिम्नोन्नतविषयस्य चाक्षुषस्य प्रत्ययस्य तत्संवादाभावा §§ दप्रमाणत्वम् । न तत्साधूक्तम् । अदुष्टकरणत्वादस्य तस्य च तदभावात् । तथाहि । शब्दस्तावदपौरुषयत्वाददुष्टः । प्रमेयस्य ‖‖ पुनर्ज्ञानहेतुत्वे न प्रमाणमस्ति शब्दस्यैव तदेकनिष्ठत्वेन तन्नियमात् । चित्रस्य तु चाक्षुषज्ञाने सामग्र्यन्तःपातिनः श्यामादिरेखासन्निवेशविशेषो दोषः । तदभावे तिमिराभाव इव सम्यग्दर्शनोत्पत्तेः । अतः प्रवर्तमानमपि प्रमाणं संवादकमेवेति नाप्रामाण्यमावहति । न च संवादलक्षणं प्रामाण्यम् अपि तु बोधलक्षणमिति प्रमाणविदां स्थितिः । अतो यथैव विधिवाक्यानां स्वार्थमात्रे प्रामाण्यम् एवं स्वरूपवाक्यानामपि । अनवगतार्थपरिच्छेद ¶¶ सामान्यात् ।

ननु विधिवाक्यानामेव प्रामाण्यं युक्तम् । क्रियार्थत्वादाम्नायस्य । न इतरेतराश्रयत्वात् । विधिवाक्यानामेव हि प्रामाण्ये सिद्धे क्रियार्थत्वमाम्नायस्य सिध्येत् क्रियार्थत्वे च सिद्धे तेषामेव प्रामाण्यमितीतरेतरा**श्रयत्वं स्यात् न ह्येकमप्यन्यतः सिद्धम् । अतो यदवगमयत्याम्नायस्तदर्थः सः । तस्माद्यथाकार्यमवगमयंस्तदर्थः एवमैकात्म्यमप्यवगमयंस्तदर्थो भवितुमर्हति । प्रतीतिकृ-

---

* सिद्धावबोधेति २ पु० । † परस्मैपदं ३ पु० । ‡ परस्य प्रतीति ३ पु० ।
§ उपयोगः-इति ३ पु० । ‖ कालावगतामिति ३ पु० । ¶ निरपेक्षमिति २, ३ पु० ।
** सामर्थ्यश्चेति २ पु० । †† विज्ञानहेताविति २, ३ पु० । ‡‡ स्पर्शगोचरेति ३ पु० ।
§§ अप्रामाण्यमिति ३ पु० । ‖‖ अयिमो नअत्रास्ति ३ पु० ।
¶¶ साम्यादिति २ पु० । ** आश्रयः स्यादिति ३ पु० ।

तत्वात्प्रामाण्यस्य । प्रतीतिस्तु कार्यैकात्म्ययोस्तुल्या । प्रत्यक्षादिष्वऽप्येतदेव प्रमाणवृत्तम् यदनवगतमवगम्यते ।

आह । युक्तं प्रत्यक्षादीनां तावत् प्रामाण्यमपेक्षान्तराभावात् । आम्नायस्य त्वध्ययनविधिनोपादापितस्य न *पुनः पुरुषार्थमप्राप्य पर्यवसानं लभ्यते विधानानर्थक्यप्रसङ्गात् । † तस्मादैकात्म्यवाक्यानां स्वार्थमात्रनिष्ठता न युक्ता । उच्यते । पुरुषो ह्येतावदपेक्षते इष्टं मे स्यादनिष्टं मे मा भूदिति न त्वित्थमन्यथा वेति । न चास्य स्वयमीष्टे । द्विविधं चेष्टं प्रेप्सति । किंचित्प्राप्यं यथा ग्रामादि । किञ्चित्प्राप्तमपि ‡ भ्रान्त्या यथा हस्तगतमेव विस्मृतसुवर्णादि । अनिष्टमपि द्विविधं परिजिहीर्षति किञ्चित्परिहार्यं यथा गर्तादि । किञ्चित्परिहृतमपि भ्रान्त्या यथा रज्ज्वादि सर्पादिबुद्धिगृहीतम् । तत्र प्राप्यपरिहार्ययोः साधनज्ञानायत्तत्वात्पुरुषार्थस्य विधिप्रतिषेधावर्थवन्तौ । इतरयो §-स्तावद् भ्रान्तिमात्रव्यवहितत्वान्न तदपनयादन्यत् पुरुषार्थत्वेनापेक्षते । ‖ तदपनयश्च तत्त्वज्ञानाद्भवति नान्यथा । एवमपि लभ्यमानं पुरुषार्थमनुमन्यत एव पुरुषः सुतरां चाभिनन्दति । साधनायत्तो ह्यायासाल्लभ्येत ज्ञानायत्ते त्वायासोपि परिह्रियते । तेनानेकानर्थकलुषितमिवात्मानं मन्यमानस्य भ्रान्तस्य सर्वानर्थशून्यात्मतत्त्वप्रतिपादनादेव पुरुषार्थसिद्धेरैकात्म्यवाक्यानां स्वार्थमात्रनिष्ठत्वे ऽपि न विध्यानर्थक्यप्रसङ्गः । तस्मात्सिद्धं ब्रह्मणः शास्त्र ¶ प्रमाणत्वम् ।

॥ ** इति पञ्चपादिकायामष्टमं वर्णकम् ॥

अत्रापरे प्रत्यवतिष्ठन्ते । यद्यपि शास्त्रेण प्रमीयते ब्रह्म । तथाऽपि विधिसंस्पर्शिना न तद्रहितेन । कस्मादेवम् । अन्यथा शब्दप्रयोगानुपपत्तेः । पुरुषेच्छासमुत्थापितो हि शब्दप्रयोगः । सा चेष्टानिष्टप्राप्तिपरिहारविषया । न च पारम्पर्येणापि सुखदुःखे विहायेष्टानिष्टे सम्भवतः । न च विस्मृतसुवर्णारोपितसर्परशनाप्रतिपत्ताविव तदनन्तरं शास्त्रादपि ब्रह्मात्मप्रतिपत्तौ सुखावाप्तिर्दुःखपरिहारश्च दृश्यते । पूर्ववदेव संसारित्वोपलब्धेः । प्रतीत्यु-

---

* पुनरिति नास्ति ३ पु॰ ।
† तत्तदैकात्म्येति प्रायः पाठः ।
‡ यथा भ्रान्त्येति ३ पु॰ ।
§ इतरयोस्तु भ्रान्तीति २, ३ पु॰
‖ तदपनयनमिति ३ पु॰ ।
¶ प्रमाणकत्वमिति ३ पु॰ ।
** इति श्रीपद्मपादाचार्यविरचितायां पञ्चपादिकायामष्टमं वर्णकमिति ३ पु॰ ।

त्तरकालं च ध्यानोपदेशात् । तस्मात्सन्तु नाम लोके विधिरहितान्यपि पुरुषार्थपर्यन्तानि वाक्यानि । वेदे तु न तद्रहितानां तत्पर्यन्तता । तस्माद्यद्यपि जिज्ञास्यवैलक्षण्यं धर्मब्रह्मजिज्ञासयोः सिद्धसाध्यविषयत्वेन । तथापि सो ऽन्वेष्टव्यः स विजिज्ञासितव्य इत्यादि * विधिषु को ऽसावात्मेत्याकाङ्क्षायां सर्व एव ब्रह्मस्वरूपपरः पदसमन्वयस्तत्समर्पकत्वेनोपयुक्तः न स्वतन्त्रमेव ब्रह्म प्रतिपादयितुमलम् । अतो विधीयमानज्ञानकर्मकारकत्वेनैव ब्रह्म प्रतिपाद्यत इति । यः पुनः तस्मात्प्रतिपत्तिविधिविषयतयैव शास्त्रप्रमाणकं ब्रह्माभ्युपगन्तव्यमिति भाष्ये पूर्वपक्षोपसंहारः तत्र प्रतिपत्तिशब्दः सर्व एव मनोव्यापारः प्रमाणात्मक इतरो वा ब्रह्मसंस्पर्शित्वेन विधेयः कैश्चित् कथंचित् कल्पितः तस्य † सर्वस्य संग्रहार्थो द्रष्टव्यः ।

अत्रोच्यते । किमिदं ज्ञानं ब्रह्मकर्मकं विधीयते । न तावच्छब्दजन्यम् । स्वाध्यायपाठादेव तत्सिद्धेः । अथ ‡ शब्दजन्यस्यैव ज्ञानस्याभ्यासो विधीयत इति । न तस्य प्रयोजनं पश्यामः । नन्विष्टविषयस्य ज्ञानसन्तानस्य सुखसन्तानहेतुत्वं दृश्यते । यद्येवम् § तद्वदेव विध्यानर्थक्यम् । अथ पुनः साक्षात्करणाय ज्ञानसन्तानविधिरुच्यते । नैतद्युक्तम् । न हि दृष्टाधिकारो विधिरसम्भावितदृष्टफलो भवति । न हि लैङ्गिको ऽर्थो लिङ्गजन्मनैव ज्ञानेन सहस्रशो ऽप्यभ्यस्यमानेन साक्षात् क्रियते मा भूत् ‖ शब्दज्ञानादेवाभ्यस्यमानात्साक्षाद्भावः । तज्जन्मनो ज्ञानान्तराद्भविष्यति । नेत्थंभावे प्रमाणमस्ति । अस्तु तर्हि शब्दात् प्रतिपन्नस्य यथाप्रतिपत्ति ध्यानं नाम मनोव्यापारो विधीयत इति । किमर्थं तस्य विधानम् । ध्येयसाक्षात्काराय । न तस्य संभवः । न हि परोक्षं ध्यायमानं साक्षाद्भावमापद्यमानं दृष्टम् । ननु दृष्टं परोक्षमपि ध्यायमानं साक्षाद्भावमापन्नं कामाद्युपप्लवे । मैवम् । न तद्ध्यायमानम् । अपित्वविद्यात्मकम् अन्यथा बाधो न भवेत् ।

ननु द्रष्टव्य इति दर्शनमनूद्य निदिध्यासितव्य इति ध्यानं दर्शनफलं विधीयते । उक्तमेतत् न दृष्टाधिकारो विधिरसंभावित ¶ दृष्टफलो भवतीति ।

---

* विधिषु सत्स्विति २ पु० ।
† सर्वस्योपसंग्रहार्थ इति ३ पु० ।
‡ शब्दजन्यस्य ज्ञानस्यैवेति । ३ पु० ।
§ तद्वदेवेति २ पु० नास्ति ।
‖ शाब्दज्ञानादिति ३ पु० ।
¶ दृष्टफले भवतीति ३ ।

न हि ध्यानं ध्येयसाक्षाद्भावहेतुः क्वचिद् दृष्टम् । अथापि * भवतु नाम ध्यानाद्ध्येयसाक्षाद्भावः ध्येयस्य तथात्वे किं प्रमाणम् । शब्दस्तावत्साक्षात्करणोपायोपासनविधाने पर्यवसितो न तत्सद्भावे । सत्यम् । तथापि तत्त्वं सिध्यति वक्ष्यमाणेन देवताविग्रहवत्त्वन्यायेन । विषम उपन्यासः । तत्र हि न तथात्वे साधकं बाधकं वेति प्रतीतिशरणैस्तथाऽभ्युपेयते । न तथेह सर्वस्यात्मत्वे प्रत्यक्षादिविरोधात् । आरोपितरूपेणापि ध्यानोपपत्तेः । पूर्वोक्तेष्वपि ज्ञानविधिपक्षेष्व † नयैव दिशा वस्तुतथात्वसिद्धिर्निराकार्या ।

यत्पुनः कैश्चिदुच्यते शब्दज्ञानादन्यदेव ज्ञानान्तरमलौकिकं वेदान्तेषु कर्तव्यत्वेन विधायत इति । तत्र वदामः । तत्पुनः किंसाधनं ‡ किंकर्म चेति वक्तव्यम् । न ह्यनवगत§र्मकारकं ज्ञानं विधातुं शक्यम् । अवगते च तस्मिन् विधानानर्थक्यम् । साधनमपि न विहितम् तेन विना साकाङ्क्षं वचनमनर्थकं भवेत् । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीत्यादिना वचनेन साधनं वेदानुवचनादि विहितमेवेति चेत् । प्रमाणान्तरस्य तर्हि प्रमाणं शब्दो नात्मतत्त्वस्य । नैतदुपपद्यते कार्यगम्यं हि प्रामाण्यं न विधिगम्यम् । तदुक्तम् । गुणाद्वाऽप्यभिधानं स्यात्सम्बन्धस्याशास्त्रहेतुत्वादिति । तदेवमयुक्तमेतत् विधिसमन्वये शास्त्रप्रमाणत्वं ब्रह्मणः ।

अथाप्यथ यदतः परो ‖ ज्योतिरिति प्रपञ्चातिरिक्तब्रह्माभ्युपगमे देवताविग्रहवत्त्वन्यायसंभवान्मोक्षकामस्य ब्रह्मोपासनं विधीयते । तथा च श्रुतिः विद्यया तदारोहन्तीति । नच साध्यत्वेऽप्यन्तवत्त्वम् । शब्दगम्यत्वादनावृत्तेर्न च पुनरावर्तत इति । न ह्येष तर्कगम्यो येन तर्केणास्य तत्त्वं व्यवस्थाप्येत । शब्दगम्यस्य तु शब्दादेव तत्त्वव्यवस्थेति मन्वानस्योत्तरमाह भाष्यकारः न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यादिति । वस्तुसङ्ग्रहवाक्यमेतत् । अस्यैव प्रपञ्चोऽतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्त इत्येतदन्तं भाष्यम् ।

अस्यायमर्थः । संक्षेपतः श्रुतितो न्यायतश्च मोक्षस्य नित्यसिद्धत्वप्रतीतेर्न क्रियासाध्यो मोक्ष इति । कथम् । यदि सन्ध्योपासनवन्मानसं ¶ ब्रह्मकर्मकमुपासनं नाम धर्मो मोक्षफलः स्वर्गादिफलयागवद्विधीयते । तथा

---

* भवतु ध्यानाद्ध्यानादिति ३ पु० । † एतयैवेति ३ पु० । ‡ किंकर्मकं चेति ३ पु० ।
§ कर्मकारणमिति ३ पु० । ‖ दिवो ज्योतिरिति श्रौतः पाठः । ¶ कर्मेति अधिकमत्र ३ पु० ।

सति शरीरवतैव तत्फलं भोक्तव्यमित्यशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इत्यशरीरमोक्षा * नुवादो योग्यप्रियाप्रियस्पर्शनाभावानुवादश्च निरालम्बनौ स्याताम् । न चाशरीरत्वमेव धर्मकार्यम् स्वाभाविकत्वात्तस्य । तेनानुष्ठेयफलविलक्षणं मोक्षाख्यमशरीरत्वं स्वभावसिद्धं नित्यमिति सिद्धम् । तथापि कथंचि † त्परिणामि नित्यं स्यात्स्यादपि कदाचिद्धर्मकार्यम् । इदन्तु कूटस्थनित्यं ब्रह्म जिज्ञास्यत्वेन प्रक्रान्तम् यत्स्वरूपावगमो जीवस्य मोक्षो ऽभिप्रेयते । तत्र यदि हस्तगतविस्मृतसुवर्णादिवद् भ्रान्तिमात्रव्यवहितं मोक्षं प्रत्याख्याय ब्रह्मविषयध्यानक्रियाते देवताविषययागादिव ‡ त्प्रीतिविशेषो भोग्यो मोक्षः कल्प्येत । ततस्तेष्वेव तारतम्यावस्थितेषु प्रीतिविशेषेषु यागफलेष्वयमपि तथाभूतः स्यात् । ततस्तद्यथेह कर्म § जितो लोकः क्षीयत एवमेवामुत्र पुण्य § जितो लोकः क्षीयत इतिलिङ्गदर्शनोपबृंहित ‖ न्यायावगतानित्यत्वो मोक्षः प्रसज्येत । ¶ न च तथाभ्युपगमो मोक्षवादिनाम् । अतो न कर्तव्यशेषत्वेन ब्रह्मोपदेशो युक्त इत्युपसंहारः ।

यत्पुनर्न च पुनरावर्तत इति शास्त्रावगतं नित्यत्वं न तर्केणापनेतुं युक्तमिति । तदयुक्तम् । वर्तमानापदेशत्वेन तथाभावे प्रमाणापेक्षणात् । न च कार्यस्य नित्यत्वे प्रमाणमस्ति । परमाणूनां पाकजो गुणो नित्यत्व नोदाहरणम् प्रक्रिया ** मात्रसिद्धत्वात् । किंच । तेषामिह न पुनरावृत्तिः इमं मानवमावर्त्तं न वर्तन्त इति श्रुतिरिहेममिति विशेषणादस्मिन् कल्पे ऽनावृत्तिं दर्शयति नानवधिकामनावृत्तिम् । †† अपि च । अभ्युपेत्य ब्रह्मणः क्रियानुप्रवेशं मोक्षस्यानित्यत्वदोष उक्तः न तु क्रियानुप्रवेशं क्षमते वेदान्तवाक्यगतः पदसमन्वयः । तथाच ब्रह्म वेद ब्रह्मैव भवतीत्याद्याः श्रुतयो ब्रह्मविद्यानन्तरं मोक्षं दर्शयन्त्यो मध्ये कार्यान्तरं वारयन्ति वेदनब्रह्मभवनयोरेककालत्वनिर्देशात् । अतो न विदितस्य क्रियायां विनियोगः । तथा तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेद इति ब्रह्मदर्शनसर्वात्मभावयो ‡‡ रेककालत्वनिर्देशान्मध्ये क्रियान्तरं

---

* अनुवादंभोग्यप्रियाप्रियस्पर्शनाभावानुवादाविति द्वन्द्वो ऽस्ति ३ पु॰ ।

† परिणतिनित्यमिति ३ पु॰ ।

‡ प्रीतीतिर्भोग्य इति ३ पु॰ ।

§ चित इति २ पु॰ ।

‖ न्यायावगतो ऽनित्यो मोक्ष इति ३ पु॰ ।

¶ न तथेति २ पु॰ ।

** मात्रेति नास्ति १, २ पु॰ ।

†† अपि वेति ३ पु ।

‡‡ एककालत्वनिर्देशादिति २, ३ पु॰ नास्ति ।

धारयति पश्यन्निति शतृप्रत्ययो लक्षणहेत्वोः क्रियाया इति क्रियाया हेतुभूताद्धातोः शतृप्रत्ययस्मरणात् क्रियायाश्चान्यव्यवहिते हेतुमति हेतुत्वात्। यथा तिष्ठन् गायतीति तिष्ठतिगायत्योर्मध्ये क्रियान्तराभावः * प्रतीयते तद्वत्। अत्र न स्थितिक्रियासामर्थ्यादेव गीतिक्रियानिर्वृत्तिः अपि तु प्रयत्नान्तरात् शब्दतो न तयोर्मध्ये क्रियान्तरप्रतीतिरित्येतावतोदाहरणम्। इह पुनर्न सर्वात्मभावस्य ब्रह्मदर्शनातिरेकेण प्रयत्नान्तरापेक्षा विद्यते ।

किंच । तस्मै मृदितकषायाय तमसः पारन्दर्शयतीत्याद्याः श्रुतयस्तमसो मिथ्याज्ञानस्य मोक्षव्यवधायिनो ऽपनयनमात्रं दर्शयन्ति मोक्षं न क्रियासाध्यम्। इतश्चैतदेवम्। अन्ये ऽपि न्यायविदो मिथ्याज्ञानापाये तदनन्तरं दुःखाभावं निर्वाणं दर्शयन्ति । मिथ्याज्ञानापायश्च ब्रह्मात्मैकत्वविज्ञानाद्भवति न क्रियातः। कथं गम्यते। इन्द्रो मायाभिः पुरुरूप ईयत इति मिथ्यैव भेदावभासस्तस्य प्रतिपक्षादभेदावभासादपनय इति गम्यते ।

अथापि स्यान्नैकत्वविज्ञानं † यथावस्थितवस्तुविषयं येन मिथ्यारूपं भेदावभासं निवर्तयेत् अपितु संपदादिरूपम् विधितः पुरुषेच्छया कर्तव्यमिति। संपन्नामाऽल्पमपि वस्त्वालम्बनीकृत्य केनचि ‡ त्सामान्येन दर्शनमात्रान्महद्वस्तुसम्पादनम्। ततश्च तत्फलावाप्तिः । फलस्यैव वा संपादनम् यथा मनसो वृत्त्यनन्तत्वसामान्येनानन्तविश्वदेवसंपादनं कृत्वा ऽनन्तलोकजयः। एवं जीवस्य § चिद्रूपसामान्येन ब्रह्मरूपसंपादनं कृत्वा ब्रह्मफलमवाप्यत इति। अध्यासस्त्वब्रह्मणि मनआदित्यादौ ब्रह्मदृष्ट्यो ‖ पासनं जीवस्यापि ब्रह्मदृष्ट्योपासनं संपाद्यालम्बनमविद्यमानसमं कृत्वा¶ संपाद्यमानस्यैव प्राधान्येन मनसा ऽनुचिन्तनमध्यासे त्वालम्बनस्यैव प्राधान्येनानुचिन्तनं क्रियायोगो वायोरग्न्यादीनां संहरणात्संवर्गगुणत्वेनोपासनम्। एवं जीवस्य स्वगतेन बृंहत्यर्थयोगेन ब्रह्मेत्युपासनं कार्यान्तरेण गुणभूतस्य ब्रह्मदृष्टिः संस्कारः आज्यस्येवावेक्षणम् ।

अत्रोत्तरं संपादादिरूपेहात्यादि । तथा सति तत्त्वमस्यादिवाक्यानां

---

* प्रमीयते इति १ पु॰ । † यथावेति १, २ पु॰ नास्ति ।
‡ समानत्वेनेति ३ पु॰ । § चिद्रूपत्व सामान्येनेति २ पु॰ ।
‖ उपासनमेव जीवेति ३ पु॰ । ¶ संपद्यमानस्येति १ पु॰ ।

नरुपचरितब्रह्मात्मैकत्वावगमपरः पदसमन्वयो विना कारणेन स्वेच्छामात्रेण संपदादिपरः परिकल्प्येत । तदवगमनिमित्तं च मिथ्याज्ञानापायपूर्विका विस्मृतहस्तगतसुवर्णावाप्तिवद्ब्रह्मावाप्तिः फलमनुभवारूढमपह्नूयेत। नेह नानास्ति किंचनेति च भेदाभावश्रुतिरुपरुध्येत । तस्मान्न संपदादिवत्पुरुषव्यापारपरतन्त्रा ब्रह्मविद्या किन्तु प्रत्यक्षादिजनितज्ञानवदपरामृष्टहानोपादानवस्तुस्वरूपमात्रनिष्ठेत्यभ्युपगन्तव्यम् । तत्रैवं सति कथं ब्रह्म प्रतिपत्युत्तरकालं कर्मकारकतां नीयेत। तत्तज्ज्ञानं वा * तद धिगमफलपर्यन्तं सद् विधिविषयो भवेत् । अतो मिथ्यैव भेदावभासः तस्य प्रतिपक्षादभेदावभासादऽपनयः । तस्मान्मिथ्याज्ञाननिवृत्तिमात्रं मोक्ष इति श्रुतिन्यायाभ्यां सिद्धम् ॥

ननु विदिक्रियाकर्म तावद्भवति ब्रह्म ततः क्रियासम्बन्धे संभाविते भवति विधेरवसर इत्याशङ्क्याह न च विदिक्रियाकर्मत्वेनेत्यादि । आह सोयं शान्तिकर्मणि वेतालोदयो ब्रह्मणः क्रियानुप्रवेशं निराकर्तुं ज्ञानक्रियाया अपि विषयत्वं निराकुर्वता तत एव शास्त्रयोनित्वमपि † निराकृतमेव तदाह विषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेदिति । अत्रोत्तरम् नाविद्याकल्पितत्वादित्यादि । शास्त्रं हि सोयमित्यादिलौकिकवाक्यवद् ब्रह्मणि प्रमाणम् । तथाहि । सोयमिति देशकालभेदे ‡पाधिप्रविलयेनाभेदो ऽवगम्यते तथा त्वंपदार्थोऽप्यात्मानमहंरूपं मन्यमानस्तत्त्वमसिवाक्यात्तत्पदार्थैकतामुपगच्छन् सोयमितिवदऽहमात्मकेदमंशोपाधिकृतवेद्यवेदितृवेदनात्मकप्रपञ्चेनार्थात्प्रलीयमानेना- § वच्छिद्य विच्छिद्यमानानिदंप्रकाशः प्रमाणफलं ‖ दर्शितः । तदप्यवच्छेदकविनाशे तदैव विजहन्निर्विशेषतामापद्यते । तेन ¶ प्रमात्रादिचतुष्टयस्य युगप- ** त्प्रलये ऽपि तदवच्छेदानुभवफलं वाक्यनिबन्धनम् । अतो वेदैकगोचरो निर्वाणमिति वेदविदः प्रतिपेदिरे । तथाचैवंविधस्य प्रामाणव्यापारस्य प्रकाशका मन्त्रब्राह्मणवादा भाष्ये दर्शिताः । एवं च नित्यमुक्तात्मस्वरूपसमर्पणान्न मोक्षस्यानित्यत्वदोषः । यस्य तूत्पाद्यो मोक्ष इत्यादिना । तस्माज् ज्ञानमेकं मुक्त्वा क्रियागन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यत इत्यन्तेन भाष्येण ऽविद्यानिवर्त-

---

* तदवगमपर्यन्तमिति २ पु॰ । † निराकृतमेतदाहेति १, २ पु॰ ।

‡ उपाधिकृतभेदप्रविलये इति ३ पु॰ । § अवच्छिद्यमानानिदंप्रकाश इति ३ पु॰ ।

‖ दर्शित इति ३ पु॰ नास्ति । ¶ प्रमाणादीति २ पु॰ । ** प्रविलये ऽपीति २ पु॰ ।

नेन नित्यमुक्तात्मस्वरूपसमर्पणं मोक्षं विहाय क्रियानुप्रवेशं कल्पयतो ऽपि न तस्य तत्र संभव इति * दर्शितम् । कथम् । यदि तावदुत्पाद्यो विकार्यो वा मोक्षः तदा यद्यपि क्रियानुप्रवेशो युक्तः तथापि मोक्षस्य ध्रुवमनित्यत्वमित्युक्तम् न कर्मब्रह्मविद्याफलयोर्वैलक्षण्यादित्यादिभाष्येण । अथानित्यत्वपरिहाराय स्थितस्यैवा ऽऽप्यत्व † मुच्यते । तदपि न । आत्मस्वरूपस्य क्रियापूर्वकाऽऽप्यत्वानुपपत्तेः । व्यतिरेकेपि सर्वगतत्वेन नित्यप्राप्तत्वादाकाशेनेव न क्रियापेक्षा प्राप्तिः । अथ विकारावर्तिनो ‡ ऽप्यथ यदतः परो दिवो ज्योतिर्दीप्यत इति श्रूयमाणस्य प्राप्तये क्रियापेक्षेति । न । विकारदेशेपि ब्रह्मणो विकारसंस्पर्शाभावादविशेषात् । अथ विकारावर्त्येव ब्रह्म न विकारदेशे ऽस्ति तेन तत्प्राप्तये क्रियापेक्षेति । सा तर्हि तत्प्राप्तिरात्मनस्तादात्म्यापत्तिरुत स्वेनैव रूपेण तत्रावस्थानम् । यदि पूर्वकल्पः तदा स्वरूपनाशः । अथ द्वितीयः । संयोगस्य विप्रयोगा § वसानत्वात्पुनरावृत्तिः । न चापुनरावृत्तिश्रुतिर्वर्तमानापदेशिनी तथाभावे प्रमाणान्तरमपेक्षमाणा स्वयं ‖ प्रमाणीभवति । संस्कार्यत्वमपि न सम्भवति गुणदोषयोराधेयापनेययोस्तत्रासम्भवात् । अथ विद्यमानस्याभिव्यक्तिरादर्शस्येव निघर्षणेन । तच्च न आत्मनः क्रियारहितत्वात् । अन्याश्रयायास्तु न विषयः प्रत्यग्रूपत्वात् ।

नन्वीश्वराभिध्यानान्मलापगमो भविष्यति दीपप्रभयेव घटावगुण्ठनेन ¶ तमोपनयः । उच्यते । किमसौ मलः ** परमार्थः सन्नुताविद्यात्मकः । यदि **परमार्थः सन् । ††न तर्हि स्वाश्रयविकारमन्तरेणापसारयितुं शक्यः । न हि विकार आत्मनः संभवति ‡‡ अविकारित्वश्रुतेः । अथाविद्यात्मकः । न तर्ह्य ऽविद्यावद्वृतेन सम्यग्ज्ञानेन विना तस्यापनयः लोके तथादृष्टत्वात् अन्यथा चादृष्टत्वात् । न च स्नानादिक्रिययेव संस्कार्यत्वसंभवः । अहंकर्तुरिदमंशस्यैव तत्र संस्कार्यत्वात् । तस्मान्न संस्कार्योपि मोक्ष इत्युपसंहरति । अथापि त्वऽन्यदपि क्रियाफलमस्ति तद् द्वारेण मोक्षस्य क्रियानुप्रवेशः स्यादित्याशङ्क्याह अतोन्यन्मोक्षं प्रतीत्यादि । न हि दृष्टमदृष्टं वा क्रियाफलमुत्पत्त्यादिचतुष्ट-

---

* दर्शयतीति ३ पु॰ । † उच्येतेति ३ पु॰ । ‡ अपिशब्दो नास्ति ३ पु॰ ।
§ अवसानादिति २ पु॰ । ‖ प्रमाणमिति ३ पु॰ । ¶ तमोऽपगम इति ३ पु॰ ।
** परमार्थसन्निति ३ पु॰ । †† न हि स्वाश्रयेति १, ३ पु॰ । ‡‡ अविकारश्रुतेरिति ३ पु॰ ।

यातिरिक्तं शक्यं केनचिद्दर्शयितुम् । तस्माज्ज्ञानस्यैव मोक्षो गोचरो न क्रियायाः ।

ननु * च ज्ञानस्यापि न गोचरो ब्रह्मेत्युक्तम् न विदिक्रियाकर्मत्वेन कार्यानुप्रवेशो ब्रह्मण इति वदता । सत्यम् । कर्मत्वं ज्ञानं प्रति निषिद्धम् न पुनरनुपयोग एवैकान्ततो ज्ञानस्याभिहितः । तथा च तत्रैवोपयोगप्रकारो दर्शितः अविद्यापरिकल्पितभेदनिवृत्ति † परत्वादित्यादिना भाष्येण । मा तर्हि वोचः क्रियाया गन्धमात्रस्यानुप्रवेश इह नोपपद्यत इति ननु ज्ञानं मानसी क्रिया न वैलक्षण्यादित्युत्तरम् । कथं वैलक्षण्यम् । अजन्यफलत्वात् । उक्तमजन्यफलत्वमहङ्कार ‡ टीकायाम् । इदमपरं वैलक्षण्यम् ज्ञानं न चोदनाजन्यम् वस्तुजन्यं हि तत् । वस्तु च ज्ञानात्प्रागेव § स्वरूपे व्यवस्थितम् । अतस्तत्तन्त्रं ज्ञानम् न तज् ज्ञानेनान्यथा कर्तुं शक्यम् । अथापि स्यात् । भवेत्प्रत्यक्षं वस्तुजन्यम् अनुमानादिषु कथम् । तत्रापि लिङ्गादिपरतन्त्रम् न चोदनायास्तत्रानुप्रवेशः । किंच । न चोदनाजन्यं ज्ञानमेकान्ततो वस्तुपरिच्छेदकम् योषादिष्वग्न्यादिदृष्टिविधानदर्शनात् । अतो वस्तुविषयस्य ज्ञानस्य क्रियात्वे ऽपि न चोदनाजन्यत्वम् न पुरुषतन्त्रत्वम् अपितु प्रमाणवस्तुपरतन्त्रत्वम् एवं सम्यग्ज्ञानत्वोपपत्तेः अग्नाविवाग्निज्ञानस्य । एवं सति ब्रह्मात्मैकत्वविज्ञानस्यापि यथाभूतवस्तुविषयत्वान्न चोदनाजन्यत्वम् । अतो न विधेरत्रावकाशः । अतः श्रूयमाणा अपि विधयः केवलप्रमाणवस्तुपरतन्त्रे ज्ञाने ऽकिंचित्करत्वात् कुण्ठीभवन्ति । अतो ऽर्थवादतया ऽऽत्मज्ञानस्तावकत्वेन तदुन्मुखीकरणात् सामर्थ्यसिद्धबहिर्मुखतानिरोधाच्च विधिकार्यलेशस्य विद्यमानत्वाद्विधय इव लक्ष्यन्ते । तथा च श्रवणं नाम आत्मावगतये वेदान्तवाक्यविचारः शारीरकश्रवणं च । मननम् वस्तुनिष्ठवाक्यापेक्षितदुन्दुभ्यादिदृष्टान्तजन्मस्थितिलयवाचारम्भणत्वादियुक्त्यर्थवादानुसंधानं वाक्यार्थाऽविरोध्यनुमानानुसंधानं च । निदिध्यासनं मननोपबृंहितवाक्यार्थविषये स्थिरीभावो विधेयस्योपासनापर्यायस्य निष्फलत्वात् । ‖ दर्शनम् ततो वाक्यार्थे स्थैर्यान्निरस्तसमस्त-

---

* चेति नास्ति ३ पु॰ ।

† परत्वादिभाष्येणेति ३ पु॰ ।

‡ टीकायामित्युक्तम्॰ इदमपरमिति ३ पु॰ ।

§ स्वस्वरूपेणेति ३ पु॰ ।

‖ दर्शनं ह्यतो वाक्यार्थस्थैर्यैत्ति ३ पु॰ ।

प्रपञ्चावभासविज्ञानघनैकतानुभवः । कः पुनरत्रार्थवादः । इदमत्र प्रस्तुम् क्रियाकारकफलात्मकात्संसाराद्विरक्तायै मैत्रेय्यै मुमुक्षवे मोक्षसाधनमात्मज्ञानं प्रतिपिपादयिषन्न वा अरे पत्युः कामाय पतिः प्रियो भवतीति पत्यादेरीप्सितत्वं प्रतिषिध्यात्मन ईप्सित * तमत्वमाह । ननु नैवात्मन ईप्सित * तमत्वमुच्यते किन्तु पत्यादीनामेवात्मार्थतयेप्सितत्वमुच्यते आत्मनस्तु कामाय पतिः प्रियो भवतीति । मैवम् । न हि तस्मिन्नऽनिष्टे तदर्थमिष्टं भवति । तस्मादनेनोपायेनात्मन एवेप्सितत्वमुक्तम् । ईप्सितश्चेद् द्रष्टव्यः श्रोतव्य इत्येषो ऽर्थवादः । एतच्च सर्वं प्रथमसूत्रेणैव सूचितं विवृतं च भाष्ये । † अपि च । नैवायं विधो कृत्यः । किं तर्हि । अर्हे कृत्यतृचश्चेत्यर्हे कृत्यः । ‡ एतेनात्मेत्येवोपासीत आत्मानमेव लोकमुपासीतेत्येवमादीनि विधिच्छायानि वाक्यानि व्याख्यातानि वेदितव्यानि । अतो हानोपादानशून्यात्मावगमादेव कृतकृत्यता प्रतीयते । श्रुतिस्मृतिवादानां च तथा प्रस्थितत्वात् । तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मणः समर्पणमित्युपसंहरति । अस्यायमर्थः । न प्रमाणात्मकेनेतरेण वा ज्ञानव्यापारेण विधीयमानत्वेन कल्पितेन § संस्पर्शो ब्रह्मण इति ।

‖ यदपि केचिदाहुरित्यादि । अस्यायमर्थः । यदि स्वरूपमात्रनिष्ठोऽपि वेदभागो ऽस्ति तत इदं पूर्वोक्तं प्रतिष्ठां लभते अन्यथा क्रियानुप्रवेशातिरिक्तमवेदार्थ एव स्यादिति । अस्योत्तरम् । तन्न औपनिषदस्य पुरुषस्यानन्यशेषत्वादिति वस्तुसंग्रहवाक्यम् । ¶ अस्यैव प्रपञ्चः यो ऽसावुपनिषत्स्वेवाधिगत इत्यादिः । अस्यायमर्थः । यो ऽयमहंप्रत्ययविषयात् क्रियासम्बन्ध्यात्मनो ऽतिरिक्तः सम एकः सर्वभूतेष्वहंकर्तुरपि साक्षिभूतो न स केनचित्प्रमाणेन सिद्धः येन क्रियाशेषतां नीयेत । न हि प्रमाणान्तरासिद्धः क्रियासम्बन्धितयोपदेष्टुं शक्यः । न च स न प्रतीयत इति युक्तं वक्तुम् । तत्प्रतिपादकोपनिषत्पदसमन्वयस्य दर्शितत्वात् । अत एवौपनिषदत्वविशेषणमनन्यविषयत्वात् । तच्च वेदान्तानां तत्परत्वे ऽवकल्पते । नैष प्रतीयमानो ऽपि

---

* तमब् नास्ति ३ पु० ।
† किञ्च नैवेति ३ पु० ।
‡ तेनेति ३ पु० ।
§ संसर्गो ब्रह्मण इति ३ पु० ।
‖ यस्त्वपि केचिदिति ३ पु० ।
¶ तस्यैवेति ३ पु० ।

शुक्तिरजतवन्मिथ्येति शक्यं वक्तुम् बाधाभावात् । इतश्च न शक्यते मिथ्येति विदितुम् तस्मिन्नौपनिषदे पुरुषे स एष नेतिनेत्यात्मशब्दप्रयोगात् । आत्मनश्चानिराकार्यत्वात् य एव निराकर्ता तस्यैवात्मत्वप्रसङ्गात् । न च तस्य कदाचिदभावः सम्भवति अभावहेतूनामविषयत्वात् । न च निर्हेतुको विनाशः चितेरेकरूपावभासेन क्षणभङ्गनिराकरणात् । अतो ऽवच्छेदत्रयशून्ये तस्मिन् स्वयंप्रकाशमाने सर्वस्य पुरुषार्थावधिर्विनाशः सा काष्ठा सा परा गतिः । तदेवमसंसार्यात्मनि प्रमाणान्तरागोचरे वेदान्तवाक्यसमन्वयात् प्रतीयमाने कथं तत्परो वेदभागो न भवेत् कथं वा प्रतीयमानो निराक्रियेत ।

नन्वाम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामित्यक्रियार्थानां पदानामर्थशून्यत्वं शास्त्रतात्पर्यविद आहुः । तस्मात्प्रवृत्तिनिवृत्तिव्यतिरिक्तार्थवादिनां * निरालम्बनत्वात् ततो वस्त्ववगमः सामान्यतोदृष्टनिबन्धनो भ्रमः । तेन प्रवृत्तिनिवृत्त्यनुपयोगि वस्तु न शब्दादवगम्यते † अत एव ‡ तन्मिथ्येति शक्यते वक्तुम् । प्रमाणान्तरस्यापि § तद्विषयस्यासम्भवात् । कथं पुनः प्रवृत्तिनिवृत्त्यनुपयोगि वस्तु न शब्दादवगम्यते । शब्दस्य तत्र सामर्थ्याग्रहणात् । नचागृहीतसामर्थ्य एव शब्दश्चक्षुरादिवद्विज्ञानं जनयति । सामर्थ्यग्रहणं च ज्ञानकार्योन्नेयम् । ज्ञानं च विशिष्टार्थविषयं तद्विषयप्रवृत्त्या ‖ ऽवगम्यते । तदभावे कुतः सामर्थ्यकल्पना स्यात् । अक्लृप्तसामर्थ्यश्च शब्दो ¶ ऽक्रियाशेषे ऽर्थे कथं विज्ञानं जनयेत् ।

उच्यते । नैव सूत्रकारभाष्यकारयोरभिप्रायो लौकिको वा न्यायः सम्यगवगतो भवता पश्यतु भवान् । देवदत्त गामभ्याज शुक्लां दण्डेनेति प्रवर्त्तकाभ्याजेतिपदातिरेकिणां देवदत्तादिभूतार्थवादिनामप्रवर्तकानामपि प्रवर्त्तकादेव वाक्याद्भूतवस्तुविषयमपि सामर्थ्यं प्रतीयते न वेति । प्रतीयते चेत् निष्प्रयोजनत्वमानर्थक्यम् न निरालम्बनत्वम् । तदाह भाष्यकारः अपिच आम्नायस्य क्रियार्थत्वादित्यादिना भाष्येण । प्रयोजनं चानन्तरं पारम्पर्येण वा सुखावाप्ति ** दुःखपरिहारो वा स्यात् । अतस्तदर्थक्रियानुपयोग्यर्थवाचिनां सो ऽरो-

---

* निरालम्बनत्वे इति ३ पु॰ । † तत एवेति ३ पु॰ । ‡ तदिति २ पु॰ नास्ति ।
§ तद्विषये ऽसंभवादिति ३ पु॰ । ‖ अवेति नास्ति ३ पु॰ ।
¶ अक्रियविशेषे ऽर्थे इति ३ पु॰ । ** सुखावाप्तिर्दुःखपरिहारो इति २ पु॰ ।

दीदित्यादिपदानां भवत्वानर्थक्यम् ब्रह्मात्मत्वावगतिसमन्वितानां तु परमपुरुषार्थफलानां कथं निष्प्रयोजनत्वम् । स्यादेतत् । यद्यपि प्रवर्त्तकादेव वाक्याद्भूतार्थविषयमपि सामर्थ्यं प्रतीयते तथापि नाप्रतिपन्नभूतार्थावगतेः संभवः । * क्रियार्थतयैव संसर्गावगमात् । न हि गोपदात्तदर्थः सास्नादिमत्पिण्डधर्मत्वेनावगतो व्युत्पत्तिकाले पुनः प्रयोगान्तरेष्वप्रतिष्ठितः केसरादिमत्पिण्डधर्मत्वेन वा प्रतीयते । विषम उपन्यासः । गोपदस्याभिधेयसम्बन्धेन नानाविधसामर्थ्यमुपलब्धम् । अतो युक्तैकरूपैव प्रतीतिः । शब्दान्तरार्थान्वये पुनः प्रतिविभक्ति प्रतिपदार्थान्तरं च प्रयोग † भेदादन्यथान्यथा च सम्बन्धग्रहणकाल एवाऽऽवापो ‡ द्वापनिबन्धनः समन्वयो दृश्यते । तेन द्रव्यगुणक्रियाभिधायिभिः पदैः सम्बन्धयोग्यताभिधायिविभक्तिसंयुक्तैः प्रयोगैदम्पर्यवशादऽनियतः सम्बन्धो व्युत्पत्तिकाले निरूपितः । तथा च वषट्कर्तुः प्रथमभक्षः तस्मात्पूषा प्रपिष्टभाग इत्येवमादौ क्रियाशून्यानां समन्वयो दृश्यते । यस्तु कर्तव्य इति क्रियासम्बन्धः § स समन्वयनिमित्तो न तन्निमित्तः समन्वयः । यत्तु तद्भूतानां क्रियार्थेन समाम्नाय इति सूचयामास जैमिनिः । तदपि सिद्धेषु रूपादिष्वऽर्थेषु वर्तमानानां सामानाधिकरण्याद्यर्थत्वेन समाम्नायः समुच्चारणमिति यतो दर्शितः समन्वयो विशेषणविशेष्यत्वेनापि ‖ क्रियार्थेनेति तु धर्म ¶ जिज्ञासोपक्रमात्प्रकृतोपयोगितया ** सूचितम् । तथा च भाष्यकारोऽपि दृष्टो हि तस्यार्थः कर्मावबोधनमित्यर्थसद्भावमात्रे कथनीये कर्मावबोधनमिति प्रकृतोपयोगित्वेनैवोक्तवान् । तदेतदाह भाष्यकारः यदपि शास्त्रतात्पर्यविदामनुक्रमणमित्यादिभाष्येण । अत एव पूर्वेण तन्त्रेणागतार्थत्वाच्छारीरकारम्भः । तत्र हि वेदस्य विवक्षितार्थत्वं स्वतःप्रमाण्यं स्वरूपे च विज्ञानोत्पत्तौ शब्दस्य सामर्थ्यमित्येतत्सर्वमवगतम् । क्रियार्थेन समाम्नाय इति तु धर्मजिज्ञासाप्रतिज्ञानुसारेण सूचितम् । इह पुनस्तत्तु समन्वयादिति विशेषणविशेष्यात्मकमपि गौण †† मपि सामानाधिकरण्यं विहायैकस्मिन्निरंशे ऽधिकरणे तत्त्वमसीति समन्वयो

---

* क्रियाऽर्थतैवेति ३ पु॰ ।

† भेदेनान्यथा चान्यथा चेति ३ पु॰ ।

‡ उद्धारनिबन्धन इति ३ पु॰ ।

§ स इति नास्ति १, २ पु॰ ।

‖ क्रियार्थत्वेनेति ३ पु॰ ।

¶ जिज्ञासा प्रक्रमादिति २ पु॰ ।

** सूचितमिति १ पु॰ ।

†† अपिशब्दः पुनर्नास्ति पु॰ ३ ।

मुख्यः प्रदर्शितः । तथा च भगवान् पाणिनिरव्यतिरिक्ते * प्रातिपदिकार्थमात्रे प्रथमां स्मरति ना ऽस्ति क्रियाकर्तर्य † वातिरिक्ते ऽर्थे । तेन च कात्यायनस्यास्तिर्भवन्तिपर इति मतं नानुमन्यते । दृश्यते च फलिता अमी द्रुमा राज्ञोऽयं पुरुष इत्यस्तिक्रियाशून्यः समन्वयः । नात्रापि ये फलिता द्रुमास्ते सन्ति यो राज्ञः पुरुषः सो ऽस्तीति विवक्षितम् ‡ अपित्वेते द्रुमाः फलिताः अयं पुरुषो राज्ञ इति सम्बन्धमात्रावसितं वाक्यम् । एवं सामान्यतःसिद्धस्य जगत्कारणस्य सर्वज्ञत्वादिस्वभावत्वे त्वम्पदार्थस्य च ब्रह्मात्मतायां समन्वयो वेदान्तवाक्यानां सिद्धः न तत्रास्तिक्रियाया वस्तुस्वरूपान्तर्वर्तिन्या अप्यनुप्रवेशो § दूरत एव बाह्यायाः ।

किञ्च । ब्राह्मणो न हन्तव्य इतिप्रतिषेधवाक्यसमन्वये न क्रिया क्रियार्थो वा ऽवगम्यते किन्तु क्रियानिवृत्तिरेव नियमेन प्रतीयते । व्रतशब्दसमन्वयात्तु प्रजापतिव्रतादिषु नेक्षेतोद्यन्तमादित्यमित्यादिष्वनीक्षणं ‖ मानसी संकल्पक्रिया प्रतीयते अनीक्षणं कुर्यात् ¶ नेक्षे ऽहमिति संकल्पयेदिति । न नञः समन्वयमात्रात् तस्य समन्वीयमानार्थाभावकत्वात् । न च स्वभावप्राप्तहन्त्यर्थानुरागेणेत्यादिभाष्यस्यायमर्थः । स्वभावत एव रागादिनिमित्ताच्छास्त्रमन्तरेणैव हननक्रिया प्राप्ता यदि नञानुरज्यते विशेष्यते तदा भवत्यहननमिति । ततश्चाहननं कुर्यादिति वाक्यार्थः स्यात् न हननं न कुर्यादिति हननक्रियानिवृत्त्यौदासीन्यम् । अतो न हन्यामिति मानसी संकल्पक्रिया ऽपूर्वा ऽभिहिता स्यात् । न चैतद्युक्तम् नञः सम्बन्ध्युपमर्द**रूपत्वात् । अनीक्षणे तु व्रत †† शब्दबलात्तथासमन्वयो न नञः सामर्थ्यादित्युक्तम् ।

ननु नञर्थे नियोगः प्रतिषेधेषु । तेन यागाद्यनुष्ठानादिवनञर्थानुष्ठानान्नियोगः साध्यः किमुच्यते क्रियानिवृत्त्यौदासीन्यं प्रतीयत इति । वार्तमेतत् । नञर्थो हि नाम न क्रिया ‡‡ नापि साधनम् अपि तु येन संसृज्यते तस्याभावो न तत्सिद्धिहेतुः । एवं प्रतिषेधस्य विधेरन्यत्वं सिध्यति । अन्यथा

---

* प्रातिपादिकमात्र इति ३ पु॰ । † एव ह्यतिरिक्तार्थे इति ३ पु॰ ।
‡ किन्त्वेते इति ३ पु॰ । § "दूतर एव अन्यायाः बाह्यायाः"—इति ३ पु॰ ।
‖ नामेत्यत्राधिकं ३ पु॰ । ¶ नेक्षे इतीति ३ पु॰ ।
** रूपत्वादवीक्षणेत्विति ३ पु॰ । †† शब्दसमन्वयात्तथेति ३ पु॰ ।
‡‡ न साधनमिति ३ पु॰ ।

विधिरेव * सर्वं स्यात् । तस्मात् संसृज्यमानाभावमात्रे प्रतिषेधवाक्यं पर्यवस्यति । † तत्र न विधिगन्धो ‡ पि विद्यते । तच्च संसृज्यमानं विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नाभ्यनुज्ञानानामऽभावात्प्रतिपाद्यधर्मः प्रतिषिध्यमानक्रिया § फलं प्रार्थनाप्रतिषेधवाक्ये लिङाद्यर्थः । तेन तदभावः प्रतिषेधार्थः स च प्रागभावः स्वभावसिद्धः । ‖ तस्मात्संस्कारोद्बोधनिमित्तसंनिधावपि तत्प्रतिबन्धे प्रयत्न आस्थेयः । स च यद्यपि साध्यः तथाप्यन्वयव्यतिरेकगम्यो न शब्दार्थः तत्प्रतिपादकपदाभावाच्च एकवाक्ये संसृष्टपदार्थव्यतिरेकेणान्यत्र वाक्यार्थत्वाभावाच्च । अतो यश्चार्थादर्थो न स चोदनार्थः । वाक्यन्तु क्रियाशून्यमेवावसितम् न साध्यं किञ्चित्तेन विषयीकृतम् औदासीन्यमात्रावसितत्वात्तस्य ।

अथ पुनर्नञर्थविषयो नियोग एव प्रतिषेधे ऽपि वाक्यार्थ इत्यभिनिवेशः । भवतु तथापि प्रतिषिध्यमानक्रियानिवृत्त्या स सिध्यति क्रियोपादाने च तत्फलप्रार्थनैव हेतुरिति तत्कारणप्रतिबन्धे प्रयत्नास्थानान्नियोगसिद्धिः । तच्चान्वयव्यतिरेकावसेयमिति पूर्वोक्तान्मार्गान्न विशिष्यते । तदेवं वृद्धव्यवहारानुसारेणैव समन्वयानुसरणे सति तद्गम्यं ब्रह्म न धर्मवच्चोदनागम्यम् । दर्शितानि च वेदान्तवाक्यानि कारणसामान्ये सिद्धे तद्विशेषावगमाय समन्वितानि यतो वा इमानि भूतानि जायन्त इत्यादीनि तत्त्वमसीत्यादीनि च ।

यत् पुनरुक्तम् प्रतिपन्नब्रह्मात्मभावस्यापि पूर्ववत्संसारित्वदर्शनान्न रज्जुस्वरूपकथनवदर्थवत्त्वमस्य समन्वयस्य ततो न तन्मात्रे तस्य पर्यवसानमित्यत्रोत्तरम् नावगतब्रह्मात्मभावस्येत्यादि । अस्यायमर्थः न कर्मनिमित्तस्तावच्छरीरसम्बन्धः इतरेतराश्रयदोषात्क्रियादिरहितत्वाच्च चैतन्यस्य । अनादित्वे ऽप्यन्धपरम्परावदप्रतिष्ठत्वात् । तन्निमित्तत्वे च पुत्रादिशरीरेष्विव गौणत्वप्रसङ्गात् तथानुभवाभावात् प्रसिद्धगौणत्वप्रकारासम्भवात् पुत्रादिशरीरेणेव स्वशरीरेणापि प्रमातृत्वाभावप्रसङ्गात् । पारिशेष्यादविद्यानिमित्तः शरीरसम्बन्धः । तस्यां च निवृत्तायां तत्सम्बन्धनिवृत्तौ कथं पूर्ववत्त्व ऽनिमित्तः

---

* सर्वः स्यादिति ३ पु० । † न तत्रेति ३ पु० । ‡ अपिर्नास्ति ३ पु० ।
§ फलप्रार्थनेति ३ पु० । ‖ तस्मात्तत्संस्कारेति ३ पु० ।

सुखदुःखानुभवः । तथा च श्रुतिस्मृतिवादा ब्रह्मविदः सर्वसंसारप्रवृत्त्यभावं दर्शयन्त उदाहृता भाष्ये । तस्मान्न ब्रह्मात्माभिमानिनः पूर्ववत्संसारित्वम् तदभिमानविरोधात् । वैषयिकस्तु साक्षादनुभवाभिमानः संसारविषय आरब्धकर्मशेषनिमित्तः तिमिरनिमित्तद्विचन्द्रवत् । मनननिदिध्यासनयोर्न ब्रह्मावगत्युत्तरकालीनता किन्तु श्रवणवदवगत्युपायतया पूर्वकालतैवेत्युक्तम् ।

तदेवं सिद्धस्य वस्तुनः स्वरूपसत्तामात्रेणाप्रतिपन्नस्य प्रमाणविषयतया प्रमेयत्वाद्विधीयमानक्रियाकर्मत्वे तु कारकत्त्वस्य प्रमाणान्तरसिद्धापेक्षत्वात्ततः सिद्धानुपपत्तेर्वाक्यभेदप्रसङ्गात्प्रत्यक्षादिविरोधे देवताधिकरणन्यायासिद्धेर्वाक्यान्तरसिद्धस्य कर्मकारकत्वे चतुर्विधस्यापि कर्मकार्यस्य तत्रासम्भवात्तत् कर्मकोपासनाद्देवताकर्मयागादिवत्स्वर्गोपमो मोक्षः फलं कल्प्येत । तस्य तद्वदेवानित्यत्वप्रसङ्गाद् ब्रह्म वेद ब्रह्मैव भवती*त्यादिभ्यो ब्रह्मवेदनमोक्षफलयोर्निरन्तरत्वप्रतिपादकेभ्यो वाक्येभ्योर्थादन्तराले क्रियानुप्रवेशनिराकरणात् तरति शोकमात्मविदित्यादिश्रुतिभ्यो मोक्षप्रतिबन्धनिवृत्तिमात्रस्यैवात्मज्ञानफलस्य दर्शितत्वात्साध्यान्तराभावे क्रियानुपपत्तेर्ब्रह्मात्मावगमस्य च मुख्यैक्याधिकरणस्य संपदादिद्विकल्पनानुपपत्तेः प्रमाणजन्याया अपि विदिक्रियायाः कर्मत्वनिषेधाद्विधीयमानोपास्तिक्रियाविषयत्वस्य दूरनिरस्तत्वाद्विदिक्रियाविषयत्वे ऽपि समारोपितनिवर्तनमुखेन नित्यसिद्धचैतन्यस्य ब्रह्मस्वरूपतासमर्पणाद्वाक्यविषयत्वोपपत्तेः सत्यपि वा विदिक्रियाकर्मत्वे तस्य च विध्यनायत्तत्वाद्विधिच्छायानां संस्तावकत्वेनाहार्यत्वात्संसारनिवृत्तेश्च ज्ञानफलस्य दृष्टत्वात् । अतो विधिनिरपेक्षं स्वतन्त्रमेव ब्रह्म शास्त्रप्रमाणकम् वेदान्तवाक्यसमन्वयादिति सिद्धम् ।

एवं च सति † वेदान्तानां परस्परसमन्वयजनितविज्ञानातिरेकेण चक्षुरादिवत्प्रवर्तकत्वस्याभावा ‡ त्तद्विषयः शास्त्रारम्भः पृथगुपपद्यते । अन्यथाक्षापि बोधकत्वातिरेकेण प्रवर्त्तकत्वमपि चेत् अथातो धर्मजिज्ञासेत्येवारब्धत्वान्न पृथगारभ्येत । अथाप्यबहिःसाधनत्वात्ततः परिशेषितमिति । तथाप्यथातः परिशिष्टधर्मजिज्ञासेति प्रतिज्ञा स्यात् प्रवर्त्तकविशेषजिज्ञास-

---

* इत्यादिश्रुतिभ्यो ब्रह्मेति २ पु० ।　　　† पदानां परस्परेति ३ पु० ।
‡ तद्विषयपृथक्शास्त्रारम्भ उपपद्यत इति ३ पु० ।

नात्। तदेवं ब्रह्मावगमात् प्रागेव विधिविधेयप्रमाणप्रमेयव्यवहारः । परतस्तु प्रमातुर्विधिविषयस्य चाभावान्न तत्सद्भाव इति । अपि चाहुरिति । प्रसिद्धमेतद् ब्रह्मविदामिति पूर्वोक्तं न्यायं संक्षेपतः श्लोकैः संगृह्णाति * गौणमुख्यात्मन इति । गौणोऽहंमानो ममत्वेन सम्बन्धात्पुत्रदारादौ । अतः स । गौण आत्मा मिथ्या देहादारभ्याहङ्कर्तुरिदमंशपर्यन्तो ऽहंमानो नात्मन्यात्माभिमानात् अतः स मिथ्यात्मा । तस्योभयस्याप्यात्मनो मुख्यपरमार्थब्रह्मात्मावगमेन तदाधारपुत्रदेहादिबाधनाद ऽसत्त्वे तन्निमित्तं शास्त्रीयं नियोज्यत्वं † शारीरं च भोक्तृत्वं निमित्ताभावान्न कथंचिदुद्भवेदित्यर्थः । तदेतद् ‡ द्रढयन्नाह अन्वेष्टव्यात्मेति । सोऽन्वेष्टव्य इत्याद्युपक्रमेणोपदिष्टापास्ताशेषसंसाररूपब्रह्मात्मावगमात्प्रागेव प्रमातृत्वाभिमानः § प्रत्यक्चितेर्यदा ‖ पुनस्तद्रूपं विस्मृतसुवर्णवदवाप्तम् तदा स एव प्रमातृत्वाभिमतो निरस्तसंसारदोषः संपन्नः । कुतस्तस्य कर्तृत्वभोक्तृत्वे भवतः ।

यद्ययमहमुल्लेखप्रमुखप्रमातृत्वादिव्यवहारः कल्पितः कथमिदानीमस्य प्रामाण्यमित्याशङ्क्याह देहात्मप्रत्यय इति । यथा देहे विशिष्टजातीये तद्व्यतिरिक्तस्याहङ्कर्तु ¶ रहंमानसम्बन्धः कल्पितो ऽपि स्वनिबन्धने लोकशास्त्रव्यवहारे यथा ऽवगतितत्त्वहेतुः तथा ऽयं कल्पितो ऽप्यलौकिकात्मरूपप्रतिपत्तेः प्राक् प्रमाणम् निश्चितप्रत्ययोत्पादनाद्बाधानुपलब्धेश्चेति ॥

इति नवमं वर्णकम् ।

** इति श्रीपद्मपादाचार्यविरचितायां पञ्चपादिकायां चतुःसूत्री समाप्ता ॥

परिसमाप्तश्चायमुपलभ्यमानो ग्रन्थः ॥

---

* गौणमिथ्यात्मन इति ३ पु· । † सांसारिकञ्चेति २ पु·, सांव्यवहारिकं चेति ३ पु· ।
‡ दर्शयन्नाहेति ३ पु· । § प्रत्यगात्मन इति २ पु· ।
‖ पुनः स्वरूपमिति ३ पु· । ¶ अहंमानबन्ध इति १ पु· ।
** इति पञ्चपादिकायां नवमो वर्णकः समाप्तः· इति चतुस्सूत्री-इति ३ पुस्तके पाठो ऽस्ति ।